प्रभां ध्यात्वा चोर्ध्व करद्वयेन दधतीं पाशं सृणिं चक्रमात् दोर्भ्यां
चामृतपूर्णहेमकलशं मुक्ताक्षमालां वरं गंगासिंधुसरिद्वया
दिसहितां श्रीतीर्थशक्तिं भजे इति तीर्थशक्तिं ध्यात्वा ऐंह्रीं।
श्रीं क्रां क्रीं ह्रं ह्रैं ह्रौं ह्रः सर्वानंदमये तीर्थशक्ति एह्येहि स्वाहा
ॐ तीर्थशक्त्यै नमः इति तीर्थशक्तिं संपूज्य तत्र क्रींकारेणालो
ड्य वमिति धेनुमुद्रयाऽमृती कृत्य ह्रैं वैं कवचाय हुं इति
कवचमंत्रेणावगुंठनमुद्रयावगुंठ्य ह्रः वः अस्त्राय फडि
त्यस्त्रमंत्रेण छोटिकाभिः संरक्ष्य तत्र सचक्रं सांगावरणं दे
वं ध्यात्वा जलमयैः पंचोपचारैः संपूज्य संहारमुद्रया देव
विसृज्य मूलमंत्रेणाष्टवारमभिमंत्र्य तत्र मूलमंत्रं जपन् हृ
दि देवं स्मरन् त्रिमज्योन्मज्य कुंभमुद्रां बध्वा मूलमंत्रेण स्व
सिरसि त्रिरभिषिंच्य आधारः सर्वभूतस्य विष्णोरतुलतेज
जः तद्रूपाश्च ततो जाता आपस्ताः प्रणमाम्यहम् इति तीर्थ
जलमुपस्थाय ॐ वं सिसृक्षोर्निखिलं विश्वं मुहुः शुक्रं प्रजा
यते मातरः सर्वभूतानामापो देव्यः पुनंतु मां ॐ वं श इति
स्वशिरः प्रोक्ष्य अलक्ष्मीऽमलरूपा याः सर्वभूतेषु संस्थि
ता क्षालयंति निजस्पर्शाद्दापो नित्यं पुनंतु मां इति मंत्रेण चा

मै· पा·
४

त्वानमभ्युक्ष्य यन्मे केशेषु दौर्भाग्यं सीमंते यच्च मूर्द्धनि ललाटे
कर्णयोरक्ष्णोरापस्तत्घ्नंतु वो नमः इति प्रणम्य मूलमंत्रेण
स्वाहांतेन त्रिराचम्य मूलेन च त्रिः संतर्प्य तीरमागत्य धौते
वाससी परिधाय करौ च मृदाद्भिस्सुप्रक्षाल्याचम्य ब्राह्मणो
ऊर्ध्वपुंड्रं स्यात्क्षत्रियस्य त्रिपुंड्रकं वैश्यपुंड्रमर्द्धचंद्रं शूद्राणां व
र्तुलाकृति इति नारदपंचरात्रोक्तं स्ववर्णविहितं तिलकं आदौ वि
धाय विना भस्मत्रिपुंड्रेण विना रुद्राक्षमालया पूजितोपि महा
देवो न सम्यक्फलदो भवेदिति लिंगपुराणवचनात् शिवशास्त्रां
गभूतं भस्मत्रिपुंड्रं धारयेत् अग्निहोत्रोद्भवं वा वक्ष्यमाणविध
ना संस्कृतं शिवाग्रावंतरिक्षे गृहीत कपिलागोमये पिंडेषु पक्वं
मूलमंत्रेण दग्धं देवोद्वासनात्पूर्वमेव गृहीतमपाकातिपक्व
रहितं वस्त्रेण शोधितं कर्पूरादिसुवासितं भस्म संगृह्य संस्था
प्य तेन वा त्रिपुंड्रकधारणं कुर्यात् तत्प्रकारस्तु मूलमंत्रेण प्रा
णायामत्रयं कृत्वा शिरसि पिप्पलादऋषये नमः मुखे गाय
त्रीछंदसे नमः हृदये श्रीरुद्राय देवतायै नमः गुह्ये अग्निबीजा
य नमः पादयोः भस्मशक्तये नमः मम मोक्षार्थे भस्मधारणे
विनियोगः इति ऋष्यादिन्यासं विधाय अंगुष्ठयोः काला
य नमः तर्जन्योः कलविकरणाय नमः शिरसे स्वाहा मध्यम
योः कलविकरणाय नमः शिखायै वषट् अनामिकयोः ब
लप्रमथनाय नमः कवचाय हुं कनिष्ठिकयोः सर्वभूतदम
नाय नमः नेत्रत्रयाय वौषट् करतलपृष्ठयोः मनोन्मनाय
नमः अस्त्राय फडिति विन्यस्य हृदयशिरसि शिखा कवच ने॰

त्रेषुश्रोगुग्नापंचमंत्रान् विन्यस्यास्त्रमंत्रेण तालत्रयंदशदिग्बं
धनंचकृत्वा विभूतेभूतिमानासीद्वामदेवःसदाशिवः रक्षाबं
धस्त्वयादेवीरक्षमामनयेसदा इतिविभूतिंप्रणम्य ॐसद्यो
जातंप्रपद्यामिसद्योजातायवैनमः भवेभवेनादिभवेभजस्वमां
भवोद्भवायनमः १ ॐवामदेवायनमोज्येष्ठायनमोरुद्रायन
मः कालायनमः कलविकरणायनमोबलविकरणायनमो
बलप्रमथनायनमः सर्वभूतदमनायनमोमनोन्मनायन
मः २ अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः सर्वतःसर्वसर्वे
भ्योनमस्तेऽस्तुरुद्ररूपेभ्यः ३ तत्पुरुषायविद्महेमहादेवा
यधीमहि तन्नोरुद्रःप्रचोदयात् ४ ईशानःसर्वविद्या
नामीश्वरःसर्वभूतानांब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशि
वोमेअस्तुसदाशिवोम् ५ इतिमंत्रान्पठित्वा विभूतिमादा
य वामकरेनिधाय भस्माभिमंत्रणे मंत्रस्यऋष्यादिन्यासं
कुर्यात् तत्रशिरसिअथर्वशिराऋषयेनमः मुखेगाय
त्रीछंदसेनमः हृदयेश्रीरुद्रदेवतायैनमः इतिविन्यस्य
ॐअग्निरितिभस्मवायुरितिभस्मजलमिति भस्मसर्वंहवा
इदंभस्ममनइत्येतानिचक्षूंषिभस्मानिइत्यभिमंत्र्य ॐ
आपोवाइदंविश्वाभूतान्यापः प्राणावाआपःपशवआपो
मन्नमापोमृतमापःसम्राडापोविराडापः स्वराडापश्छंदांस्या
पोज्योतींष्यापःसत्यापः सर्वादेवताआपोभूर्भुवःस्वराप
ॐइतिमंत्रेणाभिषिंच्य ॐमानस्तोकेतनयेमानआयुषि

भै॰पा॰
५

मानोगोषुमानोऽश्वेषुरीषः मानोवीरान्रुद्रभामिनोवधीर्हे
विष्मंतः सदमित्वाहवामहे इतिमंत्रेणसंमृज्य द्विधाकृत्वा
एकेनभागेनईशानःसर्वविद्यानामितिप्रागुक्तमंत्रेणशिर
सितत्पुरुषायेतिमंत्रेणमुखे अघोरेभ्यइतिमंत्रेणबाह्वोः
वामदेवायेतिमंत्रेणकंठादिनाभ्यंते सद्योजातेतिमंत्रेणऊ
रु मूलादिपादाग्रपर्यंतं इतिसर्वांगेषुभस्मोद्धूलनंकृत्वा
हस्तौप्रक्षाल्य द्वितीयंभागमादाय तस्माज्जालतदेतत्पा
सुपतें पाशुपाशविमोक्षाय इतिमंत्रेणएकादशवारम
भिमंत्र्य शिरसि ॐ ह्रं क्षौं हरहर ॐनमःशिवाय लला
टेब्रह्मणेनमः हृदये हव्यवाहनायनमः नाभौस्कंदा
यनमः कंठेपूष्णेनमः दक्षिणबाहुमूले रुद्रायनमः
बाहुमध्येआदित्यायनमः मणिबंधे चंद्रायनमः वा
मबाहुमूलेवामदेवायनमः बाहुमध्येप्रभंजनायनमः
मणिबंधेवसुभ्योनमः पृष्ठेहरायनमः ककुदिसंभवे
नमः ब्रह्मरंध्रेपरमात्मनेनमः इतिपुंड्रकधारणंकृ
त्वा वैदिकींसंध्यांकृत्वा तांत्रिकसंध्यांकुर्यात् अयंभ
स्मधारणविधिः ब्राह्मणानामेव अन्यैस्तुपंचाक्षरेणमू
लमंत्रेणवात्रिपुंड्रकधारणंकार्यमिति ।अथतांत्रिकसं
ध्या तत्रमूलमंत्रेणशिखांबध्वा मूलेनैवप्राणायामत्रयं
कृत्वा मूलमंत्रस्यऋष्यादिकरषडंगन्यासान्विन्यस्य स्व
पुरतोधेनमुद्रयापात्रंऽमृतीकृत्य मूलमंत्रेणएकवार

मभिमंत्र्य तज्जलविंदुभिः कुशैरकारादिक्षकारांतैरेक
पंचाशदक्षरैः जलविंदुभिः प्रत्यक्षरं स्वशिरः प्रोक्ष्य मूले
नचत्रिः प्रोक्ष्य सूर्यमंडले यथोक्तरूपं देवं ध्यात्वा दक्षिण
करेणजलमादाय वामकराग्रेणस्पृशन् लं वं रं यं हं इति
पांचभूतिकवीजैः सप्तवारमंत्र्य तज्जलं वामकरे निधाय
तद्गलितविंदुभिर्मूलमंत्रेण दक्षिणकराग्रेण स्वशिरसिभि
त्रिः प्रोक्ष्यावशिष्टं वामकरस्थं जलं वामनासासमीपं नीत्वा
तेजोमयं वामनासारंध्रेण स्वदेहांतः प्रविष्टं ध्यात्वा तेन
जलेन स्वदेहांतस्थं सकलकलुषं प्रक्षाल्य कृष्णवर्णीत
ज्जलं दक्षिणनासारंध्रेण विनिर्गतं विभाव्य दक्षिणकरेणा
दाय स्ववामभागे ज्वलद्वज्रशिलायां ॐ ह्लीं पशु हुं फट् इ
ति पाशुपतास्त्रमंत्रेण तस्यामास्फाल्य हस्तौ प्रक्षाल्य पु
नर्दक्षिणकरेण जलमादाय दक्षिणनासारंध्रेण प्रविश्य
ब्रह्मरंध्रस्थचित्चंद्रमंडलमध्यगतपीयूषवारिधौ मिलि
त्वा तन्मयेन राजदंतविवरान्तराभ्यां विनिर्गतं विभाव्य त
ज्जलं वामकरे निधाय तज्जलविंदुभिः ॐ अमृतमालि
नी स्वाहा इति मंत्रेण स्वशिरस्त्रिः प्रोक्ष्य मूलमंत्रेण स्वा
हांतेन त्रिराचम्यांजलिना जलमादायोत्थाय वक्ष्यमाणगा
यत्रीं समुच्चार्य्य श्रीभैरवदेवतेऽर्घ्यं स्वाहा इति त्रिरर्घ्यां
जलिं सूर्याभिमुखमुत्क्षिप्य मूलमुच्चार्य्य श्रीभैरवं तर्पया

भै॰ पा॰ ६

मिनमः इति त्रिः संतर्प्य प्रागवत्प्राणायामादि कृत्वा सूर्यमंड
ले देवं ध्यायन् ॐ भूताधिपाय विद्महे भवरूपाय धीमहि तन्नो
वटुः प्रचोदयात् इति वटुकभैरवगायत्रीं यथाशक्ति जपित्वा
मूलमंत्रं चाष्टोत्तरशतं जपित्वा जपं समर्प्य स्तुत्वा प्रणम्य सू
र्यमंडलाद्देवं स्वहृदि विसृज्य श्रीगुरुं प्रणमेदिति त्रिषु काले
षु तांत्रिकसंध्याविधिः ततः प्रातः संध्यानंतरं वैदिकतर्पणं
निर्वर्त्य स्वपुरतो वमिति धेनुमुद्रया जलममृतीकृत्य तत्र
सचक्रं सांगावरणं देवं ध्यात्वा मूलमंत्रमुच्चार्य श्रीभैरवं त
र्पयामि नमः इति अष्टोत्तरशतवारं तदर्धमष्टाविंशति वारं
वा देवस्य मुखकमले परमामृतबुध्या तत्तीर्थजलैः संतर्प्याव
रणदेवताश्च अमुकं तर्पयामि नमः इति संतर्प्य देवं स्वहृदि
विसृज्य तीर्थं च सृष्ट्वा विसृज्य गुरुहृदिकपातिग्रहान्प्रणम्य शु
द्धोदकपूर्णं पात्रमादाय हृदि स्वेष्टदेवतां स्मरन्मौनी स्वप
दमात्रदृष्टिः स्तोत्रादिकं पठन्स्वगृहं गच्छेत् इति श्री वच्छेल
कुलकमलप्रद्योतप्रचंडमार्तंडमहाराजकुमारजैत्रसिंहदेव
विरचिते भैरवार्चापारिजाते प्रथमस्तवकः १ ततो द्वारिस्थि
तः ॐ देव त्वं प्रकृतं चित्तं पापाक्रांतमभून्मम तन्निःसारय चि
त्तान्मे पापं फट् फट् ते नमः सूर्यः सोमो यमः कालो महाभूता
नि पंच च एते शुभाशुभस्येह कर्मणो नव साक्षिणः इति
पठित्वा हुं फडिति क्रोधदृष्ट्या पार्ष्णिहृदयमू[illegible]का

स्मनाभूत्वागृहांतःप्रविश्य अंगणेस्थित्वा पादौप्रक्षाल्या
चम्य अंगणभूमौगोमयेनलोपलिप्तायांसिंदूरादिनारचि
तवृत्तमंडलमध्येस्वासनमास्तीर्य ह्रौं आधारशक्तिकमला
सनायनमः इत्यासनंसंपूज्य ततःप्राङ्मुखोपविश्य व
क्ष्यमाणसूर्यमंत्रेणप्राणायामत्रयंकृत्वा शिरसि अजऋ
षयेनमः मुखेगायत्रीछंदसेनमः हृदयेसूर्यदेवतायैन
मः सूर्यार्घदानेविनियोगः इतिकृतांजलिर्वदेत् अंगुष्ठ
योः ह्रांहृदयायनमः तर्जन्योः ह्रींशिरसेस्वाहा मध्यम
योः ह्रूंशिखायैवषट् अनामिकयोः ह्रैंकवचायहुं क
निष्ठिकयोः ह्रौंनेत्रत्रयायवौषट् करतलयोः ह्रःअस्त्रा
यफट् इतिकरयोर्विन्यस्य पुनःएतानेवमंत्रान्हृदयशि
रः कवचेनेत्रेषुविन्यस्याऽस्त्रमंत्रेणतालत्रयंदशदिग्बंध
नंचकृत्वा रक्तांबुजासनमशेषगुणैकसिंधुंभानुंसमस्तज
गतामधिपंभजामि पद्मद्वयाभयवरान्दधतंकराब्जैर्मा
णिक्यमौलिमरुणांगरुचिंत्रिनेत्रं इतिसूर्यंतन्मंडलेसां
गावरणंध्यात्वा स्वपुरतश्चतुरस्रत्रिकोणात्मकंमंडलंकृ
त्वा श्रीसूर्यार्घाधारमंडलायनमइतिमंडलंसंपूज्य त
त्रसाधारंप्रस्थजलग्राहिताम्रपात्रंनिधाय सूर्यमंत्रेणशु
द्धोदकेनापूर्य तिलतवसर्षपश्यामाकतंडुलकुशाग्रगंधो
दनरक्तपुष्पाणिरक्तचंदनंचनिक्षिप्य कुशैराच्छाद्य तत्पा
त्रंकराभ्यामाच्छादयन् सूर्यमंत्रमष्टोत्तरशतवारंजपित्वा

भै॰पा॰ ८

7

जानुभ्यामवनिंगतस्तत्पात्रंकराभ्यामामस्तक मुद्धृत्य पूर्वोक्त
रूपंसूर्यंनिजेष्टदेवताभेदेनध्यायन् ह्रांह्रींसः ग्रहराशिन
क्षत्रयोगकरणपरिवृतासनसंस्थितश्रीसूर्यएषतेऽर्घ्यः स्वा
हा इतिसूर्यायार्घंदत्वा सूर्यमंत्रंयथाशक्तिजपित्वा सूर्यंस्तु
त्वा प्रणम्य पूजामंडपद्वारंगत्वा तत्रवक्ष्यमाणविधिनासा
मान्यार्घंसंस्थाप्य तदशक्तौताम्रादिपात्रस्थंजलधेनुमुद्रयाऽ
मृतीकृत्य तेनजलेनवापूजामंडपस्यद्वारंप्रोक्ष्य द्वारस्योर्द्ध
शाखायांमध्ये ॐविघ्नायनमः तद्दक्षिणेमहालक्ष्म्यैनमः वा
मेसरस्वत्यैनमः पुनर्मध्येद्वारश्रियैनमः द्वारस्यवामदक्षिण
शाखयोः गणपतयेनमः क्षेत्रपालायनमः शंखनिधिवसु
धाराभ्यांनमः पद्मनिधिवसुमतीभ्यांनमः गंगायैनमः यमुना
यैनमः धात्रेनमः विधात्रेनमः इतिद्वंद्वक्रमेणसंपूज्य अ
धः देहल्यैनमः तस्याः वामदक्षिणपार्श्वयोः नंदिनेनमः म
हाकालायनमः इतिद्वारपालौसंपूज्य दक्षिणद्वारंगत्वा तद्वा
रंपुनाभ्युक्ष्य प्राग्वद्विघ्नादिदेहल्यंतंप्रोक्तक्रमेणसंपूज्य द्वा
रपार्श्वयोः गणेशायनमः वृषभायनमः इतिद्वारपालौसं
पूज्य पश्चिमद्वारंगत्वा तथैवाभ्युक्ष्य विघ्नादिदेहल्यंतमभ्य
र्च्य द्वारपार्श्वयोः भृंगिरिटिनेनमः स्कंदायनमः इतिद्वा
रपालौसंपूज्य उत्तरद्वारंगत्वा तथैवार्घांबुभिरभ्युक्ष्य वि
घ्नादिदेहल्यंतमभ्यर्च्य द्वारपार्श्वयो उमायैनमः चंडेश्वराय
नमः इतिद्वारपालौसंपूज्य पुनःपूर्वद्वारंगत्वा अस्त्रमंत्रेण

तालत्रयपूर्वकं द्वारमुत्पाट्य सर्षपाक्षतकुसुमान्यादाय
ह्रूः वः अस्त्राय फडित्यनेनास्त्रमंत्रेण सप्तधाभिमंत्र्य अपक्रा
मंतु भूतानि पिशाचाः प्रेतगुह्यकाः ये चात्र निवसंत्यन्ये देव
ता भुवि संस्थिताः १ अपसर्पंतु ते भूता ये भूता भुवि संस्थिताः
ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया इत्यनेन ह्रूः वः अस्त्रा
य फडित्यस्त्रमंत्रं जपन् नाराचमुद्रया मंडपांतः प्रक्षिप्य त
स्मान्निर्गच्छतां विघ्नसंघातां स्वमार्गसंकोचेन मार्गं दत्वा ह्रूः वः
अस्त्राय फडित्यस्त्रमंत्रं स्मरन् वामपार्ष्णिनाघातत्रयेण भौमा
न् ऊर्ध्वोर्ध्वतालत्रयेणांतरिक्षागान् तीक्ष्णदृष्ट्यावलोकनेन
दिव्यान् विघ्नानुत्सार्य दक्षिणपादपुरःसरं देहलीमुल्लंघ्य
वाससा द्वारमाच्छाद्य पंचगव्यार्घतोयाभ्यां घंटावादनपूर्व
कं मंडपाभ्यंतरं प्रोक्ष्य मंडपस्य नैरृत्यकोणे वास्तुपुरुषा
य नमः तत्रैव वास्त्वधीशाय ब्रह्मणे नमः इति संपूज्य
मंडपस्यैशानकोणे रक्तवर्णाय द्वादशशक्तिसहिताय श्री
दीपनाथाय नमः इति दीपनाथं संपूज्य अतितीक्ष्णमहा
काय कल्पांतदहनोपमः भैरवाय नमस्तुभ्यं ममाज्ञां दा
तुमर्हसि इति भैरवाज्ञां गृहीत्वा अः फट् इति मंडपमध्य
स्थां पूजां वेदीं गत्वा तत्र स्वासनस्थानं मूलमंत्रेण वीक्ष्य ह्रूः
वः अस्त्राय फडित्यस्त्रमंत्रेण प्रोक्ष्य अनेनैव मंत्रेण कुशै
स्त्रिः संताड्य ह्रूं वैं कवचाय हुं इति कवचमंत्रेणाभ्युक्ष्य त
त्रैवैलाजिनकुशोत्तरं हस्तमात्रं चतुरस्रं चतुरंगुलोच्छ्रितं स्वा

स्नानमासनमास्तीर्य्य मूलमंत्रेण द्वादशधाभिमंत्रितजले
नाभ्युक्ष्य शिरसिमेरुपृष्ठऋषयेनमः मुखेसुतलंछंदसे
नमः हृदयेकूर्मीयदेवतायैनमः आसनेविनियोगइति
कृतांजलिर्वदेदिति ऋष्यादिकंविन्यस्य ॐपृथ्वीत्वयाधृ
तालोकादेवित्वंविष्णुनाधृता त्वंचधारयमांनित्यंपवित्रं
कुरुचासनं इत्यासनमंत्र ह्रींआधारशक्तिकमलासना
यनमः इत्यासनेसंपूज्य तत्रप्राङ्मुखोदङ्मुखोवापद्मस्व
स्तिकवीरसिद्धान्यतमेनासनेनोपविश्य आसनस्यस्व
दक्षिणाग्रकोणादिचतुष्कोणेषु प्रादक्षिण्येन ॐगंगण
पतयेनमः दुंदुर्गायैनमः संसरस्वत्यैनमः क्षंक्षेत्रपा
लायनमः इतिसंपूज्य गंधपुष्पाक्षतादीनिपूजाद्रव्या
णिस्वदक्षिणभागेनिधाय ह्रांह्रं फडितिदिव्यदृष्ट्याविलो
क्य कर्पूरादिसुवासितांशुद्धोदकपूर्णांवामभागस्थेकुंभे
आंइतिवामपाणिनास्पृशन् दक्षिणकरांगुल्यग्रेणऽऽ
ह्रौंइतिकुंभस्थंजलंसंस्पृश्य रंइतिदीपशिखांस्पृष्ट्वा क
रंप्रक्षाल्य कृतांजलिर्वामेगुरुभ्योनमः दक्षिणेगणपत
येनमः अग्रेवटुकभैरवायनमः इतिप्रणम्य चंदनस्
गंधपुष्पाणि ह्रः वः अस्त्रमंत्रेणमर्दयित्वा करौसुरभी
कृत्य तत्पुष्पंवामकरेणस्वमूर्द्धानंपरितोभ्रामयित्वाघ्रा
य ॐतेसर्वेविलयंयांतुयेमांहिंसंतिहिंसकाः मृत्युरोग
भयक्लेशाःपतंतुरिपुमस्तके इतिपठित्वा ह्रः वः अस्त्रा

यफडित्यास्त्रमंत्रेण नाराचमुद्रयैशान्यां दिशिहृद्रे प्रक्षिप्य ।
हुं: व: अस्त्राय फडित्यस्त्रमंत्रेण पुनः करावन्योन्यमार्जनेन सं
शोध्यानेनैवास्त्रमंत्रेणोर्ध्वं तालत्रयं मंगुष्ठतर्ज्जन्युत्थशब्देन
दशदिग्बंधनं च कृत्वा हुं: व: अस्त्राय फडित्यस्त्रमंत्रेण त्रिशूल
मुद्रामुद्रितौ व्यस्तहस्तौ मणिबंधेनान्योन्यं संघट्टितौ करौ स्वमू
र्द्धानं परितः प्रादक्षिण्येन त्रिर्भ्रामयित्वा नऽग्निप्राकारत्रयं वि
धाय तन्मध्यगतमात्मानं संपूर्चिंत्य वक्ष्यमाणविधिनामू
लमंत्रेण प्राणायामत्रयं कृत्वा भूतशुद्धिं कुर्यात् पादादिं
जानुपर्यंतं पृथ्वीस्थानं चतुरस्रं वज्रलांछितं पीतवर्णं ब्रह्म
दैवतं निवृत्तिकलाधिष्ठितं लंवीजयुक्तं ध्यात्वा जान्वादिना
भिपर्यंतं अपास्थानं अर्द्धचंद्राकारं शुक्लवर्णं गहद्ये पिपद्म
लांछितं विष्णुदैवतं प्रतिष्ठाकलाधिष्ठितं वीजयुक्तं ध्यात्वा ना
भ्यादिकंठपर्यंतं वह्निस्थानं स्वस्तिकोपेतं त्रिकोणाकारं र
क्तवर्णं रुद्रदैवतं विद्याकलाधिष्ठितं वीजयुक्तं ध्यात्वा कं
ठादिभ्रूमध्यपर्यंतं वायुस्थानं षट्कोणाकारं षड्बिंदुलांछितं
वृत्तवेष्टितं कृष्णवर्णमीश्वरदैवतं शांतिकलाधिष्ठितं यंवी
जयुक्तं विचिंत्य भ्रूमध्यादिब्रह्मरंध्रांतमाकाशस्थानं वृत्ता
कारं ध्वजलांछितं धूम्रवर्णं सदाशिवदैवतं शांत्यतीतकला
धिष्ठितं हंवीजयुक्तं ध्यात्वा तत्र पंचभूतमये देहे धर्मकंद
समुद्भूतं ज्ञाननालकमैश्वर्याष्टदलोपेतं परं वैराग्यक
र्णिकं स्वहृदयारविंदं विभाव्य तत्कर्णिकायां जीवात्मानं

माराग्रमात्रं प्रदीपकलिकाभासुरमनादिमलसंछन्नप
रचिद्रूपं संचिंत्य प्रागुक्तरूपेण मूलाधारात्कुंडलिनीमु
त्थाय सुषुमणावर्त्मना मूलाधाराद्यनाहतांतं तच्चक्रगत
वर्णवर्णाधिदेवताग्रसंतीं हृदयकमलमानीय तया कव
लीकृतं जीवात्मानं ध्यायन् सुषुमणावर्त्मना विशुद्ध्यादि
चक्रस्थवर्णवर्णाधिदेवताग्रसंती ब्रह्मरंध्रं नीत्वा तत्रस्थि
तसहस्रदलकमलकर्णिकामध्यवर्तिनि परमात्मज्योति
षि स्ववर्णीवर्णदेवता कदंबकं जीवात्मानं संयोज्य कुंडलि
नीं स्वस्थानमानीय तत्त्वसंहारं कुर्यात् तत्र पृथिवीस्था
ने शदेहेंद्रियगमनक्रियागंतव्यगंधघ्राणपृथिवब्रह्मनिवृ
त्तिसमानवायून्संपूर्य स्मृत्य ॐ ह्लां ब्रह्मणे पृथिव्याधिपत
ये निवृत्तिकालात्मने हुं फट् स्वाहा इति मंत्रेण तान्सर्वा
न्कुंडलिनीद्वारा अपां मध्ये संहरेत् ततोपांस्थाने हस्तादा
नं दातव्यरसरसनाजलविष्णुप्रतिष्ठोदानान्संचिंत्य ॐ
ह्रीं विष्णवे जलाधिपतये प्रतिष्ठाकलात्मने हुं फट् स्वाहा
इति तान्सर्वान्कुंडलिनीद्वारा ब्रह्मतत्त्वे संहरेत् ततो वह्निस्था
ने पायूविसर्गविसर्जनीयरूपचक्षुर्वह्निरुद्रविद्याव्यानान्सं
स्मृत्य ॐ ह्रूं रुद्राय तेजोधिपतये विद्याकलात्मने हुं फ
ट् स्वाहा इति मंत्रेण तान्सर्वान्वायुमंडले संहरेत् ततो वा
युस्थाने उपस्थानंतत्तद्विषयस्पर्शस्प्रष्टव्यवायीश्वरशांत्य
यानान्संस्मृत्य ॐ ह्रैं ईश्वराय वाय्वधिपतये शांतिकला

त्मने हूं फट् स्वाहा इति तान्सर्वानाकाशस्थाने संहरेत् तत
श्चाकाशस्थाने वाग्वदन वक्तव्य शब्द श्रोत्राकाश सदाशिव शान्त्य
तीत प्राणान्संस्मृत्य ओं ह्रौं सदाशिवायाकाशाधिपतये शान्त्य
तीत कलात्मने हूं फट् स्वाहा इति तान्सर्वान्कुंडलिन्यां सं
हृत्य तान्बिंदुशक्तौ बिंदुशक्तिं नादशक्तौ नादशक्तिं परशक्तौ
प्रणवेन संहृत्य ओं ह्रीं हूं फट् स्वाहा इति तां परशक्तिं पूर्वो
क्त परमात्मनि संयोज्य केवलशरीरे वामकुक्षौ पापपुरुषं
चिंतयेत् तद्यथा वामकुक्षिस्थितं पापपुरुषं कज्जलप्र
भं ब्रह्महत्याशिरस्कं स्वर्णस्तेयभुजद्वयं सुरापान
हृदायुक्तं गुरुतल्पकटिद्वयं तत्संसर्गिपदद्वंद्वमंगप्रत्यं
गपातकं उपपातकरोमाणं रक्तश्मश्रुविलोचनं खड्ग
चर्मधरं क्रुद्धं कुक्षौ पापं विचिंत्य येत् इति पापपुरुषं संचिं
त्य वामनासारंध्रेण वायुमापूर्य्य नाभिस्थ षट्कोणाकारे
वायुमंडले संयोज्य तत्र यमिति वायुबीजं कृष्णवर्णं संचिं
त्य कुंभकेन यं बीजमावर्त्तयेत् तदुद्भूतेन प्रचंडवायु
ना सपापपुरुषं स्वदेहं संशोष्य तं वायुं दक्षिणनासया वि
रेच्य पुनर्दक्षिणनासया वायुमापूर्य्य मूलाधारे संयो
ज्य तत्रस्थ वह्निमंडले रमिति वह्निबीजं रक्तवर्णं विचिं
त्य कुंभकेन रमिति बीजमावर्त्तयंस्तदुत्थितेन महावह्नि
ना सपापपुरुषं स्वदेहं संदह्य पापपुरुषभस्मना सह तं वा
युं वामनासया विरेच्य पुनर्वामनासया वायुमापूर्य्य ॥

भै॰पा॰ मूलाधारस्थविंदुमध्ये मायावीजं स्फुरच्छालार्कवर्णं सं
५ चिंत्य कुंभकेन मायावीजमावर्त्तयन् तेन करचरणाद्य
वयवसमेतं स्वदेहं निष्पन्नं विभाव्य तं वायुं वामनासया
विरेचयेदिति स्थूलशरीरं निष्पाद्य सूक्ष्मशरीरं निष्पादयेत्
तद्यथा तत्र पूर्वोक्तसहस्रारकमलस्थपरमात्मनः स
काशात्स्वस्थानमानीय ततो नादशक्तिं ततो विंदुशक्तिं प्र
णवेन सृष्ट्वा विंदुशक्तेः सकाशात्सकलजगत्सृष्टिहेतुभू
तां कुंडलीनीं प्रणवेन निःसार्य ततः ॐ ह्रौं सदाशिवा
याकाशाधिपतये शांत्यतीतकलात्मने नमः इति प्राण
सांत्यतीतसदाशिवाकाशश्रोत्रशब्दवक्तव्यवदनवाचश्चा
काशस्थाने स्थापयेत् ततश्चाकाशमंडलात् ॐ ह्रैं ई
श्वराय वाय्वधिपतये शांतिकलात्मने नमः इति मंत्रेणापा
नशांतिश्वरवायुत्वक्स्पर्शव्यवस्पर्शं तद्विषयानंदीपस्थान्वा
युस्थाने स्थापयेत् ततो वायुमंडलात् ॐ ह्रूं रुद्राय तेजो
धिपतये विद्याकलात्मने नमः इति मंत्रेण व्यानविद्यारुद्र
तेजश्चक्षुरूपविसर्जनीयसर्गीपायून्नग्निस्थापयेत् ततो
ग्निमंडलात् ॐ ह्रीं विष्णवे जलाधिपतये प्रतिष्ठाकलात्म
ने नमः इति मंत्रेणोदानप्रतिष्ठाविष्णुजललरसनारसदात
व्यादानहस्तानपांस्थाने स्थापयेत् ततो जलमंडलात् ॐ
ह्रां ब्रह्मणे पृथिव्यधिपतये निवृत्तिकलात्मने नमः इति
मंत्रेण समाननिवृत्तिब्रह्मपृथिवीघ्राणगतिव्यगमनक्रि

यापादेंद्रियाणिपृथिवीस्थानेस्थापयेत् प्रणवेनकुं
डलिनींस्वमंत्रेणरंध्रस्थपरमात्मनः सकाशात्कुंडलि
न्याजीवात्मानंसंहृत्तवर्णवर्णाधिदेवतासहितमाज्ञादिच
क्रेषुतद्वर्णवर्णाधिदेवताः स्थापयन्हृदयकमलमानी
य हृदयकमलेजीवात्मानंस्थापयित्वा कुंडलिनींसुषु
म्णामार्गेणमणिपूरकादिचक्रेषुतत्तद्वर्णाधिदेवताः स्था
पयन्मूलाधारंनीत्वा तत्रतांस्थापयेत् ततः स्वशरीरंनि
रस्तसकलकलुषंतेजोरूपंदेवताराधनेयोग्यंविभाव्य
प्राणप्रतिष्ठांकुर्यात् अत्रभूतशुद्धिविहीनेनकृतापूजा
भिचारवत् विपरीतफलंदद्यादभक्त्यापूजनंयथेति कुं
भसंभववचनादावश्यकीयमिति अथप्राणप्रतिष्ठासा
यथा शिरसिब्रह्मविष्णुशिवेभ्योऋषिभ्योनमः मुखेऋ
ग्यजुःसामेभ्यःछंदोभ्योनमः हृदयेपराप्राणशक्त्यैदेवता
यैनमः ममप्राणप्रतिष्ठार्थेविनियोगः इतिकृतांजलिं
वदेत् ततः ॐआंह्रींओंक्रौंअंकंखंगंघंङं आकाशवाय्व
ग्निसलिलपृथिव्यात्मनेआंहृदयायनमः आंह्रींक्रौंइंचं
४ शब्दस्पर्शरूपरसगंधात्मनेईंशिरसेस्वाहा ॐआंह्रींक्रौं
उंटं ४ श्रोत्रचक्षुर्जिह्वाघ्राणात्मनेऊंशिखायैवषट् ॐआं
ह्रींक्रौंओंपं ४ वचनादानविसर्गगमनानंदात्मनेऐंनेत्रत्र
यायवौषट् ॐआंह्रींक्रौंअंयं ४ मनोबुध्याहंकारचित्ता(

त्मने अः अस्त्राय फट् इति मंत्रेण अंगुष्ठादितलांतं विन्य
स्य हृदयादिषडङ्गेषु विन्यसेत् ततो ध्यानं रक्ताब्धिपोता
रुणपद्मसंस्थां पाशांकुशाविक्षुरसाशवाणान् शूलं कपा
लं दधतीं कराब्जैः रक्तां त्रिनेत्रां प्रणमामि देवीं वामादूर्ध्वे
पोराद्येः तदाद्यपस्य योरन्ये तदाद्यस्य योरपरे इत्याद्युधेध्या
नं इति ध्यात्वा हृदि हस्तं निधाय ॐ आँ ह्रीँ क्रौँ यँ रँ लँ वँ शँ
षँ हँ सँ हँ सः सोहं मम प्राण इह प्राण आमित्यादि मम जीव
इह स्थितः आमित्यादि मम जीव इह स्थितः आमित्यादि म
म सर्वेंद्रियाणि आमित्यादि मम वाङ्मनः चक्षुश्रोत्रघ्राण
प्राण इहागत्य चिरं सुखं तिष्ठंतु स्वाहा ॐ इति प्राणप्रतिष्ठा
मंत्रं त्रिर्जपित्वा निजवपुर्ज्योतिर्मयं ध्यायेदिति प्राणप्रतिष्ठा
विधिः ॥ इति श्रीवघेलकुलकमलप्रद्योतप्रचंडमार्त्तंड॰
महाराजकुमार श्रीजैत्रसिंहदेवविरचिते श्रीभैरवार्चापारि
जाते द्वितीयस्तवकः २ ॥ ॥ अथ मातृन्यासः तत्र
शिरसि ब्रह्मणे ऋषये नमः मुखे गायत्री छंदसे नमः हृद
ये श्रीमातृकासरस्वतीदेवतायै नमः गुह्ये हल्भ्यो वीजाय
नमः पादयोः स्वरेभ्यः शक्तिभ्यो नमः नाभौ क्षकाराय का
लकाय नमः इति विन्यस्य मातृकान्यासे विनियोग इति कृ
तांजलिर्वदेत् ततः अङ्गुष्ठयोः अँ कँ खँ गँ घँ ङँ आँ हृदयाय
नमः तर्जन्योः इँ चँ छँ जँ झँ ञँ ईँ शिरसे स्वाहा मध्यमयोः।

उँ टँ ठँ डँ ढँ णँ ऊँ शिखायै वषट् अनामिकयोः हँ तँ थँ दँ धँ नँ।
हैं कवचाय हुं कनिष्ठिकयोः औं पं फं बं भं मों नेत्रत्रयाय वौष
ट् करतलयोः अं यं रं लं वं शं षं सं हं लं क्षं अः अस्त्राय फट् इति
करयोर्विन्यस्यैतानेवमंत्रान् हृदयशिरः शिखा कवचनेत्रेषु
विन्यस्यास्त्रमंत्रेण तालत्रयं दत्वा दशदिग्बंधनं च कृत्वा व्यो
मेन्द्वीरसनाणीकर्णिकमचाद्यं द्वौ स्फुरत्के सरंपत्रान्तरगतयं
चवर्गं यशलानीदित्रिवर्गक्रमात् आसास्वप्रिष्ठुलां तलां तलां
गलियुजान्तो णो स्वरेण वृतं वर्णाब्जं शिरसि स्थितं विषगद
प्रध्वंसि मृत्युंजयं इति ब्रह्मरंध्रे वर्णारविंदं ध्यात्वा मूलाधारं ध
निकृत्वा प्रबुद्धा शक्तिः कुंडलि ज्वलत्पावकसंकाशा सूक्ष्मतेज
स्स्वरूपिणी मूलाधारास्थिरः पद्मं स्पृशंती विष्कृताकृतिः त
यासृष्टिं शिरं पद्माद मृतौघस्वरूपिणी निर्जितान्मातृकाव
र्णान्सुषुम्णावर्त्मना तनुं व्यापयित्वा स्थितान्सर्वामेवं ध्या
त्वा प्रविन्यसेत् इति सूक्ष्मरूपां वर्णतनुं ध्यात्वा कंठे विशु
द्धिचक्रे षोडशदलकमलमूर्द्ध्वमुखं ध्यात्वा तद्दलेषु पूर्वादि
प्रादक्षिण्येन ॐ अं नमः ॐ आं नमः ॐ इं नमः ॐ ईं नमः
ॐ उं नमः ॐ ऊं नमः ॐ ऋं नमः ॐ ॠं नमः ॐ ऌं नमः ॐ
ॡं नमः ॐ एं नमः ॐ ऐं नमः ॐ ओं नमः ॐ औं नमः ॐ
अं नमः ॐ अः नमः इति विन्यस्य हृदये अनाहतचक्रे द्वा
दशदलकमलं ध्यात्वा तद्दलेषु पूर्वादिप्रादक्षिण्येन ॐ कं

नमः ॐ खँ नमः ॐ गँ नमः ॐ घँ नमः ॐ ङँ नमः ॐ चँ न
मः ॐ छँ नमः ॐ जँ नमः ॐ झँ नमः ॐ ञँ नमः ॐ टँ नमः
ॐ ठँ नमः ॐ डँ ततो नाभिमंडले दशदलकमलं मणिपूरक
चक्रं प्राग्वद्ध्यात्वा तद्दलेषु पूर्वादिप्रादक्षिण्येन ॐ डँ नमः ॐ
ढँ नमः ॐ णँ नमः ॐ तँ नमः ॐ थँ नमः ॐ दँ नमः ॐ धँ नमः
ॐ नँ नमः ॐ पँ नमः ॐ फँ नमः इति विन्यस्य लिंगमूले स्वा।
धिष्ठानमिं चक्रे षट्दलकमलं ध्यात्वा तद्दलेषु प्रादक्षिण्ये
न ॐ बँ नमः ॐ भँ नमः ॐ मँ नमः ॐ यँ नमः ॐ रँ नमः ॐ
लँ नमः ततो मूलाधारचक्रं चतुर्दलकमलं गुदमेढ्रान्तरे ध्या
त्वा तद्दलेषु प्रादक्षिण्येन ॐ वँ नमः ॐ शँ नमः ॐ षँ नमः
ॐ सँ नमः ततो भ्रूमध्ये आज्ञाचक्रं द्विदलकमलं ध्यात्वा तद्दल
योः ॐ हँ नमः ॐ क्षँ नमः इत्यंतमातृकां विन्यस्य बहिर्मा
तृकांन्यासं कुर्यात् ततो ध्यानम् पंचाशद्वर्णभेदैर्विहित
वदनदोःपादयुक्कुक्षिवक्षो देशां भास्वत्कपर्दीकलितशशि
कलामिंदुकुंदावदातां अक्षस्रक्कुंभचिंतालिखितवरकरां त्र्य
क्षणां पद्मसंस्थां माकल्पामतुच्छस्तनजघनभरां भारतीं
तां नमामि दक्षिणोर्ध्वकरयोराद्येतदाद्यधःकरयोरंत्ये इत्या
द्युपध्यानम् इति पूर्वोक्ते ब्रह्मरंध्रस्थवर्णारविंदे मातृका
सरस्वतीं ध्यात्वा शिरसि अँ नमः मुखवृत्ते आँ नमः दक्षनेत्रे
इँ नमः वामनेत्रे ईँ नमः दक्षकर्णे उँ नमः वामकर्णे ऊँ नमः

दक्षिणनासिके ऋँ नमः वामनासिके ॠँ नमः दक्षगण्डे लृँ नमः
वामे ॡँ नमः ऊर्ध्वोष्ठे एँ नमः अधरे ऐँ नमः ऊर्ध्वदंते ओँ
नमः अधोदंते औँ नमः तालुके अँ नमः जिह्वाग्रे अः नमः
दक्षबाहुमूले कं नमः मध्ये खं नमः मणिबंधे गं नमः अं
गुलिमूले घं नमः अंगुल्यग्रे ङं नमः वामबाहुमूले चं न
मः मध्ये छं नमः मणिबंधे जं नमः अंगुलिमूले झं नमः
अंगुल्यग्रे ञं नमः दक्षोरुमूले टं नमः जानुनी ठं नमः गु
ल्फे डं नमः अंगुलिमूले ढं नमः अंगुल्यग्रे णं नमः वामो
रुमूले तं नमः जानुनी थं नमः गुल्फे दं नमः अंगुलिमूले
धं नमः अंगुल्यग्रे नं नमः दक्षिणपार्श्वे पं नमः वामे फं न
मः पृष्ठे बं नमः नाभौ भं नमः जठरे मं नमः हृदये यं नमः
दक्षांशे रं नमः ककुदि लं नमः वामांशे वं नमः हृदया
दि दक्षिणकराग्रपर्यंतं शं नमः हृदयादिवामकराग्रपर्यं।
तं षं नमः हृदयादिदक्षपादपर्यंतं सं नमः हृदयादिवामपा
दपर्यंतं हं नमः हृदयादिनाभ्यंतं ळं नमः हृदयादिमूर्द्धां
तं क्षं नमः इति केवलमातृकान्यासः ॥ अथ केवलेपि
बिंदुयुक्तं त्वमक्षराणां बीजयोगजनार्थमिति संप्रदायः अ
थ बिंदुमातृकान्यासः तत्र ऋष्यादि करषडंगन्यासास्तु प्रा
गुक्ताः एवं ध्यानं तत्र अक्षस्रजं हरिणयोतमुदग्रटंकं विद्यां
करैरविरतं दधतीं त्रिनेत्रां अर्द्धेंदुमौलिमरुणामरविंद।

वासांवर्णेश्वरींप्रणमत्स्तनभारनम्रां दक्षाद्यधः करयोराद्ये
तदायूर्द्धयोरंत्ये इतिवर्णेश्वरिंदेध्यात्वा मूर्द्धादिहृदयांतं
क्षंनमः वामपादाग्रादिहृदयांतंहंनमः दक्षिणपादाग्रा
दिहृदयांतंसंनमः इत्यादि शिरसि अंनमः इत्यंतंसंहारक्र
मेणयस्यवर्णस्ययत्स्थानंतत्रतत्रदक्षांर्न्यसेत् ॥ अथवि
सर्गमातृकान्यासः तत्रऋष्यादिध्यानांतंकेवलमातृका
कान्यासक्रमेव अःनमः आःनमः इत्यादिविसर्गांता
न्वर्णान्केवलमातृकान्यासस्थानेष्वेवऽन्यसेत् ॥इतिवि
सर्गमातृकान्यासः अथविंदुविसर्गमातृकायुक्तस्थि
तिमातृकान्यासः तत्रऋष्यादिकरषडंगन्यासास्तुकेवल
मातृकान्यासवत् ध्यानंसिंदूरकांतममिताभरणांत्रिनेत्रं
विद्याक्षसूत्रमृगपोतवरंदधानं पार्श्वस्थितांभगवतीं म
यिकांचनाभांध्यायेत्कराब्जधृतपुस्तकवर्णमालां वामा
द्यधः करयोराद्येतदायूर्द्धयोरंत्योदेव्यास्तुवामदक्षिण
करयोः पुस्तकवर्णमाले इतिवर्णेश्वरिंदेध्यात्वा दक्षि
णगुल्फेडंनमः अंगुलीमूलेठंनमः अंगुल्यग्रेणंनमः
नखवृत्तेअंनमः इत्यादिदक्षिणजानुनिठंनमः इत्यंतं
विंदुविसर्गयुक्तान्वर्णान्केवलमातृकान्यासस्थानेष्वेवन्य
सेत् । इतिस्थितिमातृकान्यासः । अथतारस्यैकपंचाश
त्कलामातृकान्यासः तत्रापिशिरसिप्रजापतयेऋषयेनमः

मुखेगायत्रीछंदसेनमः हृदयेकलारूपिणीमातृकासर।
स्वतीदेवतायेनमः न्यासेविनियोगः इतिकृतांजलिर्वदेत्
अंगुष्ठयोः अंऊंआं हृदयायनमः तर्जन्योः इंउंईशिरसेस्वा
हा मध्यमयोः ऊँऊँऊंशिखायैवषट् एंओंऐंकवचायहुं
अंऊंऔंनेत्रत्रयायवौषट् अंउंअः अस्त्रायफट् इतिकरांग
न्यासः ततोध्यानम् हस्तैःपद्मंरथांगंगुणमथहरिणंपु
स्तकंवर्णमालां टंकंसुधंकपालंदरममृतलसद्धेमकुंभं
वहंती मुक्ताविद्युत्पयोदऽऽस्फुरकनकजपावंद्धकैः पंचव
क्त्रैः त्र्यक्षैर्वक्त्रोजनम्रां सकलशशिनिभांशारदांतांनमामि वा
माद्यधःकरयोराद्येतदाद्यूर्द्धयोरन्येतदाद्यूर्द्धयोरित्याद्युध
ध्यानं ॥इतिचरणारविंदेध्यात्वाविन्यसेत् तद्यथा ऊंअंनि
वृत्यैनमः ऊंआंप्रतिष्ठायैनमः ऊंइंविद्यायैनमः ऊंईशां
त्यैनमः ऊंउंइंधिकायैनमः ऊंऊंदीपिकायैनमः ऊंऋंरे
चकायैनमः ऊंॠंमोचकायैनमः ऊंऌंपरायैनमः ऊंॡं
सूक्ष्मायैनमः ऊंएंसूक्ष्मामृतायैनमः ऊंऐंज्ञानामृतायैन
नमः ऊंओंआप्यायिन्यैनमः ऊंऔंव्यापिन्यैनमः ऊंअंव्यो
मरूपिण्यैनमः ऊंअःअनंतायैनमः ऊंकंसृष्ट्यैनमः ऊं
खंऋद्ध्यैनमः गंस्मृत्यै· घंमेधायै· ङंकान्त्यैनमः चंलक्ष्म्यै·
जंस्थिरायै· झंस्थित्यै· ञंसिध्यै· [redacted]
टंनमः टंजरायै· ठंपालिन्यै· डंशांत्यै· ढंऐश्वर्य्यायैनमः

भै॰ पा॰
१६

णं रत्यै॰ तं कामिन्यै कायै॰ थं वरदायै॰ दं ह्लादिन्यै॰ धं प्रीत्यै॰ नं दीर्घायै॰ पं तीक्ष्णायै॰ फं रौद्र्यै॰ वं भयायै॰ भं निद्रायै॰ मं तंद्रायै॰ यं क्षुधायै रं क्रोधिन्यै॰ लं क्रियायै॰ वं उल्कायै॰ शं मृत्युरूपायै॰ षं पीतायै॰ सं श्वेतायै॰ हं अरुणायै॰ लं असितायै॰ क्षं अनंतायै॰ सुद्धमातृकास्थानेषु न्यसेत् इति कलामातृकान्यासः ॥

अत्र नादात्मनः सदाशिवात्संभूताः स्वरकलास्वेताऽक्षस्रक्पुस्तकपाशकपालकरा ध्येयाः कचवर्गकला अकाराद्ब्रह्मणोद्भूताः पीताः अक्षस्रक्पंकजाभयकमंडलुकरा ध्येयाः टतवर्गजाः उकाराद्विष्णोरुत्पन्नाः श्यामा अभयशंखचक्रवरहस्ता ध्येया पयवर्गजाः मऽकाराद्रुद्रादुत्पन्नाः शरच्चंद्रनिभाः अभयशूलकपालावरहस्ता ध्येया षादिपंचवर्णजा ईश्वराद्बिंदोरुत्पन्ना रक्ता अभयहरिणटंकवरहस्ता ध्येया ॥ इति तारोत्थाकलामातृकान्यासः अथ केशवादिमातृकान्यासः तत्र साध्यनारायणऋषिः गायत्रीछंदः श्रीलक्ष्मीनारायणो देवता न्यासे विनियोगः इति ऋष्यादिकं स्मृत्वा मूर्द्धादिषु प्राग्वच्चतुर्थ्या नमोंतेन विन्यस्य अंकंखंगंघंङं आं क्लां हृदयाय नमः इंचंछंजंझंञं ईं क्लीं शिरसे स्वाहा उंटंठंडंढंणं ऊं क्लूं शिखायै वषट् ऐं तंथंदंधंनं ऐं क्लैं कवचाय हुं ओं पंफंबंभंमं औं क्लौं नेत्रत्रयाय वौषट् अंयंरंलंवंशंषंसंहंलंक्षं अः अस्त्राय फट् इति मंत्रैः प्राग्वत्करषडंगन्यासं कृत्वा विया

रविंदमकरोमृतकुंभपद्मकौमोदकीदरसुदर्शनऽऽशोभिहा।
स्तं सौदामिनीसुदिरकांतिविभातिलक्ष्मीनारायणात्मकमखं
डितमात्ममूर्त्तेः वपुरितिशेषः वामाध्वधःकरयोराषेतदाघूर्ध
योरन्येतदाघूर्धयोरपरेतदाघूयोरितरेइतिध्यात्वाऽक्लींअंके
शवायकान्त्यैनमः क्लींआंनारायणाकीर्त्यैनमः क्लींइंमाधवाय
तुष्ट्यैनमः क्लींईंगोविंदायेपुष्ट्यैनमः उंविष्णवेधृत्यै· ऊंमधु
सूदनायशांत्यै· ऋंत्रिविक्रमायक्रियायैनमः ॠंवामनायद
यायै· लृंश्रीधरायमेधायै· ॡंहृषीकेशायहर्षायै· एंप
द्मनाभायश्रद्धायै· ऐंदामोदरायलज्जायै· ओंवासुदेवायल
क्ष्म्यै· औंसंकर्षणायसरस्वत्यै· अंप्रद्युम्नायप्रीत्यै· अः अनि
रुद्धायरत्यै· कंचक्रिणेजयायै· खंगदिनेदुर्गायै· गंशार्ङ्गिणे
प्रभायै· घंखड्गिनेसत्यायै· ङंशंखिनेचंडायै॰ चंहलिनेवाण्यै·
छंमुसलिनेविलासिन्यै· जंशूलिनेविजयायै· झंपाशिनाविर
जायै· ञंअंकुशानेविश्वायैनमः टंमुकुंदायैविनदायै· ठंनंदजा
यसुनंदायै· डंनंदिनेस्मृत्यै· ढंनारायणायऋद्ध्यै· णंनरक
जितेसमृद्ध्यै· थंकृष्णायमुक्त्यै· दंसत्यायवुद्ध्यै· धंसात्वताय
मत्यै· नंशौरयेक्षमायै· पंशूरायरमायै· फंजनार्दनायउमायै
बंभूधरायक्लेदिन्यै· भंविश्वमूर्त्तयेक्लिन्नायै मंवैकुंठायवसु
दायैनमः यंत्वगात्मनेपुरुषोत्तमायवसुधायै· रंअसृगा
त्मनेवलिनेपरायै· लंमांसात्मनेवलानुजायपरायणायै·
वंमेदात्मनेवालायसूक्ष्मायै· शंअस्थ्यात्मनेवृषघ्नायसंध्यायै·

षंमज्ज्ञात्मने वृषाय प्रज्ञायै॰ संशुक्लात्मने हंसाय प्रभायै॰
हंप्राणात्मने वराहाय निशायै॰ लंजीवात्मने विमलाय अमो
घायै॰ क्षंपरमात्मने नृसिंहाय विष्णुतायै॰ इत्येकपंचाश
न्मूर्तिशक्तिः केवलमातृकान्यासस्थानेषु न्यसेत् केशवाद्या
इमेश्यामाश्चक्रशंखलसत्कराः शक्तयुक्तप्रियांकेषु निष्ठ
स्मास्मितानना। विष्णुदामसमानांगयः पंकजाभयवाहवः
इतिध्येयाः। इति केशवादिमातृकान्यासः अथ श्रीकंठा
दिमातृकान्यासः तत्र दक्षिणमूर्तिऋषिर्गायत्रीछंदः श्री
अर्द्धनारीश्वरो देवता न्यासे विनियोगः इति ऋष्यादिकं स्मृ
त्वा विन्यस्य षडंगन्यासं कुर्यात् तद्यथा अंकंखंगंघंङंआं
हृदयाय नमः इंचंछंजंझंञंईं शिरसे स्वाहा उंटंठंडंढं
णंऊं शिखायै वषट् एंतंथंदंधंनंऐं कवचाय हुं ओंपं
फंबंभंमंऔं नेत्रत्रयाय वौषट् अंयंरंलंवंशंषंसंहंलं
क्षंअः करतलकरपृष्ठाभ्यां अस्त्राय फट् इति षडंगमंत्रानंगुष्ठादितलांतेवि
न्यस्य हृदयादिष्वपि षडंगेषु विन्यसेत् ततो ध्यानं वंधू
ककांचननिभं रुचिराक्षमालां पाशांकुशौ च वरदं निजवाहु
दंडैः बिभ्राणमिंदुशकलाभरणं त्रिनेत्रं मर्द्धाविकेशमनि
शं वपुराश्रयामः दक्षाधःकरमारभ्य वामाधःकरपर्यंतं
मायुधध्यानं इति ध्यात्वा न्यसेत् तद्यथा सौंअंश्रीकंठेशा
य पूर्णोदर्यै नमः ह्सौंआंअनंतेशाय विरजायै ह्सौंइंसूक्ष्मे
शाय शाल्मल्यै ह्सौं मातृकादौ सर्वत्र योजनीयं ईंत्रिमूर्तीशा

यलोलाक्ष्यै उं अमरेश्वराय वर्तुलाक्ष्यै ऊं अर्घीशाय दीर्घ।
घोणायै ऋं भारभूतेशाय दीर्घमुख्यै ॠं स्थारावीशाय दी
र्घजिह्वायै ऌं हरेशाय कुंडोदर्यै ॡं झिंडीशायोर्द्धकेश्यै
एं भौतिकेशाय विकृतमुख्यै ऐं सद्योजातेशाय ज्वालामु
ख्यै ओं अनुग्रहेशायोल्कामुख्यै औं अक्रूरेशाय श्रीमुख्यै
अः महासेनेशाय विद्यामुख्यै कं क्रोधीशाय महाकाल्यै
गं पंचांतकेशाय सर्वसिद्धिगौर्यै घं शिवोत्तमेशाय त्रैलो
क्यविद्यायै ङं एकरुद्रेशाय शक्त्यै चं कूर्मेशायात्मशक्त्यै छं
एकनेत्रेशाय भूतमात्रे जं चतुराननेशाय लंबोदर्यै झं अजे
शाय द्राविण्यै ञं सर्वेशाय नागर्यै टं सोमेशाय खेचर्यै ठं
लांगलीशाय मंजर्यै डं दारुकेशाय रूपिण्यै ढं अर्द्धनारी
श्वराय वारिण्यै णं उमाकांतेशाय काकोदर्यै तं आपाटीशा
य पूतनायै थं दंडीशाय भद्रकाल्यै दं अत्रीशाय योगिन्यै धं
मीनेशाय शंखिन्यै नं मेषेशाय गर्जिन्यै पं लोहितेशाय का
लरात्र्यै फं शिखीशाय कुब्जिन्यै बं छागलंडेशाय कपर्दि
न्यै भं द्विरंडेशाय वज्रायै मं महाकालेशाय जयायै यं त्व
गात्मने वालीशाय सुमुख्यै रं असृगात्मने भुजंगेशाय रेव।
त्यै लं मांसात्मने पिनाकीशाय माधव्यै वं मेधात्मने खड्गी
शाय वारुण्यै शं अस्थ्यात्मने केशावाय वायव्यै षं मज्जात्म
ने श्वेतेशाय रक्षोविदारिण्यै सं शुक्रात्मने भृगवीशाय सह

१८ 18

जायै हंप्राणात्मनेनकुलेशायमहालक्ष्म्यै लंशक्त्यात्म
नेशिवेशायव्यापिन्यै क्षंपरमात्मनेसंवर्तेशायमहामाया
यै इतिकेवलमातृकास्थानेषुन्यसेत् अत्ररुद्रस्मृतारक्ता
धृतशूलकपालकाः शक्तयोरुद्रपीठस्थाः सिंदूरारुणवि
ग्रहाः रक्तोत्पलकपालाभ्यामलंकृतकरांबुजा इतिशक्ती
नांध्याने इतिकंठादिन्यासः अथभुवनेश्वरीमातृकान्या
सः तत्रशक्तिऋषिर्गायत्रीछंदः श्रीमातृकामयीभुवने
श्वरीदेवतान्यासेविनियोगः इतिऋष्यादिकंस्मृत्वा मू
र्ध्नीदिषुचतुर्थीनमोंतेनविन्यस्य अंकंखंगंघंङंआंह्रांहृ
दयायनमः इंचंछंजंझंञंईंह्रींशिरसेस्वाहाउंटंठंडंढं
णंऊंह्रूंशिखायैवषट् एंतंथंदंधंनंऐंकवचायहुं ओंपं
फंबंभंमंऔंह्रौंनेत्रत्रयायवौषट् अंयंरंलंवंशंषंसंहंलं
क्षंअःह्रःअस्त्रायफट् इतिषडंगमंत्रैः करषडंगन्यासं
विधानम् ध्यानं उद्यत्कीरिदिवाकरप्रतिभयातुंगोरुपी
नस्तनी वद्धार्द्धेंदुकिरीटहाररसनामंजीरसंशोभिता दत्ता
धःकरमारभ्यवामाधःकरपर्यंतंआयुधध्यानम् इति
वर्णारविंदेध्यात्वा ह्रींअंनमः ह्रींइंनमः इत्यादि ह्रींक्षं
नमः इत्यंतंकेवलमातृकास्थानेष्वेवन्यसेत् अथबीजा
दिमातृकान्यासः तत्रभृगुऋषिःगायत्रीछंदः मातृका
रूपिणीलक्ष्मीर्देवतान्यासेविनियोगः इतिऋष्यादिकं

स्मृत्वा प्रागुक्तविधिनाविन्यस्य अंकंखंगंघंङंआंश्रांहृदया
यनमः इंचंछंजंझंञंईंश्रींशिरसेस्वाहा उंटंठंडंढंणंऊंश्रूंशि
खायैवषट् एंतंथंदंधंनंऐंश्रैंकवचायहुं ओंपंफंबंभंमंऔं
नेत्रत्रयायवौषट् अंयंरंलंवंशंषंसंहंळंक्षंअः श्रः अस्त्रायफ
ट् इतिषडंगमंत्रः करषडंगन्यासान्विधायध्यानम् विद्यु
द्दाममममप्रभांहिमगिरिप्रख्यैश्चतुर्भिर्गजैः शुंडादंडसमुद्धृता
मृतघटैरासिंच्यमानामिमां विभ्राणांकरपंकजैर्जपवटींपद्म
यंपुस्तकं भास्वद्रत्नसमुज्ज्वलांकुचननांध्यायेज्जगत्स्वामिनीं
दक्षाधःकरमारभ्यवामाधःकरपर्यंतमायुधध्यानं इतिच
णारविंदेध्यात्वा श्रींअंनमः श्रींआंनमः इत्यादिमातृकान्या
सस्थानेषुन्यसेत् इतिश्रीवीजादिमातृकान्यासः अथकाम
वीजादिमातृकान्यासः तत्रसंमोहनऋषिःगायत्रीछंदः मातृ
कामयीसंमोहनीदेवतान्यासेविनियोगः इतिऋष्यादिकंस्मृ
त्वाविन्यस्यप्रागुक्तविधिनाह्रस्वदीर्घस्वरसंपुटितषड्वर्गैः ष
ष्ठीयंयुक्तकामवीजान्वितैः करषडंगन्यासंविधाय ध्यानम्
वालार्ककोटिरुचिरांस्फटिकाक्षमालांकोदंडमिक्षुजनितंस्म
रपंचवाणान् विद्यांचहस्तकमलैर्दधतींत्रिनेत्रांध्यायेत्सम
स्तजननींनवचंद्रचूडां वामाधरोर्ध्वकरयोर्धुसककोदंडे द
क्षोर्द्ध्वाधयोःपंचवाणाक्षमाले इत्यायुधध्यानम् इतिवर्णा
रविंदेध्यात्वा क्लींअंनमः क्लींआंनमः इत्यादिमातृकास्था

नेषुन्यसेत् इतिकामवीजादिमातृकान्यासः अथशक्तिश्री
कामवीजादिमातृकान्यासः तत्रमहासंमोहनऋषिःगाय
त्रीछंदः मातृकामयी महासंमोहनीदेवतान्यासेविनियोगः
इतिऋष्यादिकंस्मृत्वा प्राग्वद्विन्यस्य अंकंखंगंघंङं आंक्रीं
श्रींक्लींहृदयायनमः इंचंछंजंझंञंईक्रींश्रींक्लींशिरसेस्वाहा
उंटंठंडंढंणंऊंक्रूंश्रूंक्लूंशिखायैवषट् एंतंथंदंधंनंऐंक्रैंश्रैंक्लैं
कवचायहुं ओंपंफंबंभंमंऔंक्रौंश्रौंक्लौंनेत्रत्रयायवौषट् अंयंरं
लंवंशंषंसंहंलंक्षंअः क्रः श्रः क्लः अस्त्रायफट् इतिषडंग
मंत्रैः करषडंगन्यासंविधाय ध्यायेयमक्षवलयेक्षुश
रासपाशपद्मद्वयंकुशपाशान्नवपुस्तकंच याविभ्रतींनि
जकरैररुणांकुचार्त्तांसंमोहनीनिनयनांनवचंद्रचूडां वा
माधःकरमारभ्यदक्षिणाऽधःकरपर्यंतमायुधध्यानम्
अत्राक्षवलयपुस्तकयोर्व्यत्ययोर्वोद्धव्यः इतिवर्णैरवि
देध्यात्वा क्रींश्रींक्लींअंनमः क्रींश्रींक्लींआंनमः इत्यादि
मातृकान्याससस्थानेषुन्यसेत् इतित्रिवीजादिमातृका।
न्यासः इतिश्रीवघेलकुलकमलप्रद्योतप्रचंडमार्त्तंड।
श्रीमहाराजकुमारश्रीजेत्रसिंहदेवविरचिते श्रीभैरवा
र्चापारिजाते तृतीयस्तवकः ३ ॥ ॥ अथप्रपंच
यागमातृकान्यासः तत्रमहागणपतिमंत्रेणवक्ष्यमा
णेनप्राणायामत्रयंकृत्वा तस्यमंत्रस्य शिरसिगणक

ऋषयेनमः मुखेनिवृद्गायत्रीछंदसेनमः हृदयेश्री
महागणपतिर्देवतायैनमः गुह्येगंबीजायनमः पा
दयोःस्वाहाशक्तयेनमः ममप्रपंचयागांगत्वेनजपेवि
नियोगः इतिऋष्यादिन्यासंविधाय अंगुष्ठयोःॐ
गँहृदयायनमः तर्जन्योःश्रींगींशिरसेस्वाहा मध्य
मयोः ह्रींगूंशिखायैवषट् अनामिकयोःक्लींगैंक
वचायहुं कनिष्ठिकयोः ग्लौंगौंनेत्रत्रयायवौषट् क
रतलकरपृष्ठयोः गंगः अस्त्रायफट् इतिषडंगमं
त्रानंगुष्ठादितलांतकरयोर्विन्यस्य हृदयशिरसिखा
कवचनेत्रेषु चैंड विन्यस्यास्त्रमंत्रेणतालत्रयंकृत्वा त
र्जन्यंगुष्ठशब्देदशादिग्वंधनंविधाय ध्यानं हस्तींद्रा
ननामिंदुचूडमरुणच्छायांत्रिनेत्रंरसा दाश्लिष्टंप्रियया
सपद्मकरयास्वांकस्थयासंततं वीजापूरगदाधनु।
स्त्रिशिखयुक्चक्राब्जपाशोत्पल व्रीह्यग्रस्वविषाणरत्न
कलशानहस्तैर्वहंतंभजे गंडामितिगलद्दानपूरला
लसमानसान् द्विरेफात्कर्णतालाभ्यांवारयंतंमुहुर्मु
हुः कराग्रधृतमाणिक्यकुंभवक्त्रविनिसृतैः रत्नव
र्षैःप्रीणयंतंसाधकान्मधुविह्वलं माणिक्यमुकुटोपेतं
रत्नाभरणभूषितम् सुगपत्सेवितंदेव्योरसौरसमङ्ग

र्मुङ्कः वामाधःकरमारभ्य दक्षिणाधःकरपर्यंतं आयुधध्या
नं रत्नगंडस्थुंडाग्रेकेचित्तु अधोवामदक्षिणयोराद्येतद्दंद्वयो
रन्ये एवंक्रमेणान्यान्यपिज्ञातव्यानित्याहुः यदुक्तंगणेश्व
रपरामर्शिभ्यां दक्षाधःकरप्रमरभ्यमाधस्थकरांतकं गदा
शूलाब्जकह्लारविषाणंदक्षिणेकरैः शालग्रापाशचक्रद्व
चापशङ्खिजपूरकं करैर्दधानमंजीरविलसच्चरणांबुजं लील
यारत्नकलशं पुष्करग्रेनिधायच अत्रयथागुरूपदेशंध्याने
कार्यमिति इतिमहागणपतिंध्यात्वा ॐश्रींह्रींक्लींग्लौंगंग
णपतयेवरवरदसर्वजनमेवशमानयस्वाहा इतिमंत्रमष्ट
धाजपित्वा गणपतिबीजस्यगणकऋषिः निचृच्छंदः वि
घ्नेश्वरोदेवताप्रपंचयोगार्गत्वेनजपेविनियोगः इतिऋष्या
दिकंस्मृत्वा विन्यस्य गांगींगूंगैंगौंगः इतिमंत्रैः करषडंग
न्यासंविधाय ध्यानम् सिंदूराभंत्रिनेत्रंपृथुतरजठरंहस्त
पद्मैर्दधानं दंतपाशांकुशेष्टान्युरकरविलसद्बीजपूराभिरा
मं बालेंदुद्योतिमौलिंकरिपतिवदनंदानपूरार्द्रगंडं भोगीं
द्राबद्धभूषंभजतगणपतिंरक्तवस्त्रांगरागं वामाधःकरमा
रभ्यदक्षिणाधःकरमारभ्यदक्षिणाधःकरपर्यंतमायुधध्या
नं इतिध्यात्वा गंमितिगणपतिबीजं चतुश्चत्वारिंशद्वारं
जपित्वा ॐगणानान्त्वागणपतिꣳहवामहेप्रियाणान्त्वा
प्रियपतिꣳहवामहेवंसोनिधीनान्त्वानिधिपतिꣳहवामहे

वसोमम आहमजानिगर्भधमात्वमजासिगर्भधं इतिगण
पत्यवैदिकमंत्रमेकवारंजपित्वा ह्रीँक्रौँऊँगंनमः सर्ववि
घ्नाधिपायसर्वार्थसिद्धिदायसर्वदुःखप्रशमनायएह्येहिभ
गवन्सर्वान्खादय२स्तंभय२ ह्रीँगँगँनमःस्वाहा क्रौँह्रीँ
इतिमालामंत्रंचतुरावृत्तिजपित्वा ततः पूर्वोक्तोसुद्दमातृ
कांऋष्यादिकर६षडंगन्यासध्यानपूर्वकंवारत्रयंविन्यस्य।
मुखेअंआंइंईंउंऊंऋंॠंलृंॡंएंऐंओंऔंअंअः आदित्या
यनमः दक्षिणबाहुमूलाग्रांते यंरंलंवंसोमायनमः वा
मबाहुमूलाग्रांते कंखंगंघंङं भौमायनमः दक्षिणोरु
मूलादिपादाग्रांतं चंछंजंझंञं सुक्रायनमः वामोरुमूला
दिपादाग्रांतं टंठंडंढंणं बुधायनमः जठरे तंथंदंधंनं
बृहस्पतयेनमः हृदये पंफंबंभंमं शनैश्चरायनमः इ
तिग्रहान्विन्यस्य प्रपंचयागमंत्रस्य ब्रह्माऋषिर्गायत्री
छंदः सकलपदार्थानुगतपरिपूर्णस्वप्रकाशसच्चिदानंद
परंज्योतिः परमात्मादेवता प्रपंचयागमातृकान्यासेविनि
योगः इतिऋष्यादिकंस्मृत्वा चतुर्थीनमोंतान्मूर्द्धादि
षुऋष्यादिन्विन्यस्य ऊँह्रीँअंकंखंगंघंङंआंस्वाहाहृदया
यनमः ऊँह्रीँइंचंछंजंझंञंईंसोहंशिरसेस्वाहा ऊँह्रीँ
उंटंठंडंढंणंऊँहंसःशिखायैवषट् ऊँह्रीँएंतंथंदंधंनंऐं
क्लीँकवचायहुं ऊँह्रीँओंपंफंबंभंमंऔंनेत्रत्रयायवौषट्

मे॰पा॰ ॐ ह्रीं श्रं यं रं लं वं शं षं सं हं ळं क्षं श्रः हरिहरात्मने फट् इति षडंगमंत्रैः करषडंगन्यासं कृत्वा ध्यानं तारादिपंचमुनिभिः
२१
परिचीयमानं मानैरगम्यमनिशं जगदेकमूलं सच्चित्सुखं सकलगमनस्वरमच्युतं ततेजः परं भजत सोऽहरूपं वपुर्मे इति सकलप्रपंचातिरिक्तः परिपूर्णसच्चिदानंदोऽहमिति स्वात्मानं ध्यात्वा परमात्मवह्नौ तत्तत्स्थानयुतान्वर्णान् जुहोमीति धिया ॐ ह्रीं क्षं हंसः सोहं स्वाहा ॐ ह्रीं ळं हंसः सोहं स्वाहा इत्यादि ॐ ह्रीं अं हंसः सोहं स्वाहा २ इत्यंतं संहारक्रमेण विन्यस्य पुनः ॐ ह्रीं अं हंसः सोहं स्वाहा ॐ ह्रीं आं हंसः सोहं स्वाहा इत्यादि ॐ ह्रीं क्षः हंसः सोहं स्वाहा इत्यंतान् सविसर्गान्वर्णान्केवलमातृकान्यासस्थानेष्वेव न्यसेदिति प्रपंचयागन्यासः अथ मूलमंत्रेण प्राणायामत्रयं कृत्वा योगपीठन्यासं कुर्यात् तत्र बद्धपद्मासनो ऋजुकायः समुपविश्य दक्षिणांगुष्ठेन दक्षिणनासापुटं निरुध्य वामनासापुटेन वायुमाकृष्य सोदरं पूरयित्वा कनिष्ठानामिकाभ्यां वामनासापुटं च निरुध्य हृदि देवं ध्यायन् मूलमंत्रं जपन् यथाशक्यं वायुं कुंभकेन धृत्वा पुनर्दक्षिणनासापुटेन शनैस्तं वायुं त्यजेदित्येकः प्राणायामः पुनर्दक्षिणनासापुटेन वायुमाकृष्य तथैव कुंभयित्वा तथैव दक्षिणनासारंध्रेण तं वायुं त्यजेदित्यपरः इत्थं प्राणायामत्र

यंकृत्वा मूलाधारे मण्डूकायनमः स्वाधिष्ठाने कालाग्नि
रुद्रायनमः मणिपूरे मूलप्रकृत्यैनमः हृदयेआधारश
क्त्यैनमः हृदयएवेंकूर्मायनमः अनंतायनमः वराहाय
नमः पृथिव्यैनमः सुधार्णवायनमः रत्नद्वीपायनमः
स्वर्णपर्वतायनमः नंदनोद्यानायनमः कल्पवृक्षेभ्यो
नमः विचित्ररत्नभूम्यैनमः स्वर्णप्राकारायनमः रत्न
मंडपायनमः स्वर्णवेदिकायै॰ रत्नसिंहासनाय॰ इत्ये
तत्सर्वंतत्स्थानभावनयाविन्यस्य स्वशरीरंसंशब्द्योरुद्व
यकल्पितपाद्चतुष्टयंमुखनाभिपार्श्वद्वयकल्पितगात्र
चतुष्टयंरत्नसिंहासनंध्यात्वा दक्षिणांशेधर्मायनमः।
वामांशेज्ञानायनमः वामोरौवैराग्याय॰ दक्षिणोरौऐश्व
र्य्याय॰ मुखेअधर्माय वामपार्श्वेअज्ञानाय॰ नाभौअवै
राग्याय॰ दक्षिणपार्श्वेअनैश्वर्य्याय॰ इतिविन्यस्य पुनः
हृदयेमायायै॰ विद्यायै इतिमायाविद्ये ओतप्रोतरूपेवि
चिंत्यविन्यस्य तदुपरिसिंहासनमध्ये अनंताय॰ पद्माय॰
आनंदकंदाय॰ संविन्नालाय॰ प्रकृतिमयपत्रेभ्यो॰ विका
रमयकेशरेभ्यो॰ पंचाशद्वर्णबीजाय॰ सर्वतत्वस्वरूपायै
कर्णिकायैनमः अंअर्कमंडलाय॰ उंसोममंडलाय॰ मं
वह्निमंडलाय संबोधात्मनेसत्वाय॰ रंप्रकृत्यात्मने रज
से॰ तंमोहात्मने तमसे॰ आंआत्मने॰ अंअंतरात्मने॰ पंप

भै॰पा॰ रमात्मने॰ ह्रीँज्ञानात्मने॰ सिंहासनस्यचतुर्दिक्षुमध्येच ज्ञान
२२ तत्वात्मने॰ मायातत्वात्मने॰ कलातत्वात्मने॰ परमतत्वात्मने॰
22 इतिविन्यस्य ॐनमोभगवतेसकलगुणात्मशक्तियुक्तायानंता
ययोगपीठायनमः इतिमूर्द्धादिपादपर्यंतंव्यापकंन्यसेदिति
योगपीठन्यासः अथमूलमंत्रन्यासः तत्रप्राग्वत्प्राणायामत्र
यंकृत्वा शिरसिबृहदारण्यकऋषयेनमः मुखेअनुष्टुप्छंद
सेनमः हृदयेश्रीवटुकभैरवायदेवतायै॰ इतिविन्यस्यमम
चतुर्विधपुरुषार्थसिद्धयेजपेविनियोगः इतिकृतांजलिर्वदे
त् ततःअंगुष्ठयोः ह्रौंवोंईशानायनमः तर्जन्योः ह्रैंवैंत
त्पुरुषायनमः मध्यमयोः ह्रुंवुंअघोराय॰ अनामिकयोः
ह्रिंविंसद्योजातायकनिष्ठिकयोः ह्रंवंवामदेवाय॰ ततोमू
लाद्धीस्यहृदयगुह्यपादेषुप्रोक्तपंचमूर्तिविन्यस्य ब्रह्मरंध्रे
ह्रौंवोंईशानाय ऊर्द्ध्ववक्त्राय॰ इत्यंगुष्ठेनन्यसेत् मुखेह्रैं
वैंतत्पुरुषायप्राग्वक्त्रायनमः(इत्यनामिकया) इतितर्जन्या
दक्षिणकर्णे ह्रुंवुंअघोरायदक्षिणवक्त्राय इतिमध्यमया॰
वामकर्णेह्रिंविंसद्योजातायोत्तरवक्त्राय॰ इत्यनामिकया चू
डायः ह्रंवंवामदेवायपश्चिमवक्त्राय॰(मध्यमयोः ह्रूंवूंशि
खायै) इतिकनिष्ठिकया इतिपंचवक्त्रन्यासंविधाय अंगुष्ठ
ष्ठयो ह्रांवांहृदयाय॰ तर्जन्योः ह्रींवींशिरसेस्वाहा मध्यम
योः ह्रूंवूंशिखायैवषट् अनामिकयोः ह्रैंवैंकवचायहुं ॥

कनिष्ठिकयोः ह्रौं वौं नेत्रत्रयाय वौषट् करतलकरपृष्ठ
योः ह्रः वः अस्त्राय फट् हृदये ह्रां वां हृदयाय नमः इत्यंगु
ष्ठरहिताङ्गुलीभिर्न्यसेत् शिरसि ह्रीं वीं शिरसे स्वाहा इति
प्रागुक्ताभिरेव शिखायां ह्रूं वूं शिखायै वषट् इति कृतमुष्टि
कराङ्गुष्ठेन स्कंधादिनाभ्यंते कवचस्थाने ह्रैं वैं कवचाय हुं
करद्वयाङ्गुलिभिर्दशभिः नेत्रयोर्ललाटे च ह्रौं वौं नेत्रत्रयाय
वौषट् ह्रं वं तर्जनीमध्यमानामाभिः ह्रः वः अस्त्राय फट् (
इत्यस्त्रमंत्रेण तालत्रयं तर्जन्यंगुष्ठयोगोत्थशब्देन दशदिग्बं
धनं च कृत्वा वंदे बालं स्फटिकसदृशं कुंतलोद्भासिवक्त्रं (
दिव्याकल्पैर्नवमणिमयैः किंकिणीनूपुराद्यैः दीप्ताकारं वि
शदवदनं सुप्रसन्नं त्रिनेत्रं हस्ताब्जाभ्यां वटुकमनिशं शूलदंडौ
दधानं दक्षवामकरयोः शूलदंडौ ध्येयं इति स्वाभेदेन ध्या
त्वा स्वशिरसि मूलमंत्रेण स्वपुष्पांजलिं दत्वा पुनः हृदयक
मले ध्यात्वा वक्ष्यमाणयोगपीठपूजापुरस्सरं मानसैरुप
चारैर्देवं सांगं सावरणं संपूज्य मानसमेव नैवेद्यं दत्वा देवं भुं
जानं ध्यायन् मूलाधारे आत्मांतरात्मपरमात्मज्ञानात्मका
र चतुरस्र कुंडमध्ये चिच्छक्तिं कुंडलिनीं वह्निरूपां ध्यात्वा मू
लमंत्रमुच्चार्य्य अहंतां जुहोमि स्वाहा पुनर्मूलं असत्यं जुहोमि
स्वाहा इत्यं अहंकारद्येषून्य कामक्रोधलोभमोहमदमत्स
र्याणि क्रमेण सुषुम्णास्रुक्मनःस्रुवेण विधिना जपं समर्प्य।

श्रीगुरुं प्रणम्य स्वपुरतश्चंदनादिलिप्तभूतले सिंदूरादिना
ष्टदलकमलं सकर्णिककेसरं निर्माय तत्कर्णिकायां ष
ट्कोणं तन्मध्ये ऊर्ध्वाग्रं त्रिकोणं तदंतः पुनः सकर्णिकं स
केशरमष्टदलकमलं सर्ववाह्ये चतुर्द्वारयुक्तं चतुरस्रत्रयं
कृत्वा तस्मिन्पूजाचक्रे मूलमंत्रेण पुष्पांजलिं दद्यात् के
चित्तु देवचक्रमध्यगतत्रिकोणमध्ये व्योमपंकजशब्देन के
वलं वृत्तमात्रं वदंति तदज्ञानविजृंभितं केवलवृत्तस्य पंकज
शब्दस्य वाच्यत्वाभावात् कर्णिकाकेशरदलाग्रपरिकेशसमे
तत्वात्पद्मस्य षट्कोणं तत्रिकोणस्थे व्योमपंकजेनाभिमतेइ
ति पूजाचक्रोद्धारप्रकरणेऽभिधायावरणपूजाप्रकरणेपि व्यो
मपद्मदलेषुः चेदसितांगादिभैरवान्निति भैरवकल्पशारदा
तिलकयोर्दर्शनाद्वाष्टदलपद्ममेव व्योमपद्ममिति सि
द्धांतः अस्य पद्मस्य व्योमपंचकत्वं तु विश्वस्य भरणवचना
दिकार्तिकपरब्रह्मात्मक श्रीभैरवनिवासयोग्यत्वात् अ
थवा स्वर्णादिपट्टे चंदनादिना प्रागुक्तमर्चीमंडलं कृत्वा यद्वा
स्वर्णस्फटिकादिभिः शिल्पिवरैर्निर्मितं पूजाचक्रं वा चंदनरक्त
चंदनश्रीपर्ण्यन्यतमकाष्ठनिर्मिते पीठे स्वर्णादिरचिते वा सिंहा
सने संस्थाप्य तत्र प्राग्वत् पुष्पांजलिं निक्षिपेत् अत्र स्वर्णर
जतताम्रादिधातुभिर्निर्मित पूजाचक्रे प्रथमं तावैदिकमंत्रेण
स्वशाखोक्तेन ब्राह्मणद्वाराम्लरसादिना संशुद्धस्य चक्रस्याग्न्यु

तारणादिकं कारयित्वा पंचगव्यैः पंचामृतैश्च प्रक्षाल्य पु
नः शुद्धजलेन धूपवासितेन प्रक्षाल्य चंदनागुरुकर्पूरक
स्तूरीकुंकुमादिकं पंकैरालिप्य पुरतः शुभे पीठे संस्थाप्य
तच्चक्रं स्पृष्ट्वा मूलमंत्रमष्टोत्तरसहस्रं जपित्वा संशुद्धस्य
तस्य चक्रस्य प्रागुक्त प्राणप्रतिष्ठामंत्रे मम पदस्थाने श्रीभै
रवपूजाचक्रस्येति पदं प्रयोजनं चक्रं स्पृशन् प्राणप्रतिष्ठा
मंत्रजपेन प्रागुक्त प्राणशक्तिध्यानपूर्वकं प्राणप्रतिष्ठां कृ
त्वा तत्र पीठपूजापूर्वकं देवमावाह्य सांगं सावरणं संपूज्य
वक्ष्यमाणबलिदानादिमहानैवेद्यपूर्वकं महोत्सवं प्रत्य
हं दिनत्रयपर्यंतं कुर्यात् दिनत्रयं अपि प्रथमदिने आवा
हितं देवं न विसर्जयेत् चतुर्थदिने नित्यपूजांते देवं विसर्ज
येत् इति प्रतिष्ठिते चक्रे नित्यनैमित्तिकादिपूजनं कुर्या
त् ततः प्रत्यहं तत् अम्लवारिभिः शुद्धजलेन च प्रक्षालनं
धातुमय चक्रस्य स्फाटिकस्य तु केवलजलेनैव क्षालनं का
र्यमिति इत्थं प्रतिष्ठितं प्रक्षालितं चंदनादिमंडितं पुरतः
प्रोक्तपीठे संस्थाप्य तत्र मूलमंत्रेण पुष्पांजलिं दत्वा स्व
पुरतः किंचिद्वामाग्रे चतुरस्रवृत्तत्रिकोणात्मकं मंडलं चं
दनानुलिप्तभूतले मत्स्यमुद्रया विधाय श्रीभैरवस्याधा
धारमंडलाय नमः इति मंडलं संपूज्य तत्र वायव्यनैरृत्यै
शानाग्नेयकोणेषु ह्रौं वां हृदयाय नमः ह्रौं वीं शिरसे नमः

ह्रूँ वूँ शिखायै नमः ह्रैँ वैँ कवचाय नमः इति संपूज्य पुरतः
ह्रौँ वौँ नेत्राय नमः स्वाग्नादि चतुर्दिक्षु ह्रः वः अस्त्राय नमः
इति षडंगानि संपूज्य तत्र मूलमंत्रेण प्रक्षालितमर्घ्यपात्राधा
रं श्रीभैरवार्घ्यपात्राधारं स्थापयामीति संस्थाप्य मं रं धर्मप्रद
दशकलात्मने वह्निमंडलाय श्रीभैरवार्घ्याधाराय नमः इति सं
पूज्य तत्र स्वाग्न्यादिप्रादक्षिण्येन वृत्ताकारेण यं धूम्रार्चिषे न
मः रं ऊष्मायै नमः लं ज्वलिन्यै वं ज्वालिन्यै शं विस्फुलिं
गिन्यै षं सुश्रियै नमः सं सुरूपायै हं कपिलायै लं हव्य
वाहायै क्षं कव्यवाहायै इति वह्निकलाः संपूज्य पूर्वोक्त
प्राणप्रतिष्ठामंत्रं जपेत् प्राणप्रतिष्ठां विधाय ह्रः वः अस्त्रा
य फडित्यस्त्रमंत्रेण स्वर्णादिनिर्मितं पात्रं प्रक्षाल्य श्रीभैरवा
र्घ्यपात्रं प्रतिष्ठयामि इति तस्मिन्नाधारे संस्थाप्य अहं द्वादश
कलात्मने सूर्यमंडलाय श्रीभैरवार्घ्यपात्राय नमः इति तत्पा
त्रं संपूज्य तत्र भूमिस्थमंडलवन्मंडलं विभाव्य तथैव षडं
गैः संपूज्य तत्र वृत्ताकारेण सदक्षिण्येन कं भं तपिन्यै नमः
खं बं तापिन्यै गं फं धूम्रायै घं पं मरीच्यै ङं नं ज्वालिन्यै चं
धं रुच्यै छं दं सुषुम्णायै जं थं भोगदायै झं तं विश्वायै ञं
णं बोधिन्यै टं ठं धारिण्यै ढं डं क्षमायै इति संपूज्य प्राग्व
त्प्राणप्रतिष्ठामंत्रेण तपिन्यादीनामिति पदं नियोज्य तासां प्रा
णप्रतिष्ठां विधाय क्षं लं हं सं षं शं वं लं रं यं मं भं बं फं पं नं धं दं

थं तं णं ढं डं ठं टं जं झं जं छं चं चं ङं घं गं खं कं अः अं औं ओं ऐं एं लॄं लृं ॠं ऋं ऊं उं ईं इं आं अं इत्यंते मूलमंत्रं जपन् शुद्धोदकैः श्रीभैरवा र्घ्यपात्रं पूरयामिति संपूर्य्य उं सं षोडशकलात्मने सोममंडलाय श्रीभैरवार्घ्यामृताय नमः इति तज्जलं संपूज्य तत्र प्राग्वत्मूमि स्थं मंडलं विभाव्य तथैव षडंगैः संपूज्य तत्र वृत्ताकारेण प्राद क्षिणेन अं अमृतायै नमः आं मानदायै नमः इं पूषायै ईं तुष्ट्यै उं पुष्ट्यै ऊं रत्यै ऋं धृत्यै ॠं शशिन्यै लृं चंद्रिकायै लॄं कान्त्यै एं ज्योत्स्नायै ऐं श्रियै ओं प्रीत्यै औं अंगदायै अं पूर्णायै अः पूर्णामृतायै इति संपूज्य प्राग्वदमृतादिनामि ति पदं प्राणप्रतिष्ठामंत्रे योज्य जपन् तासां प्राणप्रतिष्ठां विधा य प्राग्वत्सूर्यमंडलात्स्नानप्रकरणोक्तविधिना तीर्थमावा ह्य मूलमंत्रेण तदर्घ्यजले संयोज्य ह्रूं वूं शिखायै वषडिति शि खामंत्रेण गालिनीमुद्रां प्रदर्श्य वह्निमिति धेनुमुद्रयामृतीकृत्य तत्र देवं ध्यात्वा ह्रां वां हृदयाय नमः ह्रीं वीं शिरसे स्वाहा ह्रूं वूं शिखायै वषट् ह्रैं वैं कवचाय हुं ह्रौं वौं नेत्रत्रयाय वौषट् ह्रः वः अस्त्राय फट् इति षडंगमंत्रान्देवस्य देहे हृदयादिषु वि न्यस्य शंखमुद्रया तत्पात्रमवष्टभ्य योनिमुद्रया तज्जलं स्पृ शन् तेजोमयभावनया तज्जलमुद्दीप्य मूलमंत्रेण गंधा दिभिः संपूज्य प्राग्वत्षडंगानि च चतुरस्रे संपूज्य मूलमं त्रेण सप्तवारमभिमंत्र्य मत्स्यमुद्रयाच्छादयेत् इत्यर्घ्यपात्रं संस्थाप्य तत्पात्रं पूजाचक्रयोर्मध्ये पंक्त्याकारेण त्रिकोण

मै॰पा॰ २३ मंडलत्रयेकृत्वा तेषुमंडलद्वयेसाधारं सजलंपात्रद्वयंदुग्धंचद्र
तमधुदधिशर्करायुक्तंमधुपर्कंपात्रत्रयंसंस्थाप्य मूलमं
त्रेणगंधादिभिः पृथक्पृथक्अभ्यर्च्य तेषुपात्रांतरेनोध्धृत्य
ऽऽद्यजलंकिंचिकिंचिद्दत्वा मूलमंत्रेणपृथक्पृथक्अष्ट
वारमभिमंत्र्य मत्स्यमुद्रयाछादयेदिति पाद्यार्घाचमनीय
मधुपर्कपात्राणिसंस्थाप्य पूजाचक्रस्यदक्षिणेत्रिकोणे
मंडलेसाधारंसजलंपात्रंनिधाय तत्रार्घपात्रजलंकिंचि
त्पात्रांतरेनोध्धृत्य दत्वा मूलमंत्रेणाष्टवारंअभिमंत्र्य त
ज्जलंकिंचित्पात्रांतरेनोध्धृत्य दत्वामूलमंत्रेणाष्टवारंअ
भिमंत्र्य ---------------------------- पात्रांतरे
नोध्धृत्य दत्वामूलमंत्रेणाष्टवारंसंप्रोक्ष्य स्वदेहंस्वेतगंधैरलं
कृत्यस्वेष्टदेवतारूपंसंचिंत्य प्रागुक्तयोगपीठन्यासस्थाने
षुमंडूकादि परतत्वांतः योगपीठन्यासोक्तः पीठदेवताः सं
पूज्य हृदयकमलकेसरेषु वक्ष्यमाणपीठशक्तिश्चसंपू
ज्य पीठमंत्रेणसर्वांगेषुपुष्पांजलिंदत्वा स्वेष्टदेवता रूपं
स्वात्मानंध्यायन् वक्ष्यमाणपीठशक्तिश्चसंपूज्य पीठमंत्रे
ण सर्वांगेषुपुष्पांजलिंदत्वा स्वेष्टदेवता रूपंस्वात्मानंध्या
यन् मूलमंत्रेणमूर्ध्नि हृदये गुह्ये पादयोः सर्वांगेच पंचस्था
नेषु पंचपुष्पांजलिंदत्वा धूपदीपौनिवेद्य प्राग्वत्मूलाधारे
वत्तरस्वकुंडंसंचिंत्य तत्रकुंडल्यात्मक परमात्मकंवह्निंसं
चिंत्य मूलमंत्रमुच्चार्य धर्माधर्महविदीप्तेआत्माग्नौमन

सात्त्वास्तवमणीवर्त्मिनानत्य महावृत्तिर्जुहोम्यहं पुण्येजु
होमिस्वाहा पुनर्मूलप्रोक्तश्लोकमंत्रंचपठित्वा पापेजुहो
मिस्वाहा इत्थंपुण्यपापंकृत्वा कृत्यसंकल्पधर्माधर्मान्पृ
थक्पृथक्हुत्वापुनर्मूलं प्रकाशमर्शहस्ताभ्यामवलंब्यो
न्मनीस्रुचं धर्माधर्मकलास्नेहपूर्णेवह्नौजुहोम्यहं इति
धर्माधर्मात्मकं सकलप्रपंचपूर्णाहुतित्वेनदत्वा निरस्त
निखिलोपाधिना यानितिरायसुखानंदाचद्विलासात्मकं
स्वात्मानंध्यायन्ध्यायन् प्राणायाम ऋष्यादिन्यासपू
र्वकं मूलमंत्रमष्टोत्तरशतवारंजपित्वा जपंसमर्प्या ज
लेनपूजा चक्रमभ्युक्ष्य पूजाचक्रस्योत्तरभागे ऐंगुरुभ्यो
नमः दक्षिणे गंगणपतयेनमः इतिसंपूज्य पूजाच
क्रस्याधः अतलादिसप्तपातालभावनया ॐमंडूकाय
नमः कालाग्निरुद्रायनमः मूलप्रकृत्यै आधारशक्त्यै
नमः कूर्मायनमः अनंतायनमः वराहायनमः इति
संपूज्य वराहस्यदंष्ट्रोपरि पृथिव्यै तस्यास्तधारणावाय
तस्मिन्नवरत्नमयद्वीपाय तन्मध्येस्वर्णपर्वताय तदुप
रिनंदनोद्यानाय तन्मध्ये कल्पवृक्षेभ्यो तेषांमध्येचित्ररत्न
नभूम्यै तन्मध्येस्वर्णप्रकाराय तन्मध्येरत्नमंडपाय
तस्यांतःस्वर्णवेदिकायै तदुपरि रत्नसिंहासनाय इतित
त्तत्भावनयासंपूज्य पूजाचक्राधार पीठंसिंहासनत्वेनप
रिकल्प तस्यवायव्यादिकोणचतुष्टयस्य पादचतुष्टयेषु

मै॰पा॰ २४ धर्माय ज्ञानाय वैराग्याय ऐश्वर्य्याय इतिप्रदक्षिणेन
स्वाग्न्यादिपीठस्य पात्रचतुष्टये अधर्माय अज्ञानाय अ
वैराग्याय अनैश्वर्य्याय इतिप्रदक्षिणेन पूजयेत् अत्र वा
यव्यादि कोणचतुष्टयं प्रसिद्धमेवज्ञेयं ततः सिंहासनस्य
मध्ये मायायै॰ विद्यायै॰ इतिमायाविद्ये पट्टसूत्रमर्यादिकारू
पेण लौकिकमंत्रवक्रवत् ओतपोतरूपेण ग्रथिते स्थिते
ध्यात्वा संपूज्य तदुपरि अनंताय नमः इति तुल्याकारमनंतं
संपूज्य तस्य मूर्द्धि वहाय पद्मायैधः अनंदकंदाय संवि
न्नालाय तद्दलेषु प्रकृत्यैतिमयपत्रेभ्यः तत्केशरेषु विकृ
तिमयकेशरेभ्यः तत्कर्णिकायां षट्त्रिंशत्वर्णबीजाय स
र्वतत्त्वरूपायै कर्णिकायैः पत्रेषु अंअर्कमंडलाय॰ केशरे
षु ॐ सोममंडलाय॰ कर्णिकायां मंवह्निमंडलाय॰ संप्र
बोधात्मने सत्त्वाय रंप्रकृत्यात्मने रजसे तंमोहात्मने तम
से आंआत्मने॰ पंपरमात्मने॰ ह्रींज्ञानात्मने इतिसंपूज्य
सिंहासनस्य स्वाग्न्यादिचतुर्दिक्षु मध्ये च ज्ञानतत्त्वात्मने मा
यातत्त्वात्मने कलातत्त्वात्मने विद्यातत्त्वात्मने परतत्त्वात्म
ने इतिसंपूज्य तत्केशरेषु स्वाग्न्यादिप्रादक्षिण्येन वामा
यै ज्येष्ठायै रौद्र्यै॰ कलविकरिण्यैः बलविकरिण्यैः बल
प्रमथिन्यै॰ सर्वभूतदमन्यै मनोन्मन्यै इतिमध्यांतं संपूज्य
ॐ नमो भगवते सकलगुणात्मशक्तियुक्ताया अनंताययो
गपीठाय नमः इति समस्तपीठं पुष्पांजलिनासंपूज्य मू

लमंत्रमुच्चार्य्य श्रीभैरवमूर्त्तिं परिकल्पयामीति त्रिको।
णमध्यस्थाष्टदलकमलकर्णिकामध्ये रत्नमयीं धातुम
यीं वा मूर्त्तिं संस्थाप्य तदभावे शिवलिंगं तस्यापि भावे पुष्पा
दिकं वा निक्षिप्य ध्यानोक्तां मूर्त्तिं विभाव्य कराभ्यां पुष्पांज
लिमादाय पद्ममुद्रां बध्वा पूर्वोक्तमातृकां भोजत्वेन ध्या
त्वा पद्मासनेनोपविष्टो ऋतकार्यो न्नमुखो गुदमेढ्रयो
रंतरालेषु मूलाधारं चतुरस्रमंडलमध्यस्थ चतुर्दल
पंकजदलेषु विषेत् विशेषसाणि चतुष्टयं सकेशरं पीत
वर्णं संचिंत्य तन्मध्ये सोमसूर्याग्निमयमकथादि त्रिरे
खं त्रिकोणं विभाव्य तन्मध्ये सूर्यकोटिप्रतिकाशं चंद्रको
टीसुशीतलं जपाकुसुमप्रभं ज्योतिर्लिंगं ध्यात्वा तदुपरि चि
द्रूपां तडित्कोटिप्रभां दीप्तां बिसतंतुतनीयसीं ब्रह्मभुज
गवसार्द्धत्रिवलयेन स्थितां स्वीं तयामि तयापरि चिदात्म
कत्वीपरं ब्रह्मविना भूत्वा कुंडलिनीशक्तिं चिरं विभाव्य गु
रूपदिष्ट विदिता गुदाकुंचनपूर्वकं हूंकारेण तां कुंडलि
नीमुत्थाप्य सुषुम्णा वर्त्मना मूलाधारं स्वाधिष्ठान मणिपूरका
नाहत विशुद्ध्याज्ञाख्य षट्चक्रभेदक्रमेण ब्रह्मरंध्रं नीत्वा तत्र
न्य परमामृतौघे परमात्मनि संयोज्य शिवशक्त्यात्मकं तत्ते
जोवहं नामाध्याभा करस्थपुष्पांजलौ निस्सार्य मूलमंत्रमुच्चा
र्य सद्योजाताय नमः श्रीभैरव इह आगच्छ आगच्छ इति च
क्रमध्यस्थितमूर्त्तेः शिरसि पुष्पांजलिप्रक्षेपेण तत्तेज आवाह

भै॰पा॰
२५ नीमुद्रया समावाह्य तद्ब्रह्मरंध्रेण प्रतिष्ठितं तत्तेजः संचिंत्य।
श्रीभैरवरूपेण परिणतं ध्यानोक्तरूपं ध्यायन् मूलमंत्रमु
85 च्चार्य्य वामदेवायनमः श्रीभैरवइहतिष्ठतिष्ठ इति स्थापि
नीमुद्रां प्रदर्श्य देवेश भक्तिसुलभ सर्वावरण संयुत यावत्वां
पूजयिष्यामि तावत्वं सुस्थिरो भव इति प्रार्थ्य २ पुनर्मूलमु
च्चार्य्य श्रीभैरवइहसन्निधेहि सन्निधेहि इति संनिधानमुद्र
या संविधाय ३ मूलमुच्चार्य्य अघोरेभ्योनमः श्रीभैरवइ
हसन्निरुद्धोभवः ४ मूलमुच्चार्य श्रीभैरवइहसंमुखोभव
इति तत्तद्रूपां विधाय ५ मूलमुच्चार्य्य श्रीभैरवइहावगुं
ठितोभव इत्यावगुंठनयावगुंठ्य ६ देवस्य हृदयादिषडं
गन्यासस्थानेषु क्रौंवां हृदयायनमः इत्यादि प्रागुक्तषडं
गमंत्रान्विन्यस्य मूलमुच्चार्य्य श्रीभैरवंसकलीकृतो भवेति
सकलीकृत्य ७ धेनुमुद्रां बध्वा देवस्य मूर्द्धि अमृतवृष्टिं
ध्यायन् मूलमुच्चार्य्य श्रीभैरवामृतीकृतो भवेत्यमृती
कृत्य ८ महामुद्रां बध्वा मूलमुच्चार्य्य श्रीभैरवपरमामृ
तीकृतोभवेति देवस्या मूर्द्धि परमामृतवृष्टिं ध्यात्वा ९ मू
मूलमुच्चार्य्य (श्रीभैरवपरमामृतीकृतो भवेति देवस्या मूर्द्धि
परमा) तत्पुरुषायनमः इतियोनिमुद्रां प्रदर्श्य मूलमुच्चार्य्य
ईशानायनमः इति नमस्कारमुद्रया नमस्कृत्य देवस्यहृदयं
स्पृशेत् पूर्वोक्तप्राणप्रतिष्ठामंत्रेण ममदस्थानेषु तत्पद म
पास्य श्रीभैरवस्येति पदं नियोज्य प्राणप्रतिष्ठामंत्रंजपन्

पूर्वस्यां दिशि विरचितं स्नानमंडपं नीत्वा प्राग्वदासनं दत्वा ।
अर्घ्यपाद्याचमनीयानि प्राग्वन्निवेद्य सुगंधतैलादिकमुपनी
य मूलमुच्चार्य्य श्रीभैरवएतत्ते सुगंधतैलाभ्यंगसुगंधामल
काद्युद्वर्तनस्नानादिकं नमः इति महाराजोपचारवत् नानावि
धजलैरभिषिंच्य गंगादितीर्थोदाहृतजलपूर्णकनककलश
हस्तैर्देवेति कन्याभिषक्तं मत्वा प्राग्वदाचमनीयं दत्वा जलाय
कर्षणार्थं वस्त्रं दत्वा गात्रोत्सर्णं परिकल्प्य श्वेतदुकूलयुग्ममा
नीय कमिति वरुणबीजेनाभिमंत्रितजलेन हुः वः अस्त्राय
फट् इत्यस्त्रमंत्रेण प्रोक्ष्य बृहस्पतिदेवताभ्यां वासोभ्यां नमः
इति संपूज्य मूलमुच्चार्य्य श्रीभैरवएतत्ते वाससे नमः इति व
स्त्रं परिधाय प्राग्वदाचमनीयं निवेद्य मूलमुच्चार्य्य श्रीभैरव
एतत्ते यज्ञोपवीतं नमः इति यज्ञोपवीतं दत्वा प्राग्वदाचमनीयं
निवेद्य रत्नपादुके उपनीय पादुकायुग्ममारुह्य भगवन्रत्न
निर्मितं आगच्छ निर्मितं याम्यामलंकारस्य मंडपं इति दक्षिणदि
क्यमलंकारमंडपं नीत्वा तत्र सिंहासने उपविश्य मुकुटादिना
नाविधालंकरणानि समुपनीय प्राग्वत्प्रोक्ष्य नानादेवतेभ्यो
मुकुटाद्याभरणेभ्यो नमः इति संपूज्य मूलमुच्चार्य्य श्रीभैरवए
तत्ते मुकुटं नमः एतत्ते कुंडलं नमः इति नानाविधाभरणानि त
त्त्वान्नाम्ना समर्प्य रत्नपादुके उपनीय पादुके परिधायेशवाद्यपुरः
सरं यागमंडपमायाहि परिवारगणैः सह इति प्रार्थ्य प्रधानमं
डपं नीत्वा तत्र प्राक्कल्पितयोगपीठे देवमुपवेश्य छत्रचामरादि

देवस्यप्रतिष्ठांविधाय मूलमुच्चार्य्य श्रीभैरवायनमः इति
पुष्पांजलिंदत्वा लिंगयोनित्रिशूलाक्षमाला वराभय मृगाख
ट्वांग कपालखट्वांग कपाल डमरु काख्यादशमुद्राप्रतीकं ।
क्लीमिति कामबीजेनविरच्य मूलमंत्रेणप्रदर्श्य हंइति मुखे
दिति प्रोक्तदशमुद्राप्रदर्श्य मूलमुच्चार्य्य श्रीभैरवएतत्तेश्रा
सनंनमः ॐहंहंहं इदमिदंमिदग्रहाणस्वाहा इतिवार्द्धे चा
र्म्मी वस्त्रं पौष्पं वाययथासंभवमासनं देवस्य वामभागेविन्य
स्य मूलमुच्चार्य्य श्रीभैरवएषतेअर्घ्यंस्वाहा इतिपूर्वस्था
पितार्घ्यपात्रान् गंधपुष्पाक्षतयवकुशाग्रतिलसर्षपदूर्वा
न्वितं जलंपात्रांतरेनोद्धृत्य देवस्यशिरसिदत्वा ॐहंहं इद
मिदमिदंग्रहाणस्वाहेति निवेद्य मूलमुच्चार्य्य श्रीभैरवायन
मः इतिपुष्पांजलिंदत्वा पुनर्मूलमुच्चार्य्य श्रीभैरवक्षेत्रपाल
एषतेपाद्यंनमः इतिपाद्यपात्राश्यामाकदूर्वाकुविष्णुक्रांतज
लं पात्रांतरेनोद्धृत्य देवस्यपादयोर्दत्वा ॐहंहंहं इत्यादिमंत्रेण
प्राक्कलिकेषु मूलमंत्रेण प्रागवत्पुष्पांजलिंदत्वा अत्रसर्वत्रो
पचारेषुप्रोक्तमंत्रेणनिवेदनं मूलमंत्रेणपुष्पांजलिदानं नव
प्रत्ययचारंकार्य्यं ॥ ततः आचमनीयपात्रान्जातिफलल
वंगकंकोलचूर्णयुतंजलंपात्रांतरेणोद्धृत्य मूलमुच्चार्य्य श्री
भैरवएतत्तेआचमनीयंस्वधेति पुनराचमनीयंदत्वा रत्नपा
दुकेउपनीय पादुकायुग्ममारुह्य भगवन्रत्ननिर्मितं स्ना
नमंडपमायाहिस्नानार्थंदत्वा रत्नपीठकादिगातं इतिप्रार्थ्य

नानाविधोपकरणव्यग्रहस्तं परिवारदेवतागणं समर्प्याकि
रणसमूहमिव देवशरीराद्विनिर्गत्य स्वस्वस्थाने समुपविष्टं
प्रधानदेवतासदृशाकाराभरणायुधादिशोभितं स्थिरीभू
तं परिजनस्वरूपं मध्ये ध्यात्वा चंदनागुरुकर्पूरादि नानागंधाना
नीय प्रागवस्थोक्त्य गंधर्वदेवत्या गायगंधाय नमः इतिगंधं
संपूज्य मूलमंत्रार्थ्य श्रीभैरव एष ते गंधो नमः इति देवा
य गंधं समर्प्य प्रागवन्निवेद्य पुष्पाणि प्रागवस्थोक्त्य वनस्पति
देवतेभ्यो नमः पुष्पेभ्यो नमः इति पुष्पाणि समर्प्य मूल
मंत्रार्थ्य श्रीभैरव इमानि ते पुष्पाणि वौषडिति नानाविधा
नि सुगंधानि सुगंध शुभ्र पुष्पाणि समर्प्य प्रागवन्निवेद्य
श्रीभैरव परिवारिधे देवतापूजनार्थमनुज्ञां देहि इति दे
वं प्रार्थ्य आभरणपूजां कुर्यात् इति वघेलकुलकम
लप्रद्योतप्रचंडमार्त्तंड श्रीमहाराजाकुमार श्रीजैत्रसिंह
विरचिते भैरवार्चापारिजाते चतुर्थस्तवकः ४ ॥ ॥
अथावरणपूजा तत्र प्रथमे देवस्य शरीरे हृदयाद्यंगष
ट्कं तत्तत्स्थाने पूज्य देवस्य शरीरावशिरस्य मूलमं
त्रं अंपुनर्विलोम मूलमंत्रं नमः इत्यादि मातृकान्यासं स्था
नेषु प्रत्यक्षरं प्रतिस्थानं संपूज्य देवस्य करयोः पंचांगुली
षु ब्रह्मरंध्रादि पंचवक्त्रेषु मूर्द्धास्य हृदय गुह्य पादेषु च ह्रौं
वों ईशानाय नमः ह्रें वें तत्पुरुषाय नमः ह्रुं वुं अघोराय ह्रौं
वं सद्योजाताय नमः ह्रुं वं वामदेवाय नमः इति पंचमूर्त्तीः
संपूज्य अंतरष्टदलेषु स्वायदलमारभ्य प्रादक्षिण्येन आंआसि

तांगभैरवाय ईंरुरुभैरवाय उंचंडभैरवाय ऋंक्रोधभैर
वाय लृंउन्मत्तभैरवाय एंकपालीभैरवाय औंभीषणभैर
वाय अंसंहारभैरवाय इतिसंपूज्य तद्बहिःषट्कोणस्याग्नि
यकोणे ह्रांवांहृदयायनमः ईशानकोणे ह्रींवींशिरसेनमः
नैरृत्ये ह्रूंवंशिखायैनमः वायव्ये ह्रैंवैंकवचायनमः दे
वाग्रकोणे ह्रौंवौंनेत्रायनमः देवाग्रमारभ्य चतुर्दिक्षु ह्रः
वः अस्त्रायनमः इतिषडंगानिपूजयेत् अत्रयष्टुरभिमुखो
देवादेवाभिमुखत्तोदश प्राच्यादिहरितो शेषापूजाहोमादि
कर्मस्विति वचनात् देवाग्रमेव प्राचींपरिकल्प्य तदनुसा
रेणापेयादिककल्पनंकार्य्यमिति ततः षट्कोणवासाष्टदल
पद्मयोर्मध्ये देवाग्रमारभ्य प्रदक्षिणेन कोणाग्रांतरालेषु
डाकिनीपुत्रायनमः मायापुत्रायनमः लाकिनीपुत्रायन
मः काकिनीपुत्रायनमः साकिनीपुत्रायनमः हाकिनी
पुत्रायनमः मालिनीपुत्रायनमः देवीपुत्रायनमः उमा
पुत्रायनमः रुद्रपुत्रायनमः मातृपुत्रायनमः इंद्रेशान
योर्मध्ये ऊर्ध्वमुखीपुत्राय निरृतिवरुणयोर्मध्ये अधोमु
खीपुत्राय इत्यूर्ध्वाधोभावनयापूजयेत् अत्रऐशानयोर्मध्ये
निरृतिवरुणयोर्मध्येचप्रसिद्धदिगनुक्रमेणैवज्ञेयं ततोवा
साष्टदलपद्मस्थदेवाग्रदलमारभ्य वामावर्त्तेन ब्राह्मणीपुत्र
वटुकायनमः माहेश्वरीपुत्रवटुकायनमः वैष्णवीपुत्रवटुका
यनमः कौमारीपुत्रवटुकायनमः इंद्राणीपुत्रवटुकायन
मः महालक्ष्मीपुत्रवटुकायनमः वाराहीपुत्रवटुकायनमः

चामुंडाय पुत्रवटुकाय नमः इति ततोष्टदलपद्माद्बहिः
चतुरस्राभ्यंतरे देवायमारभ्य प्रादक्षिण्येन हेतुकाय
नमः त्रिपुरांतकाय नमः वेतालाय॰ अग्निजिह्वाय॰ का
लांतकाय॰ करालाय॰ एकपादाय॰ इंद्रेशानयोर्मध्येअ
चलाय॰ निऋतिवरुणयोर्मध्ये हाटकेश्वराय॰ इतिसंपू
ज्य प्रथमचतुरस्रे देवायादि प्रादक्षिण्येन श्रीकंठाय॰
अनंताय॰ सूक्ष्मेशाय॰ त्रिमूर्तये॰ इति संपूज्याग्नेयादिको
णे चतुष्टये प्रादक्षिण्येन अमरेशाय॰ अर्घीशाय॰ भार
भूतेशाय॰ तिथीशाय॰ इतिसंपूज्य पूर्वाग्नेययोर्मध्येमा
रभ्य प्रादक्षिण्येनाष्टस्वंतरालेषु स्थाणवीशाय हरेशा
य (तिथीशाय॰) किंडीशाय॰ भौतिकेशाय॰ सद्योजाते
शाय॰ अनुग्रहेशाय॰ अक्रूरेशाय॰ महासेनेशाय॰ इति
संपूज्य द्वितीयचतुरस्रे देवायादि चतुर्दिक्षुः क्रोधेशाय॰
चंडेशाय॰ पंचांतकेशाय॰ शिवोत्तमेशाय॰ इतिसंपूज्या।
ग्न्यादिकोणेषु एकरुद्रेशाय कूर्मेशाय॰ एकनेशाय॰ च
तुराननेशाय॰ इतिसंपूज्याष्टस्वंतरालेष अजेशाय॰ लां
गलीशाय॰ दारुकेशाय॰ अर्द्धनारीश्वराय उमाकांतेशा
य आषाडीशाय॰ इतिसंपूज्य तृतीयचतुरस्रे प्राग्वत् दे
वाग्रादि चतुर्दिक्षु दंडीशाय॰ अत्रीशाय॰ मीनेशाय॰ मे
षेशाय॰ अतिसंपूज्याग्नेयादिकोणेषु लोहितेशाय शिखी
शाय॰ छागलेशाय॰ द्विरंडेशाय इतिसंपूज्याष्टस्वंतरा
लेष महाकालेशाय वालीशाय॰ भुजंगेशाय पिनाकी

९४

शाय॰ खड्गीशाय॰ वक्रेशाय॰ श्वेतेशाय॰ भृग्वीशाय॰ इ
तिसंपूज्य तृतीयचतुरस्रवद्द्वस्य दक्षिणादिग्जातद्वारस्य
पूर्वद्वारदेशे तत्पश्चिमे नकुलीशाय॰ शिवेशाय॰ संवर्तेशा
य॰ इतिपूजयेत् ततः तृतीयचतुरस्रेशानकोणे दिव्ययोगी
शेभ्यः सशक्तिकेभ्यः सयोगिनीभ्योनमः आग्नेयकोणे अं
तरिक्षयोगिभ्यः सशक्तिकेभ्यः सयोगिनीभ्योनमः नैरृत्य
कोणे भौमयोगीशेभ्यः सशक्तिभ्यो सयोगिनीभ्योनमः इ
तिपूजयेत् अत्रापिशच्यादि कल्पनमंगपूजा वदेवत्तेयं त
तस्तद्बहिःप्रसिद्धास्वष्टदिक्षु पूर्वादिक्रमेण लंइंद्राय
नमः रंअग्नये टंयमाय संनिरृतये वंवरुणाय यंवाय
वे संसोमाय॰ हंईशानाय॰ इतिप्रागदक्षिण्येनसंपूज्य इंद्रे
शानयोर्मध्ये आंब्रह्मणेनमः निरृतिवरुणयोर्मध्ये ह्रींअ
नंताय इतिऊर्ध्वाधोवुध्यासंपूज्य इंद्रादीनांसमीपे वज्राय॰
शक्तये॰ दंडाय॰ खड्गाय॰ आपाशाय॰ अंकुशाय गदायै॰ त्रि
शूलाय॰ पद्माय॰ चक्राय॰ इतिलोकपालानामायुधानिसं
पूज्य मूलमन्त्रार्थे सांगाय सावरणाय श्रीवटुकभैरवाय
नमइतित्रिः पुष्पांजलिनासंपूज्य ह्रः वः अस्त्रायफडित्यस्त्र
मंत्रेण धूपभाजनंप्रोक्ष्य ह्रांवांहृदयायनमः इतिहृदयमं
त्रेण गंधादिभिर्धूपभाजनमभ्युक्ष्य तत्रसांगारान्विधाय
वंइतिधेनुमुद्रयाऽमृतीकृत्य ह्लींसुरभितेजसेस्वाहा इति
मंत्रेणगुरुगुग्गुलादिधूपंनिक्षिप्य गंधर्वदैवत्यायधूपाय
नमः इतिधूपंसंपूज्य मूलमन्त्रार्थे वनस्पतिरसोदिव्योगं

धाढ्योधूपमस्तुनमः आघ्रेयः यः सर्वदेवानांधूपोयं प्रति
गृह्यतां इतिधूपमुत्सृजेत् सव्यभागेघंटांनिधाय ह्रः वः
अस्त्राय फडित्यस्त्रमंत्रेणप्रोक्ष्य तेनैवास्त्रमंत्रेण घंटायै
नमइति गंधादिभिः संपूज्य ॐजयध्वनिमंत्रमातः स्वाहा
इतिमंत्रेणत्रिरभिमंत्र्य वामकरेणतोघंटांवादयन् ॐ हं
हंहं इदमिदमिदं गृहाण स्वाहा इतिमंत्रेणनीचैधूपनि
वेद्य धूपभाजनं देवस्य वामभागेनिवेद्य दीपग्राहीण्यांगो
घृतंतिलस्नेहंवानिक्षिप्य तत्रकर्पूर गर्भिणींवर्तिंनिधाय
ह्रींइतिप्रज्वाल्य विष्णुदेवत्याय घृतदीपायनमः तैलदी
पश्चेद्वनस्पति दैवत्याय तैलदीपायनमः इतिसंपूज्य वमि
ति धेनुमुद्रयाऽमृतीकृत्य मूलमुच्चार्य (श्रीभैरवएषते
दीपोनमइति) स्वप्रकाशो महादीपः सर्वत्रतिमिरापहः
सवाह्याभ्यंतरंज्योतिदीपोयंप्रतिगृह्यतां इत्युच्चार्य श्री
भैरवएषतेदीपोनमइति दीपमुत्सृज्य प्रागवत् घंटांवा
दयेत् देवस्य पादादिमूर्द्धांतमस्त्रैदीपं प्रदर्श्य घृतदीपश्चे
द्देवस्यदक्षिणभागे तैलदीपश्चेदेवस्य वामभागेदीपांनिवे
श्य प्राग्वद्देवस्य पाद्याचमनीयेदत्वा स्वर्णादिपात्रेभक्ष्य
भोज्यलेह्यचोष्यपेयात्मकं पंचविधमन्नं कट्वम्ललवणति
क्त कषाय मधुरात्मक षट्रसोपेतंनानाविधव्यंजनसमे
तं नैवेद्यमानीय विष्णुदेवत्यायनैवेद्यायनमः इतिनैवेद्यं
संपूज्य देवस्यपुरतश्चतुरस्त्रमंडलेसाधारं तत्पात्रंविधायमू
लमंत्रेणवीक्ष्य ह्रः वः अस्त्रायफडित्यस्त्रमंत्रेण प्रोक्षणीपा

जलेनप्रोक्ष्यानेनैवास्त्रमंत्रेण कुशैस्त्रिसंताड्य हुं वैकवचा
यहुं यमिति कवचमंत्रेणाभ्युक्ष्य अधोमुखदक्षिणहस्तोप
रितादृशं वामहस्तंनिधाय यमिति वायुबीजेनाष्टवारम
भिमंत्र्यनैवेद्य गतस्पर्शादिदोषान् शोषयित्वा पुनर्वाम
स्योपरिदक्षिणं करंप्राग्वन्निधायाधोमुखं वामहस्तेना
च्छादयन् रमिति वह्निबीजमष्टौजपन् तत्कृतदोषान् द
ग्ध्वा धेनुमुद्रांदर्शयन् वमिति अमृतमष्टधाजपन् नै
वेद्यममृतीकृत्य ह्रः वः अस्त्राय फडिति अस्त्रमंत्रेण नै
वेद्यस्योपरि चक्र मुद्रांमुद्रांदर्शयन् तत्संरक्ष्य मूलमंत्रेण
षट्वारमभिमंत्र्य दक्षिणहस्तेजलंगृहीत्वा हेमपात्रगतं
दिव्यंपरमान्नसुसंस्कृतं पंचधा षट्रसोपेतंगृहाणपरमे
श्वर इतिनैवेद्यस्योपरि चुलकोदकंनिक्षिप्य मूलमुद्रा
यै श्रीभैरवएतन्नैवेद्यंनमइत्युत्सृज्य कराभ्यां तत्पा
त्रं स्पृशन् पूर्वोक्त निवेदनमंत्रेणानिवेद्य पात्रांतरेधेनु
मुद्रया जलममृतीकृत्य देवस्यदक्षिणहस्ते तज्जलंकिं
चिद्दत्वा अमृतोपस्तरणमसि स्वाहेतिदेवमाचमयि
त्वा वामहस्तेनविकचोत्पलसन्निभां ग्रासमुद्रांद
र्शयेत् दक्षिणकरस्य कनिष्ठानामिकांगुष्ठयोगेन ॐ
प्राणायस्वाहा १ पुनस्तर्जनीमध्यमांगुष्ठयोगेन अपा
नायस्वाहा २ पुनर्मध्यमांगुष्ठयोगेन ॐव्यानायस्वाहा ३
पुनस्तर्जनीमध्यमानामांगुष्ठयोगेन ॐउदानायस्वाहा ४ पु
नः पंचांगुलिभिः ॐसमानायस्वाहा ५ इतिप्राणादिपंचमुद्रा

भिः पंचग्रासान् ग्राहयित्वा स्वर्णादिपात्रे जलं धेनुमुद्रया अ
मृतीकृत्य नमस्ते देवदेवेश सर्वतृप्तिकरं परं अन्यानिवेदि
तं मुद्रं प्रकृतिस्थं सुशीतलं परमानंदसंपूर्णं गृहाण जलमुत्त
मं इति देवस्य वामभागे जलपात्रं निवेशयन् जलं निवेद्य पु
ष्पांजलिमादाय सत्पात्रे वित्तहविर्मालं विविधानेकभक्ष
णं निवेदयामि ते देवस्य सानुगाय तुष्टये तत् इति पुष्पां
जलिं दत्वा हूंः वः अस्त्राय फडिति अस्त्रमंत्रेण दशदिक्
बंधनं कुर्यादेवं परितो जवनिकां विभाव्य वंअमृतात्मकं
नैवेद्यं नमः इति अंगुष्ठानामिकयोगरूपां करद्वयेन नैवे
द्यमुद्रां प्रदर्श्य देवं भुंजानं ध्यायेत् यथा ब्रह्मेशाद्यैः सरस
मभितः सूपविष्टैः समेतो देव्याः सिंजत्कलयकरया सादरं
वीज्यमानः नर्मक्रीडाप्रहसनपरो हासयन् पाकभोक्तृभुं
क्ते पात्रे कनकघटिते षड्रसान् देवदेवः इति ध्यायन् मूल
मंत्रं दशधा जपित्वा जपं समर्प्य नित्यहोमं कुर्यात् अत्र पूजा
स्थानिस्थेशानभागे कुंडस्थंडिले वेदिकायामन्यतमे गोमयोपा
लिप्ते ह्रांवांहृदयायनमः इति हृन्मंत्रेण विष्णुरुद्रादेवताकाः
प्रागग्रास्तिस्रो रेखा ब्रह्मयमचंद्रदेवताका उत्तराग्रास्तिस्रो रे
खाश्च कुशमूलेन विलिख्य मध्ये आवसथ्यं पूर्वे सभ्यं प
श्चिमे आहवनीय उत्तरे अन्वाहार्यं दक्षिणे गार्हपत्यमिति पं
चवह्निस्थानानि संचिंत्य कुशांबुना हूंः वः अस्त्राय फडित्य
स्त्रमंत्रेण प्रोक्ष्य ह्रीं सर्वशक्तिकमलायनमः इति तन्मध्ये यो
गपीठं संपूज्य तत्र भुवनेशीं ऋतुमतीं विचिंत्य तद्योनावाच

सव्यस्थानेशिववीजधिया सूर्यकान्तादिंवमग्निप्रणवेनसंस्था
प्य चित्पिंगलहनहन दह पच सर्वज्ञांज्ञापयस्वाहेतिमंत्रे।
ण कुशैरग्निंप्रज्वाल्य काष्ठैपटुकृत्य अग्निंप्रज्वलितंवंदे
जातवेदं हुताशनं सुवर्णवर्णममलं ह्युपस्थानयोपविश्य
लिंगेस्रूं हिरण्यायैनमः गुदे षूं गगनायैनमः शिरसेश्रूं र
क्तायैनमः मुखेजूं कृष्णायैनमः नासिकायां ल्यूं सुप्रभायै·
नेत्रयो रंञ्जूं वह्निरूपायै सर्वांगे यूं अतिरक्तायै· इतिजिह्वावि
न्यस्य सहस्रार्चिषेहृदयायनमः स्वस्तिपूर्णाय·शिरसेस्वाहा।
उत्तिपुरुषायशिखायैवषट् धूमव्यापिनेकवचायहुं सप्तजि
ह्वायनेत्रत्रयायवौषट् धनुर्धरायास्त्रफट् इतिषडंगेष्वपिवि
न्यसेत् ततः मूर्ध्नि अग्नयेजातवेदसेनमः वामांसे अग्नयेस
प्तजिह्वाय वामपार्श्वे मानयेहव्यवाहनाय·वामकट्यां अ
अग्नये अश्वोदरजाय लिंगेभग्नये वैश्वानराय दक्षिणकट्यां
अग्नयेकौमारतेजसे दक्षिणपार्श्वे अग्नयेविश्वमुखाय दक्षि
णांसे अग्नये देवमुखाय इतिमूर्त्तीरष्टौविन्यस्य गर्भरहितेद
मैरग्निंप्रागादिक्रमेणेत्तराग्रे पूर्वाग्रैश्चपरिस्तीर्य वह्नेर्मुखंष
ट्कोणंविभाव्य तत्रमध्येषट्कोणेषुच मध्यादिप्रादक्षिण्ये
न प्रागग्राः सप्तजिह्वासंपूज्य चतुर्दिक्षुचषडंगानि प्रागु
क्तानिसंपूज्य वह्नेरग्रदलमारभ्य प्रादक्षिण्येनाष्टदलेषु न्या
सोक्ताअष्टमूर्त्तीश्चसंपूज्य मध्येडों वैश्वानरजातवेद इहावलो
हिताक्ष सर्वकर्माणिसाधयस्वाहा इतिमंत्रेणाग्निंगंधादिसं
पूज्य वंमितिधेनुमुद्रयामृतीकृत्य ह्रैं वैकवचायहुं इतिकव

चमंत्रेण प्रदीप्तदर्भद्वयेन तद्घृतं नीराज्य अग्नौ दर्भद्वयं नि
क्षिप्य पुनर्दर्भं प्रज्वाल्य हुंः वः अस्त्राय फडिति त्यस्त्रमंत्रे
ण घृतेप्रदर्श्य प्रोतान्निक्षिप्य ऋजुस्रुवौ तदभावे पलाश
स्य मध्यपत्रद्वयमश्वत्थ पत्रद्वयं वा गृहीत्वाग्नौ प्रजप्य हूं
वैं कवचाय हुं इति कवचमंत्रेण दर्भैः संमार्ज्य पुनः प्र
जप्य हुंः वः अस्त्राय फट् इत्यस्त्रमंत्रेण प्रोक्ष्य दर्भे स्थापि
धाय स्रुवेणाज्यमादाय इत्यग्निर्दक्षिणा नेत्रे हुत्वा अग्न
य इदं न मम इत्युद्देश त्यागं कृत्वा एवं सर्वत्र तत्तन्नाम्नोर्दे
श त्याग ऊहनीय ततः पुनराज्यमादाय ॐ सोमाय स्वाहा
इति वह्नेर्वामनेत्रे हुत्वा पुनरादाय ॐ अग्नीषोमाभ्यां स्वाहा
इति वह्नेर्भालनेत्रे हुत्वा पुनरादाय ॐ अग्नये स्विष्टकृते स्वा
हा इति वह्नेर्जुहुयात् ततः ॐ भूः स्वाहा अग्नय इदं ॐ भु
वः स्वाहा वायव इदं ॐ स्वः स्वाहा सूर्यायेदं ॐ भूर्भुवः स्वः
स्वाहा प्रजापतयेदं न ममेत्याहुति चतुष्टयं हुत्वा ॐ वैश्वा
नर जातवेद इहा वह लोहिताक्ष सर्वकर्माणि साधय स्वाहा इ
त्यग्निमंत्रेणाहुतित्रयं हुत्वा ॐ अग्निगर्भाधानं संपादयामि
स्वाहा इत्यादि गर्भाधान पुंसवन सीमंतोन्नयन जातकर्म
नामकर्मान्नप्राशन चूडाकर्मोपनयन समावर्तन विवाहा
ख्यात् संस्कारान् पृथक्पृथक् अष्टाहुतिभिः कृत्वा पूर्वो
क्त जिह्वादिमूर्तेत देवतानां स्यूं हिरण्यायै स्वाहा इत्यादि
तन्नामभिः चतुर्थ्यन्त स्वाहान्ते रेकैकामाहुतिं कृत्वा ॐ भूर्भु

मै·पा·
३१
31

वोवायवे वांतरिक्षायच महते चस्वाहा ऊँभूर्भुवरादित्या
यच दिवेचमहतेचस्वाहा (जाग्रत्स्वप्न स्वषुप्तिषु) ऊँभूर्भुवः
स्वः चंद्रमसेच नक्षत्रेभ्यश्च महतेचस्वाहा ततः पूर्वप्राणा बु
द्धिदेहधर्माधिकार जाग्रत्स्वप्न स्वषुप्तिषु अवस्थासु मन।
सावाचाकर्मणा हस्ताभ्यां पद्भ्यामुदरेणशिश्नायत्कृतं
यत्स्मृतंयदुक्तं तत्सर्वं ब्रह्मार्पणंभवतुस्वाहा इतिमंत्रेण
ष्टा वाहनीर्हुत्वा वह्निंप्रागवत्संपूज्य ऊँन्यूनातिरिक्तसि
ध्यर्थं तत्सर्वंददामि स्वघृततिलं ऊँअङ्गसांगंकुरुकुरुस्वा
हा इतितिलैरेकामाहुतिंहुत्वा ऊँसहस्रार्चिमहतेजा
नमस्ते वह्निरूपधृक् सर्वाशिवे सर्वगत पावकायनमो
स्तुते त्वंरौद्रघोरकर्माच घोरहात्वंनमोस्तुते विसृसृस्त्वंलो
कपालोसिशांतिमत्रप्रपन्नमे इत्यग्निंप्रार्थ्य घृतेनस्रु
चमापूर्य तदुपरिपुष्पंदत्वा अधोमुखेन स्रुवेणतन्मुखं
विधाय शंखवत्संपुटाभ्यां कराभ्यांगृहीत्वा उत्थाय त
योर्मूलंनाभौनिधाय मूलमंत्रेणवौषडंतेनाहुतित्रयंहु
त्वा प्रोक्षणीजलेनवह्निंपरिषिंच्य मूलमंत्रेण देवंसंपू
ज्य संहारमुद्रया पूजाचक्रे समारोप्य ऊँभूर्भूवह्निमहा
शक्ते सर्वकर्मप्रसाधक॥ कर्मांतेप्यसंप्राप्तेसंनिधिंकुरुमा
चरं इत्यग्निंप्रार्थ्य संहारमुद्रयास्वाहा यद्वासयेत् अत्रैवंवि
ति वसिष्ठसंहितावचनात् लौकिकाग्नौ वेवदेवं ध्यात्वासं

पूज्य मूलमंत्रेण पंचविंशत्याहुतीः षडंगमंत्रैश्च षडाहु
तिरावरणदेवतानामेकैकामाहुतिं चजुहुयात् आवरण
होमाशक्तौ मूलमंत्रेणप्राणायामत्रयं कृत्वा ऋष्यादिकर
षडंगन्यासपूर्वकं मूलमंत्रेण पुष्पांजलित्रयं कृत्वा पू
जाचक्रस्येशानकोणे चतुरस्रवृत्तत्रिकोणमंडलं कृत्वा
तत्रसाधारसर्वव्यंजनान्नोदकं भरितान्ता आदिपात्रं निधाय स
र्वभूतेभ्योनमइति पुष्पादिभिः संपूज्य येरौद्रारौद्रकर्मा।
णोरौद्रस्थाननिवासिनः योगिन्योप्युग्ररूपाश्चगणाना
मधिपाश्चये भूचराखेचराश्चैवतथा चैवांतरिक्षगाः स
र्वेते प्रीतमनसोभूत्वागृह्णन्त्विमंबलिं इतिवामकरांगुलि
भिरर्घ्यपात्रात्पात्रांतरेणोद्धृतजलधारां बलिपात्रेनिक्षिपे
त् बलिमुत्सृज्य पुष्पांजलिमादाय भूतानियानीहव
संति भूतलेबलिंगृहीत्वा विधिवत्प्रयुक्तं संतोषमासाद्य
व्रजंतसर्वेक्षमंतु तान्यत्रनमोस्तुतेभ्यः इतिपुष्पांजलिंदत्वा
प्रणम्य यथासुखंविहरध्वमिति भूतानिनाराचमुद्रयाविसृ
ज्य हवः अस्त्राय फडितिपस्त्रमंत्रेण शुद्धजलैः स्वात्मानंप्रो
क्ष्य देवंतत्रध्यात्वा पात्रांतरेवामिति धेनुमुद्रयाजलमामृ
तीकृत्य अमृतापिधानमसिस्वाहा इतिदेवायोत्तरापो
शानंदत्वा नैवेद्यगतसारमुद्धृत्य नैरृत्यांनैवेद्यपात्रंनिधा
य गोमयाद्भिः हवः अस्त्राय फडितिश्चास्त्रमंत्रेण तत्स्थानंशो
धयित्वा तस्मात्किंचितशेषमादाय निर्माल्यभोजिनेनम इ

भै॰पा॰ त्येशान्यांनिक्षिप्य हस्तेप्रक्षाल्य देवायकरशोधनार्थं सुगंध
३२ चूर्णादिकं करप्रक्षालनाय जलंचदत्वा कर्पूरादिसुवासित।
जलैर्गंडूषानिकारयित्वा कर्पूरशकलैर्दंतधावनंकारयित्वा
पुनर्गंडूषजलंदत्वा पादौप्रक्षाल्य प्राग्वदाचमनंदत्वा सूक्ष्म
वस्त्रेणपादौहस्तौचप्रोक्ष्य सुगंधचूर्णादितमालदलकपूर
पूगभागतरंगितं संशोधितं सुगंधंचतांबूलंप्रतिगृह्यतां ए
तत्तेतांबूलंनमः इतितांबूलंसमर्प्य प्रागुक्तनिवेदनमंत्रेण
निवेद्य मूलमंत्रमुच्चार्य सुप्रसन्नाय श्रीभैरवाय नमः इ
तित्रिःपुष्पांजलिनासंपूज्य पुनर्मूलमुच्चार्य सुप्रसन्नाय
श्रीभैरवायनमएषतेगंधोनमः एवंगंधपुष्पधूपदीपैरा
राधयेदितिप्रसन्नपूजांकृत्वा छत्रचामरविजनादिनाना।
विधानाराजोपचारान्परिकल्प्य दूर्वाक्षतजलान्यादाय मूल
मुच्चार्य श्रीभैरवाय एतत्तेनीराजनंनमः इतिदेवस्यमस्तको
परि दूर्वादिकंनिक्षिप्य मूलमंत्रेणप्राणायामत्रयंकृत्वा ऋ
ष्यादिकरषडंगन्यासपूर्वकं वक्ष्यमाणविधिना संपूज्यादी
य वक्ष्यमाण प्रकारेणदेवामावयन् मूलमंत्रमष्टोत्तरसह
स्रंतदर्धं त्रिशतमष्टोत्तरशतंवाजपित्वा पुनःप्राणायामः
ऋष्यादिन्यासपूर्वकं जपमालां वक्ष्यमाणविधिनाशिरसि
निधाय अर्घोदकमादाय ॐगुह्यातिगुह्यगोप्तात्वंगृहाण
स्मत्कृतंजपं सिद्धिर्भवतुमेदेवत्वत्प्रसादात्वयिस्थिते इतिदे
वस्यदक्षिणहस्ते गृहीतोदकदानेनजपंसमर्प्य वक्ष्यमाण

प्रकारेण जपमालां संपूज्य रहसि निधाय घंटावादनपूर्व
कं भैरवशतनामस्तोत्रादिभिः स्तुत्वा प्रदक्षिणनमस्कारैः
परितोष्य ॐ यद्दत्तं भक्तिमात्रेण पत्रं पुष्पं फलं जलं निवेदि
तं च नैवेद्यं तद्गृहाणानुकंपया आवाहनं न जानामि न जाना
मि विसर्जनं पूजाभागं न जानामि त्वं गतिः परमेश्वरः क
र्मणा मनसा वाचा त्वत्तो नान्या गतिर्मम अंतश्चरेण भूतानां
दृष्टा त्वं परमेश्वर नानायोनिसहस्रेषु येषु येषु व्रजाम्यहं
तेषु तेषु च्युता भक्तिर्भैरवास्तु सदा त्वयि देवो दाता च भोक्ता
च देवास्सर्वमिदं जगत् देवो जयति सर्वत्र यो देवस्सोहमेव हि
इति कृतांजलिः क्षमाप्य पुनः पुनः प्रणम्य स्वेष्टार्थप्रार्थ
नां कृत्वा अर्घ्यपात्रमुद्धृत्य साधु वासाधु वा कर्म यद्यदा
चरितं मया तत्सर्वं भगवान् शंभो गृहाणाराधनं परं इति
कृतमाराधनं किंचित् अर्घ्योदकदानेन समर्प्य दत्वा तत्पा
त्रं स्वस्थाने निवेश्य पुष्पांजलिमादाय ॐ यतः पूर्वं प्राणबु
द्धि देहधर्माधिकारं जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वा
चा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं
यत्कृतं तत्सर्वं श्रीगुरुदेवसमर्पितमस्तु स्वाहा तत्सद्ब्रह्मा
र्पणमस्तु इति देवस्य पादयोः पुष्पांजलिं निक्षिप्य प्रणम्य
पुनः पुष्पांजलिमादाय मूलमुच्चार्य यस्मिन्रूपाश्चदेव
स्य पूजिता यत्र देवता श्रीभैरवांगलीलासंसक्तास्सर्वे सुखा
वहाः इति पुष्पांजलिं निक्षिप्य द्वारदेवताः आवरणादिदेव

भै॰पा॰ ३३ ताश्च देवस्यांगेविलीना इतिविभाव्य देवंतेजोरूपंविभा
व्य श्रीभैरवक्षमस्वेति तालत्रयंदत्वा संहारमुद्रांवध्वा ॐ
गच्छगच्छ परंस्थानं स्वस्थानंपरमेश्वर यत्रब्रह्मादयोदेवा न
विदुः परमंपदं इतिपठित्वा निर्माल्यपुष्पेण सहततेजसमु
द्धृत्य आघ्राय वहंनासापुटजाततेजोब्रह्मरंध्रंनीत्वा सुषुम्णा
मार्गेण ह्रां वां हृदयायनमः इतिहृदयकमलमानीय ॐति
ष्ठतिष्ठपरंस्थानेस्वस्थानेपरमेश्वर यत्रब्रह्मादयःसर्वेसुरा
स्तिष्ठंतिमेहृदि इतिस्वहृदिसंस्थाप्य तत्रयथोक्तरूपंदेवं
ध्यात्वा मानसैरुपचारैःसंपूज्य स्वाभेदेनध्यायन् प्राणा
यामत्रयं ऋष्यादिकरषडंगन्यासान्विधाय तत्रार्घ्यपात्रेगं
धपुष्पान्वितंजलमापूर्य सूर्याभिमुखंस्थित्वा ॐनमो
विवस्वतेब्रह्मन्भास्वतेविष्णुतेजसे नमःसवित्रेशुचयेसवि
त्रेकर्मदायिने इतिपठित्वा ह्रांह्रीं सः श्रीसूर्यायएषतेअ
र्घ्यःस्वाहा इतिसूर्यायार्घ्यंदत्वा कृतांजलिः ॐयत्ताच्छिद्रं त
पश्छिद्रं यच्छिद्रंपूजनेमम सर्वंतदच्छिद्रमस्तुभास्करस्यप्र
सादतः इत्यच्छिद्रमवधार्य पूजास्थानंगत्वा पूजावशिष्टं
गंधंकिंचित्स्ववामकरेनिधाय तत्रार्घ्यपात्रोदकंकिंचित्
निक्षिप्य आलोड्य मूलमंत्रेण सप्तवारमभिमंत्र्य तेनजले
नस्वात्मानंप्रोक्ष्य मूलमंत्रेणनिर्माल्य पुष्पंशिरसिनिधा
य मूलेनैवचरणोदकंप्राश्य नैवेद्यंशिवभक्तेभ्योविभज्य
दत्वा स्वयंभुक्त्वा श्रीभैरवरूपंस्वंविहरेत् इतिनित्यपू

जाविधिः अत्र ब्रह्महापि अशुचिर्भूत्वा निर्माल्यं यस्तु धारये
त् तस्य पापं महत् शीघ्रं नाशयिष्ये महाव्रते स्नपयित्वा
विधानेन यो लिंगस्नपनोदकं त्रिः पिबेत् त्रिविधं पापं तस्य
हाशु प्रणश्यति लिंगस्नपनवाभिर्यः कुर्यान्मूर्ध्नाभिषेचनं
गंगास्नानफलं तस्य जायते त्र विपाप्मनः इति स्कंधपुराणे
शिवनिर्माल्यधारण भक्षणादौ निषेध वचनं तद्दीक्षित
परं निर्माल्यं हि तपो भक्त्या शिरसा धारयिष्यति अशु
चिर्भिन्नमर्यादो नरः पापसमन्वितः नरके पतते घोरे
तिर्यग्योनौ प्रजायते इति स्कंधपुराणे देव अत्राशुचि
रनधिकारी स्नात इति यावत् द्विजानामनुपेतानां स्वक
र्माध्ययनादिषु यथाधिकारो नास्तीह स्याच्चोपनयन
नादतु अथवा दीक्षितानां च मंत्रदेवार्चनादिषु नाधिका
रस्तत्कुर्यात् आत्मानं शिवसंस्कृतमिति कालोत्तरवच
नात् यद्येवं विस्तरान्नित्यपूजां कर्तुमशक्तश्चेत् प्रातरु
त्थाय श्रीगुरुं स्मृत्वा प्रणम्य शौचादिकं विधाय उक्त
विधिना स्नात्वा स्नाने विस्तराशक्तौ निर्माल्यादिनाम्नां त
रं कुम्भमुद्रया मूलमंत्रेण स्वशिरसि रभिमंत्र्य उक्त
विधिना संध्यातर्पणदानानि विधाय तर्पणे विस्तराशक्तौ
मूलमंत्रेणाष्टाविंशतिवारं देवं संतर्प्य सूर्यार्घ्यदाने वि
स्तराशक्तौ केवलसूर्यमंत्रेणैवार्घ्यं दत्वा गृहं दत्वा प्रागुक्तं
पायोत्साधनं विधाय पूजामंडपं गत्वा प्रागुक्तविधिना पू

र्वद्वारमेवसंपूज्य भगवत्प्रविश्यासनंकल्पयित्वासनेविस्तरा
शक्तौ ह्रीँआधारशक्तिकमलासनायनमः इत्यासनेसंपूज्योप
विश्य भगवत् व्यासाद्यभूतशुद्धिंविधाय भूतशुद्धावपिवि
स्तराशक्तौप्रभवद्हृदयेजीवात्मानंध्यात्वा तथैवब्रह्मरंध्रेसं
जौंयोज्य भगवत्पापपुरुषंध्यात्वा तथैवयँबीजेनसंशोष्य रँ
बीजेनसंदह्य वँबीजेनाप्लाव्य पुनर्ब्रह्मरंध्राज्जीवात्मानंहृद
यमानीय भगवत्प्राणप्रतिष्ठांमातृकान्यासाश्चकृत्वा सम
स्तमातृकान्यासकरणाशक्तौकेवलमातृकान्यासे श्रीकंठा
दिन्यासेचतत्राप्यशक्तौ केवलमातृकान्यासेकृत्वा प्राणा
याम योगपीठन्यासमूलमंत्रन्यासांश्चकृत्वा ध्यानात् अर्घ्य
स्थापनादिसर्वं भगवत्समापयेत् पाद्यादिपात्रस्थापनाश
क्तौ अर्घ्यपात्रं प्रोक्षणीपात्रंचसंस्थाप्य प्रोक्षणीजलेनैवे
स्वाद्युरुमुखादिवर्गतव्यः इयंसंक्षेपनोशक्तौप्रकारः शा
न्नामेवशक्तिश्चेदालस्यादिनाविस्तारंत्यक्त्वा संक्षेपतः क्रियते
तदादोषायभवतीति तथाचकुंभसंभवः स्वस्थःसमर्थःकु
र्वीतचोक्तमैरेवसाधनैः मध्यमोमध्यमैरेवत्यूनोन्यूनैस्तपो
यनं आपन्नश्चेत्समर्थोपिन्यूनैरेवसमाचरेत् पूजाकर्म
विशेषेणदेशकालानुसारतः इतिइत्थमपिसंक्षेपपूजा
यां मशक्तावेवसमयंचमानसपूजाकार्या तत्रमानसपूजा
कालसततरंतंत्रेप्रवासे पथिदुर्गेवास्यानाप्राप्तोजलेपिवा ॥

कारागृहनिबद्धो वाप्रायोपवेशगतोपि वा मनोमयेसमस्तपन्नो
सिंहव्याघ्रसमाकुले परमकाग मेचैवकुर्यात्मानसपूजनमि
तितथा मैत्रप्रसाधनंस्नानंयतधावनकर्म वै अन्यच्चसर्वंम
नसाध्यात्वाकुर्यात्सपूजनं यदापुष्पादिभिः पूजावीहै दैर्शं
विधीयते तथारूच्चापिकर्तव्याः सर्वाश्चप्रतिपत्तयः इतिज
लेप्रवहणादौप्रायोपवेशगतः गृहीतानशनव्रतः अन्यच्च
सर्वमिति मैत्रप्रसाधनदंतधावनस्नानव्यतिरिक्तमित्यर्थः
मैत्रादीनांमानसासंभावात् इतिश्रीवघेलकुलकमलप्र
द्योतप्रचंडमार्त्तंडश्रीजैत्रसिंहविरचिते भैरवार्चापारिजाते
पंचमस्तवकः ५ ॥ ॥ अथनित्यपुरश्चरणविधिः ॥
अथनित्यहोमपुरश्चरणविधिः ॥ तत्रपुरश्चरणसंपन्नो मं
त्रोहिफलदायकः किंहोमैः किंजपैश्चैव किं मंत्रन्यासविस्त
रैः रहस्यानांहिमंत्राणांयदितस्यात्पुरस्क्रिया पुरस्क्रियाहिमं
त्राणांप्रधानंबीजमुच्यते बीजहीनोयथादेही सर्वकर्मसुन
क्षमः पुरश्चरणहीनोपि तथामंत्रप्रकीर्तितः इतिवैशंपा
यनेनपुरश्चरणस्यावश्यकत्वाभिधानात् जस्य तु निर्ऋतिर्वि
धिहीनानांफलंहंतितुकर्मणामिति विधिहीनानुष्ठाने निं
दाश्रवणात्तदनुष्ठानविधिर्लिप्यते तत्रश्रीवटुकभैरवमंत्र
स्यपुरश्चरणमुक्तं शारदातिलके वर्णलक्षंजपेन्मंत्रंहवि
ष्याशीजितेंद्रियः तद्दशांशंप्रजुहुयात्तिलैर्मकरसंयुतैरिति
वर्णलक्षमेकविंशति लक्षांत्रिमधुदुग्धघृतमधुशर्करावा
अजपद्यपि जपहोमादेवोक्तोपुरश्चरणत्वेन तथापि तंत्रे

वसामान्यपठलोक पंचांगरूपं पुरश्चरणंजपेत् संसारेडुः
खभूपिष्टयदिच्छेच्छ्रेयमात्मनः पंचांगोपासनेनैवमंत्रजपि
त्वा सुखंव्रजेत् इतिकुलार्णववचनाच्च पंचांगानितुजपहोम
तर्पणस्नाभिषेक ब्राह्मण भोजनात्मकानि पूर्वपूर्वदशां
शतःकार्याणि तत्रादौजपस्थानानि तत्रसमुद्रतीरपर्वत।
शृंगसमुद्रगामिनी नदीतीरविल्वगृहविविक्तनिजगृहगोष्ठा
स्वत्थावलमूलजलाशय पश्चिमाभिमुखवृत्यशून्यशिवाल
यगुरुसन्निधितुलसी वनस्पत्यष्टदेवतासन्निधिपुण्यक्षेत्र
तीर्थ वृन्तोपवननदीह्रदस्वाभिमतस्थानम्लेच्छदुष्टमृगव्या
लशंकावर्जितैः कौतानिंदारहित धार्मिकस्वेष्ट वेधनाभक्त
जनाश्रय स्वभिस्तनिरूपद्रवराजतल्पविवादिगमनागमना
गमन रहितस्थानानि एतेषामन्यतमंस्थानं ग्रामेक्रोशमा
त्रंनगरेक्रोशद्वयं नदीपर्वततीर्थादौपरिमाणरहितंस्थान
माश्रित्य ममामुकमंत्रस्यपुरश्चरश्चरणेपिद्धये ममेयंगस
ते भूमिर्मंत्रोमेसिध्यतामिति मंत्रेण भूमिपरीग्रहंनिधाय
वट्पिप्पलंप्लक्षोदुंवरान्यंतमवृक्षभवान् वितस्तिमात्रात् द
शकीलाकृत्वाऽऽवः अस्त्रायफडितिऽस्त्रमंत्रेणपृथक्पृथक्
अष्टवारमभिमंत्र्य पूर्वाद्यष्टदिक्षु इंद्रेशानयोर्मध्ये निर्ऋ
तिवरुणयोर्मध्ये चोर्द्धादौतुध्यानिधाय हवः अस्त्रायनमः
इतितेषुस्तं प्रतिकीलंसंपूज्य पूर्वादिषु दशादीक्षु इंद्रसांगसा
युधसंपरिवारसवाहन एषतेमाषभक्तवलिंनमः इत्यादिक्या
लेभ्यस्ततन्नाम्ना ततकीलसमीपेमाषभक्तबलिंदत्वा दाद्वे॰

त्रपालायनमः गंगणपतयेनमः वंवास्तुपुरुषायनमः इ
ति क्षेत्रपालं गणेशवास्तुपुरुषात्संपूज्य समसमे भूतले प्रा।
गायतायतां दक्षिणोत्तरायतांश्च चतस्रो रेखा विलिख्य न
वकोष्ठानि कृत्वा तेषु पूर्वादिक्रमेण प्रदक्षिणेन सप्तसु को
ष्ठेषु कचटतपयशाख्यान्सप्त वर्णान्विलिख्य ईशानकोष्ठे
लं क्षौ विलिख्य मध्यकोष्ठं तथैव नवधा विभज्य तेषु पूर्वादि
प्रदक्षिणेन अआइई इत्यादि षोडशस्वरान् द्वंद्वशः क्रमेण
विलिख्य मध्यकोष्ठे श्रीकारं लिखेदिति कूर्मचक्रं निर्माय त
न्मध्यगतनवकोष्ठेषु मध्ये पूर्वाद्यष्टसु कोष्ठेषु चक्रदक्षि
णेन अमृत वृषभ शैलराज वासुकी अर्थकृत् शक्तिपद्म
योनि महाशंख ष्वापाक्षत्राख्यात् नवक्षेत्रपालान् ॐ क्षं अ
मृत क्षेत्रपालायनमः क्षं वृषभक्षेत्रपालायनमः इत्यादि
प्रणवक्षेत्रपालबीजतन्नामा तेन मोचतुर्थी नमोन्तानोद्यादि
भिः संपूज्य ग्रामनामाक्षरयुक्तकोष्ठदिशि कूर्ममुखे तद्दला
भे तदधः पार्श्वद्वय गलकोष्ठद्वयान्यतमे कूर्महस्ते वा पृष्ठे
क्षेत्रमध्ये सर्वार्थसिद्धयः इति तंत्रराजवचनात् मध्यकोष्ठा
त्मककूर्मपृष्ठे क्षेत्रमध्ये वा जपार्थं गृहं शीतवातातपनि
वारणक्षमं कुर्यात् अथ वर्ज्यस्थानानि अकारेण गकारस्या
दिवं ऋस्वरस्य ऊकारेण लृस्वरस्य पकारेण डौकारस्य षका
रेण जकारस्य टकारेण ञकारस्य थकारेण फकारस्य पका
रेण मकारस्य रेफेन यकारस्य सकारेण ऋतमन्योन्यमिति।
यत्र स्थानसाधकयो रायक्षरेणारिवं तत्स्थानं त्याज्यमिति॥

तदुदाहरणं तु अमरकंटकस्थानं गणपतेः गणपतेसाधकस्या
र्विर्भवति गरुडपुराणे अमरेश्वरस्यापि इत्यमन्यत्राप्यूहनीयं अथज
पमाला तत्र पुत्रजीवशंखविद्रुम रत्न मुक्ताफल पद्मवीज सु
वर्ण रजतकुशाग्रंथि रुद्राक्षा इत्यक्षविशेषाः अक्षसंख्या तु सा
त्विकराजसतामसभेदेनाष्टोत्तरशतचतुः पंचाशत्सप्तविंशति
श्चेति अत्र सात्विकास्तास्तु पुत्रजीशंखस्फटिक मुक्ताफल श्वे
त पद्मवीज कुशाग्रंथिरुद्राक्षाः राजसास्तास्तु विद्रुममाणिक्य
रक्तपद्मवीज सुवर्णनिर्मिताः तामसास्तास्तु नरजरगरासभा
दिनानाजंतुविशेषाणामस्थि दंतादिनिर्मितास्तत्तत्प्रयुक्तमयतं
तुनिर्मिताः मारणादिक्रूरकर्मसु तंत्रेषु प्रोक्तास्ते यः कुशाग्रंथि
मालातु ब्राह्मणानामेव कुशा यथा जपे हि प्रइतिवचनात् अ
थमालायाः संस्कारकालमाह तत्र विष्णोर्द्वादशीपूर्वाह्णः श
क्तेरष्टमी नवमी चतुर्दशी रात्रिगणेशस्य चतुर्थी मध्याह्नः ।
शिवस्य त्रयोदशी दिवा सूर्यस्य सप्तमी पूर्वाह्णः अथमालाया
सूत्राणि विष्णोः पद्मसूत्रकर्पाससूत्रं वा देव्याः पट्टसूत्रं शिव
स्योर्णाभवं वाल्कलं च सूर्यगणेशयोः कार्पाससूत्रं पट्टसूत्रं का
र्पाससूत्रं चेत् ब्राह्मणीकृतं स्वसमानवर्णयोग विकृतं वा त्रि
गुणितं त्रिगुणं कुर्यात् अन्येषु सूत्रेषु यथायोग्यमेव कार्य
मिति अथ संस्कारः तत्र गोमय गोमूत्र दुग्ध दधि घृत कुश
जलात्मकं पंचगव्यं संपाद्य पूर्वदिने कृतैकभक्तः साधकः
प्रातः कृतनित्यकृत्यः सूत्रमणीश्च पृथक् पंचगव्येन जले
श्च प्रक्षाल्य नव अश्वत्थपिप्पलदलेषु पद्माकाररचितेषु सूत्र

मणींश्च संस्थाप्य तेष्वप्रणवं भुवनेश्वरीवीजं मातृकाक्षरा
णि च सूत्रे प्रतिवीजं च विन्यस्य मणीन्सूत्रं च गंधादिभिः संपूज्य ।
कुंडादौ नित्यहोमविधिनाऽग्निं संस्थाप्य यथाशक्ति सघृतै
केवलतिलैः केवलघृतैर्वा हुत्वा होमाशक्तौ जपं वा विधाय
सूत्रे रुद्राक्षांश्चैव मुखेन मुखं संयोजयन् यथासुखमन्यमणी
नित्यारोप्यैकैकमणिमध्ये गुरूक्तविधिना ब्रह्मग्रंथिं विधाय
गोपुच्छाकारेण ग्रथयित्वा सर्वतः स्थूलं सजातीयमेकं मणि
सूत्रहृदयमेकीकृत्य मेरुं ग्रथयित्वा ॐ सद्योजातमिति मंत्रे
ण पंचगव्येन शीतलजलेन च प्रक्षाल्य ॐ वामदेवाय नमः
इति मंत्रेण चंदनागुरुकर्पूरकुंकुमैर्विघृष्य ॐ अघोरेभ्यो
थ घोरेभ्यो इत्यगडशीतशर्करागुग्गुलमधुचंदनघृतैर्धूप
यित्वा ॐ तत्पुरुषाय विद्महे इति मंत्रेण गंधचंदन कस्तूरि
कुंकुमकर्पूरैर्लेपयेत् ॐ ईशानः सर्वविद्यानामिति मंत्रे
ण प्रतिवीजं शतं शतमभिमंत्रयेत् मेरुं चानेनाघोरेभ्योथ
इत्यनेनापि चाभिमंत्रयेत् ततश्चावाहनस्थापनसन्निधाप
नसन्निरोधनसंमुखीकरणसकलीकरणावगुंठनामृती
करण परमीकरणानि तत्तन्मुद्राभिर्विधाय प्रागुक्तपंच
भीर्मंत्रैः प्रतिवीजं पंचोपचारैः स्वेष्टदेवतावत्पूजयित्वेत्थं
संस्कृतं मालाजपं कुर्यादिति इति जपमालासंस्कारविधिः
अथ पुरश्चरणकाले विहितानि तत्र मनः संहरणं शौचं मौ
नं मंत्रार्थचिंतनाव्यग्रता निर्वेदश्च वाजपोत्साह क्रोधत्याग
स्ववर्णाश्रमधर्मानुष्ठान परितुष्टिर्नेंद्रियाणिग्रह ब्रह्मचर्याः

भै·पा· नतिकेवलामलकस्नान मंत्राभिमंत्रितजलेनाभिषेक त्रि
३७ श्रवणादिसवनमशक्तौ सकृद्वास्नानं देववर्षिपितृस्वेष्टदेव
तातर्पणं मध्यपत्ररहितपलासपत्रे रचितऽपत्रावल्यां रात्रौ भो
जनं गोविप्रबालादिषु कृपाश्चेति अथतत्कालानिषिद्धति।
अप्रयोजनभाषणे कर्जविभीकार्कस्नुही छाक्रमणप्रतिग्र
हस्ती शूद्रपतितनास्तिकोच्छिष्टयसंभाषण स्नानतर्पणाद्यनु
ष्ठानवक्त्रवस्त्रैकवस्त्रमलिनवस्त्रधारण काम्यकर्मासंकल्पि
तकर्म स्ववर्णाश्रमाविहितकर्माचरण कांस्यभोजनादिवाञ्छो
जनासद्भाषणान्य पूजनकौटिल्यस्तौरासाधुसमागमोस्स्नजल
स्नानोन्मर्दनगीतावाद्यादिश्रवण नृत्यदर्शनोऽष्टविधमथुन
तत्कथालापास्तात स्पर्शन प्राणिहिंसाकंचकोष्णीषधारण
प्रलापकराधावरणकेशमोक्षणशिरः प्रावरणचिंताक्रो
धभ्रमस्वरामनोरथशयनोत्थानगमनोधकारमंगलस्था
पन पादकाधारणपानशय्याधिरोहणपादप्रसारणोत्कटा
सनत्तुजृंभाहिकादिविकलमनस्त्वानाशनप्रौढवादनग्रक्त
शरहितयानि अथजपः सचोचोपांशुजिह्वामानसभेदाच्च
तुर्विधः स्पष्टपदाक्षरोच्चारणेजपउच्चः ईषदोष्ठचालनपू
र्वः किंचित्श्रवणयोग्योपांशुजिह्वामात्रेस्पंदेनजपोजिह्वा
जपः मानसापदाक्षराणामनुच्चारणं मानसः उच्चादीनामु
त्तरोत्तरफलपौष्कल्यं दशशतसहस्रानंतगुणाइति अथास
नानि तत्रव्याघ्रचर्ममृगाजिनविनिर्मितंकंबलकुशरचित
दारुमयकटरक्तपट्टवस्त्रास्वकानिविहितानि अथानिषि

ज्ञास्तिनानि वंशरचित दारुमय पाषाण तृण पल्लवेष्टिका
निर्मितानि केवलभूतलं चेति अथपुरश्चरणारंभपूर्वदिन
कृत्यं तत्रप्रातस्नात्वा नित्यक्रियांनिर्वर्त्य ब्राह्मणान्भोजना
दिभितोषयित्वा स्वगुरुमपि वस्त्राभरणधनधान्यादिभिः संतो
ष्य जपस्थाने त्रिकोणवृत्तचतुरस्रमंडले क्षौं क्षेत्रपालायन
मः क्षेत्रपाल इहागच्छ गच्छेति क्षेत्रपालमावाह्य उक्तमंत्रे
ण क्षेत्रपालंगंधादिभिः संपूज्य तदग्रे त्रिकोणमंडले साधार
मान्नव्यंजनोदकपूर्णं बलिपात्रं निधाय एहि एहि विदु वि
घुरु२ जंभय२ नर्तय२ विस्तु२ महाभैरव क्षेत्रपाल ब
लिं गृह्ण२ स्वाहा इतिमंत्रेण बलिंदत्वोपवसेत् अथजपा
रंभदिनकृत्यं तत्र शुभे मासि चंद्रतारानुकूले तिथि वार
नक्षत्रादिशोधिते स्तुदिवसे प्रातस्नात्वा संध्येभूतान्यहक्ष
या पवनोदिक्पतिर्भूमिराकाशंखेचराचरं ब्रह्मशासन
मास्थाय कल्पध्वमिह संनिधिं इति पठित्वा ताम्रपात्रे
कुशातिलाक्षत जलान्यादायोदङ्मुखः ॐ अद्यामुकौमा
से अमुक राशीगते सवितरे अमुकपक्षे अमुकतिथौ भार
तवर्षाख्य प्रभोदेशे विशेषक्षेत्रे चेदमुक क्षेत्रे ऽमुकशर्मा
क्षत्रियश्चेदमुकवर्मा वैश्यश्चेदमुक गुप्तः शूद्रश्चेदमुकदा
सः अमुकमंत्रसिद्धिकामः इयद्युक्तसंख्याजपात्मकं पुरश्च
रणंकरिष्ये अद्यारंभ्यैतावद्दिनैरहंकरिष्ये इति केचित्।
इतिसंकल्पंविधाय गुरुगणपतिदुर्गामातॄन्नत्वा पूजां स
माप्य जपमारभेत् तत्र मूलमंत्रेण प्राणायामत्रयं कृत्वा।

मूलमंत्रस्य करषडंगन्यासान्विन्यस्य हृदि देवं ध्यायेत् जपमालां
वामहस्ते कृत्वा चित्पात्रे वा संस्थाप्य अर्घोदकेन संप्रोक्ष्य ॐ मां
माले महामाये सर्वशक्तिस्वरूपिणि चतुर्वर्गस्त्वयि न्यस्तस्त-
स्मान्मे सिद्धिदा भव ह्रीं सिद्ध्यै नमः इति गंधपुष्पाक्षतैर्मालां
संपूज्य ॐ गं अविघ्नं कुरु माले त्वमिति मंत्रेण दक्षिणहस्ते-
न मालामादाय स्वशिरसि श्रीगुरुं कंठे पीपैवर्णां मूलमंत्रं हृ-
दयेषो भैरवं गुरुपादयो स्वात्मानं च ध्यात्वा भ्रूमध्यस्थाज्ञा
चक्रोडक मंत्रदेवतात्मनामैक्यं विभाव्य कंठस्थाविशुद्धि
चक्रे तत्त्वत्रयमेकीभूतं सुषुम्णावर्त्मनानीय तत्र देवं ध्यात्वा
मूलमंत्रेण हृदयस्थानाहतचक्रमानीय तत्रापि देवं ध्या-
यन् हृदयसमीपे मालामानीय दक्षिणहस्तस्य मध्यमांगु-
लिमध्यपर्वणि संस्थाप्य एकचित्तो भुग्रग्रीवोन्नतगात्रः क-
टूनीलतरहितः खटखटादिशब्दमकुर्वन् मंत्रार्थगतचि-
त्तो मालायाः प्रतिबीजं मंत्रमुच्चरन्पूर्वबीजजपसमये अ-
परबीजमस्पृशन्नुच्चारणपूर्वकं मंत्रमारभ्य प्रातःका-
लात्संध्यादिनावधि देशाप्कपद्रवसंभावनायां त्वरयासमाप-
नीये वा प्रहरत्रयावधि जपित्वा सर्वशेषावृत्त्यंते पुनः प्रण-
वमुच्चार्य जपं समाप्य त्वं माले सर्वदेवानां प्रीतिदा सुख-
दा सदा शिवं कुरुष्व मे भद्रे यशो वीर्यं च सर्वदा ह्रीं सिद्ध्यै
नमः इति मंत्रेण मालां स्वशिरसि निधाय पुनः प्राणायाम-
त्रयं कृत्वा ऋष्यादिकरषडंगन्यासान्विधाय अर्घोदके-
न प्रागुक्तमंत्रेण जपं समर्प्य प्रागुक्तमालामंत्रेण मालां सं।

पूज्य रहसि स्थापयेत् ततो मध्याह्नादिकं विधाय पुनः पूजां विस्तरतः कृत्वा प्रतिदिनहोमपक्षे जपदशांशकल्पोक्तद्रव्यैर्वक्ष्यमाणविधिना संस्कृतैर्ग्नौ हुत्वा होमदशांशतर्पणदशांशमार्जनं मार्जनदशांशं ब्राह्मणभोजनं च प्रत्यहं कुर्यात् प्रतिलक्षहोमपक्षे एकलक्षसंख्यं जपं समाप्य तद्दशांशहोमादिकं कृत्वा अग्रिमलक्षजपमारभेत् कल्पोक्तसंख्या। जपसमाप्त्यनंतरं होमपक्षे कल्पोक्तसंख्यं जपं समाप्य पश्चात् दशांशहोमादिकं कुर्यादिति पक्षत्रये एकः पक्षः कार्यः। होमपर्यायस्त्वग्रे वक्ष्यते होमाशक्तौ ब्राह्मणे पुरश्चरणजपसंख्या चतुर्गुणजपः कार्यः तद्दशक्तौ द्विगुणः तत्राप्यशक्तौ होमसंख्या चतुर्गुणजपः तत्राप्यशक्तौ होमसंख्या जपो वा कार्य इति क्षत्रियवैश्यद्विजभजेतरशूद्राणां षड्गुणाष्टदशगुणजपो होमाशक्तौ द्विगुणपक्षे तु गुणा च तुर्गुणा पंचगुणान्प इति द्विजभक्तशूद्राणां द्विजस्त्रीणां क्षत्रियाश्रितशूद्राणां क्षत्रस्त्रीणां वैश्याश्रितानां शूद्राणां वैश्यस्त्रीणां च तत्तद्वर्णविहितजपः स्त्रीशूद्राणां होमाधिकारा जप एव विहित इति इत्थं होमं विधाय चंदनकर्पूरादिवासितैर्होमसंख्यादशांशतः प्रागुक्तविधिना जले देवं ध्यात्वा संपूज्य संतर्प्य स्वात्मानं देवतारूपं ध्यायन् कुंभमुद्रया मूलमंत्रांते आत्मानं मभिषिंचामि नमः इति होमसंख्यादशांशतः स्वमूर्द्धन्यभिषिंच्य अभिषेकसंख्या दशांशसंख्याकान्स्वेष्टदेवताभक्तान्सदाचारान्याञ्चा ब्राह्मणान्।

प्रातनिर्मच्यकृत्य अभ्यंगादिनास्नापयित्वा वस्त्रगंधादिभिर
लंकृत्वा षट्रसैर्नानाविधैर्भक्ष्यभोज्यैस्वेष्टदेवताबुध्याभोज
यित्वा तांबूलंदक्षिणादिभिपरितोषविसृजेत् प्रत्यहंलक्षांते
वासमसंख्यासमाप्तौवाभक्तिपूर्वकंकुर्यादिति ततःप्रकृतेम
ध्याह्नपूजानंतरं वैश्वदेवादिकर्मादिकंविधाय स्वेष्टदेव
तामंत्रजपध्यानकीर्तनश्रवणादिनाशेषदिनंनीत्वा शक्तौ
सायंतनस्नानंविधाय देवंसंपूज्य भुंजीत तत्रभोज्यानि
स्मुलौकविधाक्षिन्नहैमंतिकनीवारयष्टिकाकंगुथवा स्मू
द्रातवहताः पादाभ्यासैमनुतल्यावहताः गुडवर्जितमैक्ष
वंतिलकुल्समुद्गकलापकैमुकवर्जकदंव विशेषनालिके
र कदलीफललवलीफलसामामलकाईक रहितकी वा
लुक कालशाकहिलमोचकासैंधवसामुद्रलवण उद्धृतसारा
रिगव्यानि पिप्पलीजरकतांगनातिंतलीमूलकानि अथवर्ज्या
नि गुडकृत्रिमलवणक्षारलवणाक्षिन्नपर्युषित निस्नेहकीटा
दि दूषितकांजिकगृंजनविल्वकारंजलसुनमृणालकोद्रव मं
डूकतैलपक्व माषमसूरचणकयोगोधूमदेवधान्यादीनि ।
अतिभोजनं दिवाभोजनंच अथभोजनपर्याय तत्रस्वेष्टदेवता
प्रसादमन्नंमध्यपत्ररहित पलाशपत्रैः कलितपत्रावल्यांसं
स्थाप्य मूलमंत्रेणप्रोक्ष्य प्रतिद्रव्यंमूलमंत्रेणसप्तधाभिमंत्र्य
हितंमतं ह्रौंवांहृदयायनमः इतिहृन्मंत्रेणस्वीयीत् मूलमं
त्रेणद्वात्रिंशद्वारमभिमंत्रितंजलंचपिवेदिति अथशयनं तत्र

कुशनिमित्तायां शय्यायां प्रक्षालितायां क्षारादिभिः प्रक्षा।
लितं वस्त्रमास्तीर्य शय्यां मूलमंत्रेण सप्तवारमभिमंत्र्य ॐ
यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति दूरंगमं ज्योति
षां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु १ येन कर्माण्यप
सो मनीषिणो यज्ञे कृण्वंति विदथेषु धीराः यदपूर्वं यक्षमंतः
प्रजानां तन्मे मनः शिवसंकल्पमस्तु २ यत्प्रज्ञानमुत चेतो
धृतिश्च यज्ज्योतिरंतरमृतं प्रजासु तन्मे मनः शिवसंकल्पमा
स्तु यस्मान्न ऋते किंचन कर्म क्रियते त० ३ येनेदं भुवनं भवि
ष्यत्परिगृहीतममृतेन सर्वं येन यज्ञस्तायते सप्तहोता तन्मे
मनः शिवसंकल्पमस्तु ४ यस्मिन्नृचः सामयजूंषि यस्मि
न्प्रतिष्ठिता रथनाभाविवाराः यस्मिंश्चित्तं सर्वमोतं प्रजानां त
न्मे मनः शिवसंकल्पमस्तु ५ सुषारथिरश्वानिव यन्मनुष्या
न्नेनीयतेऽभीशुभिर्वाजिन इव हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे
मनः शिवसंकल्पमस्तु ६ इति मंत्रान्त्रिः पठित्वा ॐ भगव
न्देवदेवेश शूलभृद्वृषवाहन इष्टानिष्टे समाचक्ष्व मम सुप्त
स्य शाश्वत ॐ हिलिहिलि शूलपाणये स्वाहा नमोऽजाय त्रिने
त्राय पिंगलाय महात्मने वामाय विश्वरूपाय स्वप्नाधिपत
ये नमः स्वप्ने कथय मे तथ्यं सर्वकार्येषु विशेषतः क्रियासि
द्धिं विधास्यामि त्वत्प्रसादान्महेश्वर ॐ नमः सकललोकाय
विश्वे प्रभविष्णवे विश्वाय विश्वरूपाय स्वप्नाधिपतये नमः
इति मंत्रांश्च सकृत्पठित्वा प्राक्शिरा दक्षिणपार्श्वशायी स्वप्नं
परीक्षेत तत्र स्वप्नानां प्रथमे प्रहरे दृष्टस्य स्वप्नस्य वर्षेण फ

मे॰पा॰ लंद्वितीयेषड्भिर्मासैः स्तृतीये मासत्रये एगचतुर्थे मासेन स
४॰ ग्रफलं ज्ञेयमिति अथ सिद्धिसूचकस्वप्नाः प्रसादस्तुमस्व
स्वेष्टदेवता गुरु निर्मल चंद्र सूर्य्य मंडल गंगागोदासरस्वती सं
न्यासी शिवलिंगानां दर्शनं भूमिलाभ रक्तसमुद्र तरण युद्ध ज
य जपहोमवह्निपूजन हंस चक्रवाक मयूर सारस रथारो
हण कन्याछत्र रथ दीप प्रासाद पद्म गज वृष माल्य सामु
द्र सर्प फूलवृक्ष पर्वत पवित्रामसमांसतुरगसूर्यवेश्यादर्श
नं नदी तरस्या काशगमन ग्रहनक्षत्र दर्शन हर्म्य प्रासाद
शिखर गजाश्च वृषतरु पर्वत शिखरारोहण विमान ग
मन लाभ देवी दर्शनानि मदरापान समांसभक्षण कृमि
पुरीषाणलेपन रक्ताभिषेक दधिभक्त भोजन स्वेतवस्त्रा
नुलेपन सिंहासन रथयान ध्वज राज्याभिषेक रत्नाभरणा
दिदर्शनानि अथाशुभसूचकः चांडाल कलम काक शून्य
गर्त्तीमलद्रव्य तैलाभ्यक्त नग्न शुष्क वृक्ष कंटकतरु तलरहि
त प्रासाददर्शनेरागदं तत्रप्रायश्चित्तंन्नसिंहमंत्रंपठित्वा दुः
स्वप्नसूचितान्देवायैन् जहिजहि पुनर्नृसिंहमंत्रंपठित्वाखा
हा इत्यष्टोत्तरशतं घृतैर्जुहुयात् अथवा एवमेवास्मंत्रे
णहोमः कार्यः नृसिंहमंत्रस्तु वर्णान्त्यं वह्निसंस्थतमनु
स्वारविभूषितं विंदुनादयुक्तं प्रोक्तं वीजं नरहरेः शुभमित्यु
क्तं अस्यमंत्रस्तुमूलविद्यायाः अथस्वप्ननिवेदनं तत्रगुरु
रोरन्यत्रनप्रकाशयेत् स्वप्नं निवेदयेत् गु

हर्षणं अकस्माद्यदि जायेत न व्योतव्यं गुरोर्विंतेतिवच
नात् अथसिद्धिचिह्नानि चित्तप्रसादो मनस्तुष्टि स्वल्पाश
ननिद्राजपज्योतिर्दर्शनानूस्मादतिहर्षोतरित्तस्थ दुंदुभि
पाद मधुरवाद्यनानागीतश्रवण कर्पूरादि सरोयपरिम
लाघ्राण चंद्रार्ककिरणाकीर्णाकाशालोकनानि ॥ इ
तिश्रीभैरवार्चापारिजाते षष्ठस्तवकः ६ ॥ ७ ॥ ॥
अथमंत्रसिद्धेरन्यपर्यायः तत्रशशिसूर्योपरागे त्रिरा
त्रमेकरात्रिंवापूर्वमुपोष्य तदशक्तावेकभक्तंवाविधाय
ग्रहणंदृष्ट्वा स्नानंविधाय अद्यामुकोमासेऽमुकराशिग
तेसंवित्सरे अमुकपक्षेऽमुकपक्षेऽमुकतिथौ भारतव
र्षीख्ये भूप्रदेशेअमुकतीर्थे सूर्यग्रहणे चंद्रग्रहणे वा अ
मुकगोत्र अमुकशर्मेत्यादि अमुक मंत्रसिद्धिकामः अमु
कग्रहणेतत्समयमारभ्य विमुक्तिपर्यंतं अमुकमंत्रजप
महंकरिष्ये इतिसंकल्पंकृत्वा विमुक्तिपर्यंतंजपेत् ततोग्र
हणकालीनं जपदशांशहोममहंकरिष्ये इतिहोमसंक
ल्पः होमाशक्तौ प्रागुक्तवज्जपः कार्यः अपरस्तुमंत्रसिद्धि
पर्यायः तत्रअद्येत्यादि अमुकमंत्रसिद्धिकामः कृष्णाष्ट
मीमारभ्य तच्चतुर्दशीपर्यंतं अमुकमंत्रस्यायुतचतुष्ट
यजपतद्दशांशहोमादिसहितपुरश्चरणजपमहंकरिष्ये।
इतिसंकल्पंविधायायुतचतुष्टयजपं सप्तधाविभज्य प्रत्य
हंचतुर्दशोत्तरसप्तशताधिकसहस्रपंचकजपित्वांतिमदिने
षोडशोत्तरशप्तशताधिक सहस्रपंचकंजपेदित्येवमयुत ॥

मै·पा·
५८

चतुष्टजपं कृत्वा तद्दशांशहोमादिकं कुर्यादिति अन्यप्र
कारस्तु क्रमोत्क्रमान्मातृकासम्पुटितंमंत्रं प्रतिदिनशतंशतं।
मासमात्रंजपेदिति अत्रापि अद्येत्यादि क्रमोत्क्रममातृका
पुटितमंत्रस्य प्रतिदिनंशतंशतसंख्यजपमहंकरिष्ये इतिसं
कल्पंविधाय प्रतिदिनंजपेत् अत्रशतशब्दोन्यूनसंख्या अव
च्छेदकः अष्टोत्तरशतसंख्यंजपेदित्यर्थः मातृसंपुटप्रकारस्तु
अंआंइंईंउंऊंऋंॠंऌंॡंएंऐंओंऔंअंअः कंखंगंघंङंचंछं
जंझंञंटंठंडंढंणंतंथंदंधंनंपंफंबंभंमंयंरंलंवंशंषंसंहंळंक्षं
रामलैं क्षैं संषंशंवंलंयंरंमंभंबंफंपंनंधंदंथंतंणंढंडंठंञंकंजं
छंचंङंघंगंखंकंअंऔंओंऐंएंॡंऌंऊंउंईंइंआंअं इतिशतवारंमू
लमंत्रंजपेत् इतिअपरस्तुतत्रक्रमोत्क्रमभूतलिपिपुटितमूल
मंत्रमष्टोत्तरसहस्रं मासमात्रं प्रतिदिनंजपेत् संकल्पस्तु पू
र्ववद्देवभूतलिपिस्तु अंइंउंऋंऌंएंऐंओंऔंहंयंवंरंलंङं
कंखंगंघंङंजंचंछंजंझंणंटंठंडंढंनंतंथंदंमंपंफंभंवंशंखंशं
रंमंसंषंसंवंभंफंपंमंदंथंथंतंनंढंटंठंणंजंहंछंचंजंगंघंखंकं
ङंलंवंरंहं औंओंऐंएंलंऋंउंइंअं इतिमूलमंत्रमष्टोत्तरश
तंवाप्रतिदिनंमासमेकं अष्टोत्तरशतं गुरुजप्तमंत्रपरमिति
तेयं प्रकारान्तरस्तु अद्येत्यादि अमुकमंत्रसिद्धिकामोरा
त्रौत्रिकालपूजनंकरिष्ये इतिसंकल्पंकृत्वा वत्सरमात्रं
प्रतिदिनंरात्रौत्रिकालपूजनं सर्वोपचारैर्देवेशं वरणेपूज
येत् एवंषण्मासंवात्रिमासंवापूजयित्वा पुरश्चरणमंत्रे
णाभिमंत्रसिद्धिर्भवतीति अन्यस्तु मंत्रवर्णौषधिविनि॰

र्भितं मंत्रमेवर्णसमसंख्यां गुलिकानां धारणं विलेपनं तभिः
पूजातत्काथजलेन भस्मधारणं च कुर्यात् तेन मंत्रसिद्धि
र्भवति वर्णौषधयस्तु चंदनरक्त चंदनागुरुकर्पूरोशीरक
ष्ठवालकुंकुमकंकोलजातिफलजटामांसीमुरचोरग्रंथिगो
रोचनायत्रपिप्पलविल्वपृष्ठपर्णी चित्राकलवंग तगरकट्ट
लववदिन्दुंबरपाषाणभेदपद्मशंख पुष्पी मयूरशिखा
लज्जाग्निमंथसिंहीकुशकुश शंखपुष्पी रोहिणीश्येनाक
वृहतीपाटलमूषकपर्णी तुलसीपामार्ग दूर्वली भृंगराज
अपराजिता तालमूलीकृतांजलि दूर्वा श्रीदेवीकुमारीभा
र्गीभद्रखलेत्येकपंचाशत्दौषधयः क्रमादकारादिक्षकारां
तैकपंचाशद्वर्णानामिति अपरप्रकारश्च भूर्जपत्रेगोरो
चनानिगंधादिभिरष्टदलपद्मविरच्य तत्कर्णिकायां साधक
नामवर्णविदर्भितं मंत्रमालिख्य तेसकलं नाम प्रणवं च विलि
ख्य पत्रेषु हंसः त्रयेण स्वरान्विलिख्य गुलीकृत्य पवित्रे
मृदासंवेष्ट्य मकारत्रयपूरितस्वल्पमृत्पात्रे निक्षिप्य क्षीर
पूर्णनूतनकुंभे सयंत्रगुलिचातत्पात्रं निक्षिप्य प्रागुक्तविधि
नाग्निकुंडादौ संस्कृत्य तत्समीपे तं कुंडं संस्थाप्य ॐ अद्ये
त्यादि अमुकमंत्रसिद्धिकामो विद्यासाधयोरैक्यं तु सिद्धयर्थ
मष्टोत्तरसहस्रमष्टोत्तरशतं वामधुरजप होममहं करिष्ये
इति संकल्पोपास्य विधायोक्तसंकल्पसंख्यं निस्तत्वाहुतिं क
र्मप्रातस्तु वलयं कुर्यात्संनिदिपन् कृत्वा तं कुंभं जलाश

मे.पा. योतिसिध्य गृहंब्राह्मणादिश्चान्नादिभिस्तोषयेदिति एवंकृ
४२ तेपिनसिध्यति तदामंत्रस्यश्रावणादिकंकुर्यात् तत्रश्रावणं
वहृणवीजग्रथितं मूलमंत्रं कर्पूरकुंकुममनसिलागोरो
चनोसीरैः पूजाचक्ररूपयंत्रमध्येविलिख्य कस्मिन्नपित्पात्रे
दुग्धमधुजलानेकीकृत् इति अथवोधनं ततसौमभवती वा
तिवीजंपठित्वा मंत्रजपरूपंसंपुटंतनामाद्यंतेकृतोमित्रः
संपुटनाम्राङ्गचार्यकाऽत्युक्तनामान्नमूलमंत्रः अथव
शीकरणं तत्रभूर्जपत्रे रक्तचंदनदारुहरिद्रा कस्तूरी
मनशिलाभिर्मूलमंत्रमालिख्य कंठेधारयेदिति अथपी
डनं तत्रअधरोत्तरभागैवेनमंत्रपदानिप्रजप्य देवताम
प्यधरोत्तरभावेनध्यात्वा अर्कदुग्धेनमंत्रमालिख्य तत्पा
त्रेनाक्रम्याधरोत्तरक्रम परितमंत्रेणहोमंचकुर्यादिति।
अथपोषणं तत्रवालाबीजै पठितंमंत्रं गोदुग्धमधुभ्यां
भूर्जादौविलिख्य कंठेधारयेदिति अथदाहनं तत्रपला
शवीजतैलेन वह्निवीजसंपुटितंमंत्रस्यैकैकमक्षरो व
लिख्य प्रातवर्णे चापश्चोर्द्धंचवह्निवीजमालिख्य कंठेधा
रयेदिति विदर्भलक्षणंशारदातिलके मंत्राणिद्वंद्वमप्य
स्यं साध्यनामाक्षरंलिखेत् विदर्भएषविज्ञेय इतिएको
तरंत प्रथनामिति चात्रारंभ्रपुरश्चरणव्रतस्याशौचादि
संभवेपि नजपवाधः यदुक्तंश्रीविष्णुना यज्ञव्रतविवा
हेषुश्राद्धेहोमेर्चनेजपे प्रारब्धेसूतकंनस्यादनारब्धेत

सूतकम् प्रारंभो वरुणं यज्ञे संकल्पोव्रतजातयोः नां
दीमुखं विवाहादौ श्राद्धे पाकपरिस्क्रियेति वस्तुतस्तु तां
त्रिकदीक्षावतां आशौचसंभवेपि नित्यार्चनादिवाधो नास्ति
जपो देवार्चनविधिः कार्यो दीक्षान्वितैर्नरैः नास्ति पापं य
तस्तेषां सूतकं चायतात्मनामिति देवीयात् मलवचना
त् सूतके मृतके चैव धूमोङ्कारादिके तथा नप्यं चार्च्यंत
था कुर्यान्मंत्रं चन्यासपुरःसरमिति मृडानीमंत्रवचना
त् उपासते तु विप्राणां मंगाम्शुद्धिः प्रजापतेरिति नारदपं
चरात्रवचनात् अशुचिर्न महामायां पूजयेत्तु कदाचने ।
त्यादि कालिकापुराण युक्तवचनानि नैमित्तिकं वा मपू
जानिषेधपराणि सूतके वापि वर्त्तमाने तु नारदे कामतः
पूजिते मंत्रे सिंह मंत्रस्य भक्तितः शतत्रयवकामाद्य प्राय
श्चित्तविधौ जपेदिति नारदपंचरात्रे नैमित्तिकार्चने प्राय
श्चित्तविधानाधिति तथा तत्वसारसंहितायां आतुरीसूत
के चैव त्रासी दौर्वोधकी तथा साधनाभाविते चेति पंचधावि
षतेपुनः यदि लंघनपर्यंतो व्याधिरात्मनि दृश्यते तदा पू
जानकर्त्तव्या स्थंडिले प्रतिमासु च न स्नानं दंतकाष्टं वा कुर्या
द्धोममथापि वा रविमंडलमालोक्य प्रतिमामथवा पुनः मू
लमंत्रं सकृत् जप्त्वा पुष्पं साक्षात् समुत्क्षिपेत् आंतो व्याधिभि
रत्युग्रैः क्लांतश्चैवोपवासकैः निजसामयिके वापि स्वकर्त्त
व्यं समाचरेत् स्नात्वादेवमथाग्नीश्च गुरून्विप्रान्प्रपूज्य च ए
तावान्कालविछिन्ना पूजायुस्मत्प्रसादतः नदोषोस्तिति संप्रा

ध्यपुनः पूर्ववदाचरेत् अथसूतकिनः पूजांवदाम्याग
मचोदितां स्नात्वानित्यंचनिर्वर्त्यमानस्यक्रिययातुवै वा
सपूजाक्रमेणैवस्नानयोगेनपूजयेत् यदिकामोनचेत्का
मीनित्यंपूर्ववदाचरेत् आस्नतोवक्ष्यतेपूजायथैवागमवे
दिना लब्धवायदिवालब्धमर्घ्यपात्रादिसाधनं पूजोदकेन
कर्त्तव्यानचेत्तोपचर्यते तदासंपूजयेदेवंभावनाकुसुमा
दिभिः देवोदकेप्रवक्ष्यामिपूजामागमबोधितां मूर्तिस्तेवा
लवृद्धायातुवैधाइतिभाषिताः रत्नमंडपधर्मादिचतुष्कमु
रगोभज मूलमूर्तिषडंगानितेषांपूजाविधीयते अन्येषा
मपिसर्वेषांप्रोक्तासंक्षेपकर्मणि सर्वेषामेववस्तूनांअला
भेश्यवैनैवहि निर्मलेनोदकेनाथपूर्णितेत्याहनारदः तथा
पुनस्त्रिधापूजाउत्तमाधममध्यमाः अधिकारीनिमित्ताभ्यां
विषतेणंतदापुनः यागोपकरणैःकान्तैः क्रियमाणेतमा
मतः यदालब्धैर्विनिष्पाद्यैःपूजातुमध्यमाः पत्रंपु
ष्पांबुनिस्वाद्यपूजाचाधमसंज्ञकाः विदिताखिलवेदार्थैः
ब्रह्मर्षिभिरकल्मषैः क्रियमाणातुयापूजासात्विकी सा
विमुक्तिदा राजर्षिभिस्तपोनिष्ठैर्भगवत्तत्त्ववेदिभि यापूजा
क्रियतेसम्यग्राजसीसासुखप्रदा स्त्रीबालवृद्धमूर्खाद्यैर्वे
द्यैस्तुदुष्टमानसैः यापूजाक्रियतेनित्यंतामसीसाप्रकीर्त्ति
ता तथा आराधनसमर्थश्चेद्दृष्ट्वादर्चनसाधनं योदातुंनै
वशक्नोतिकुर्यादर्चनदर्शनं नैकंतुयस्यविद्येतसोप्योपा
त्मोवनान्यथा यस्तुभक्त्याप्रयत्नेनसम्यक्संपाप्नोचखिलं ॥

साधनैश्चार्चयेद्विद्वान्समग्रफलंलभेत् योऽर्चयेद्विधिवद्भ
क्त्या परानीतैश्च साधनैः पूजाफलार्द्धमेवास्य न समग्रफलं ल
भेत् तथागतः स्वस्थः समर्थः कुर्वीत चोत्तमैरेव साधनैः म
ध्यमो मध्यमैरेव न्यूनो न्यूनैस्तपोधनः आपन्नश्चेत्समर्थोपि
न्यूनैरेव समाचरेत् पूजाकर्मविशेषेण देशकालानुसारतः।
भविष्यपुराणे विभवे समयो मोहान कुर्याद्विधिविस्तरं न त
त्फलमवाप्नोति प्रलोभाक्रान्तमानसः कालिपुराणे परकी
यास्तथाघ्रातास्तेयेकृत्याभिमर्दितान् गंधपुष्पं च धूपं च
उपचारांस्तथापरान् घ्रातान्निवेद्य देवेभ्यो नरो नरकमाप्नु
यादिति अथ समायाचारः तत्र प्रयोगसागरे देवस्थाने
गुरुस्थाने श्मशाने वा चतुष्पथे पादुकासनविराटसूत्रमै
थुनानि विवर्जयेत् देवं गुरुं गुरुस्थानं क्षेत्रं क्षेत्राधिदेवता
सिद्धिसिद्धपदिवासाश्च स्त्रीपुंवत्समुदीरयेत् प्रमत्तामत्तयज्ञां
कन्यां पुष्पितां पतितां स्तनौ विरूपां मुक्तकेशीं च कामांतां च न
विंदयेत् एतादृशीरपि न विंदयेदित्यर्थः कन्यायोनिपशु
क्रीडादिवस्त्रांप्रकसनीं नालोकयेत्परद्रव्यं परदारांश्च वर्ज
येत् धान्ययोगुरुदेवाग्निविद्याकोशनरान्व्रति विद्यापुस्त
कं नैव प्रसारयेत्पादौ नैतानपि च लंघयेत् आलस्यमदसं
मोहशाठ्यपैशून्यविग्रहात् असूयामात्ममात्मानं परनिं
दां च वर्जयेत् आलस्यमनुपमं मंदः विद्याधनभिजात्य।
सैयसमुत्थितो मनसउल्लासः मोहो मिथ्याभिनिवेशः शा
ठ्यं शक्तिगूहं नपैशून्यं परोक्षे परदोषप्रकाशनं असूया

गुणेषु दोषारोपः आत्माने सन्माने आत्मनिशाक्य पूज्यव
द्भिः लिंगिनं व्रतिनं प्रवेदवेदांगसंहितां पुराणागमशास्त्रा।
णि कन्यास्थापिन दूषयेत् वेदांगानि प्रसिद्धानि संहिताम
न्वादिगुणितन्स्मृतिशास्त्राणि आगमशास्त्राणि शिवशुक्रया
मलादीनि कल्पास्तु तः समर्थात् युगं मुशलमस्मानं दा
मचुलीमुलूखलं सूर्यसमार्जनी दंडं ध्वजं वैडूर्यमायुधं क
लशं चामरं छत्रं भृंगारं दर्पणं तथा भोगयोग्यानि यागद्र
व्याणि यानि च महास्थानेषु वस्तूनि यानि वा देवतालये
दिव्योक्तानि पदार्थानि भूतविष्टानि यानि वै लंघयेन्नात्
नैतानि श्रेपत्रपदास्पृशेत् यागोप्यालोकविद्विष्टा याच
स्वैरविसर्पिणि परहिंसात्मिका याच न तामवतरे क्वचित्
प्रतिगृह्णेन गृह्णीयात् तं दात्मभोगविधित्सया देवतातिथि
पूजार्थं यत्नतो पार्जयेद्धनं धारयेदार्जवं सत्यं सौत्रीत्वं सम
तां धृतिं क्षांतिं दयामनास्यां च दिव्यां शक्तिं च सर्वदा मंत्रत
त्रप्रकारोपि विभिन्न कार्क कारंजस्तु ही छायां न संस्पृशेत् ॥
स्तंभदीपमनुष्याणामन्येषां प्राणिनां तथा नखाग्रकेश
निर्धूतास्नानवस्त्रं घटोदकं एतत्स्पर्शं त्यजेत् हरं खरन्याजर
जस्तथा सोमशंभुः ननिंदेत्कारणं देवं न शास्त्रं तेन निर्मितं
न गुरुं साधकं चैव लिंगच्छायां न लंघयेत् नाद्यात् लंघेन्न
निर्माल्यं नद्द्याशिवदीक्षिते ततृ शिवनिर्माल्यं षटुत्वदा
महारत्ने न लंघयेद्गुरोराज्ञामन्नं न वदेत्तथा रात्रौ दिवा च त
स्याज्ञां दासवत्परिपालयेत् असत्यमशुभं तद्वद्द्रुवादं प

रित्यजेत् अप्रियं च तथालस्यं कामक्रोधौ विशेषतः अप्रच्छ
न्नमुखो रूपाङ्गुरोरप्यकदाचन अद्वैतं देवपूजां च गुरोरग्रेप
रित्यजेत् पादुकायोगप्यद्यापि गुरुचिह्नानि सादरं नलंघ
येत्स्पृशेनैव पादाभ्यां प्रणमेत्सदा सादरे प्रणमेदित्यन्वयः
पर्यंकशयनं तथा पादप्रसारणं अंगभंगं च लीलां च न कुर्या
त् गुरुसन्निधौ गमनागमने कुर्यात् प्रणम्य गुरुपादुकां छा
यां नलंघयेत् हन्त्र गच्छेत्पुरतो गुरोः पश्चात्पादेन निर्गच्छेत्प्र
णम्य च गुरोर्गृहात् गुरोरग्रे न कुर्वीत प्रभावं शिष्यसंग्रहं ।
अहंकारं न कुर्वीत नोल्वणं धारयेद्बुधः अगुरोसन्निधौ नैव
स्वगुरोः प्रणमेद्बुधः नमस्काराय चोद्युक्तं गुरुं दृष्ट्वा निवारये
त् ननियोगं गुरोर्दृष्ट्वा पुष्पदानेव भाषयेत् श्रीनाथदेव
स्वामीति बोधयेन्माषणे वदेत् जातायामापदि भ्रंशो शपथं
गुरुसंतर्कं न कुर्यात् छिद्रं वसंगं वा प्रसादेनाक्रियेन चेत् तदर्थं
निर्विहेद्यत्रदत्तं पूजा जपाद्भुतीः अनिर्वाहे तु कार्यस्य यदर्थं
शपथं कृतः प्रायश्चित्तं जपो विप्र सहस्र स्वमनोस्ततः लो
कोद्वेदकरी या च या च मर्मनिकृन्तनी स्थित्युद्वेगकरी या च
तां गिरं नैव भाषयेत् रम्याभ्याप्युज्ज्वलमपि मनसोपि समी
प्सितं लोकविद्वेषणं वेषं न गृह्णीयात्कथंचन अत्रोक्तान्यः
सदाचारान्नैहितामुष्मिकोचितान् आचारे दादराच्छांतिं दी
तितः सोधिगच्छति अथैवं कृतपुरश्चरणैः साधकैर्नैमित्ति
कार्चनं तथादौ नैमित्तिकार्चनं तत्र विशेषदिवसेषु कार्य्य
विशेषदिवसेषु गुरुपरस्तु गुरुपरमेष्ठीगुरूणां जन्मना।

भै॰ पा॰
४५

क्षत्रादिनानि स्वजन्मनक्षत्रादीनि प्राप्तिदिनगुरोर्मरण
दिनं च कृष्णाष्टमीकृष्णचतुर्दशी पूर्णिमामावस्यारविसं
क्रमण पुष्यनक्षत्ररविवासरभैरवस्य विशेषेण भौमवा
रयुगादीत्यादि पुण्यदिनानि तेषु दिनेषु नित्यपूजानंतरं वि
शेषेण नानाविधैर्गंधपुष्प बलिदानादिभिर्महतीं पूजां
कुर्यात् नित्यजपात्त्रिगुणं जपं च कुर्यादिति अथ दमनपू
जा तत्र चैत्रे वैशाखे ज्येष्ठे वा मासे पक्षद्वयस्याष्टमी नव
मी चतुर्दशी पूर्णिमास्वन्यतमतिथौ सा कार्या तत्र पूजा
दिनात्पूर्वेद्यु सायंकाले साधकः कृतनित्यकृत्यः सामा
धिकैः सार्द्धं दमनसमीपं गत्वा ॐ शिवप्रसादसंभूतं अ
त्र सन्निहितो भव शिवकार्यं तेषु समुच्छिद्यते त्वास शिवा
ज्ञया इति दमनमामंत्र्य तत्र कामदेवं रतिं च वक्ष्यमाण
तत्तन्मंत्रेण संपूज्य गृहमागच्छेत् ततः पूजादिनात्पूर्व
दिने कृतनित्यकृत्यः साधकः समापिभिः सार्द्धं पुनर्दमन
समीपं गत्वा स्वमंत्रेण दमनं समूलमुत्पाद्य ऽस्त्रेण वा
छित्वा गृहमानीय अघोरें घोरे ह्रीं घोरतरे स्त्रीं सर्वतः स
र्व सर्वेभ्यो नमस्ते रुद्ररूपेभ्यः क्लौं श्रौं इति मंत्रेण दमनम
भ्युक्ष्य पूजास्थाने कस्मिंचित्पात्रे दमनं नवधायं विभज्य
मध्ये नाष्टसु दिक्षु च संस्थाप्य हृन्मंत्रेण चंदनागुरुक
र्पूरकुंकुमादिपंकैरालिप्य मध्यमारभ्यस्तनयादिप्रा
दक्षिण्येन नवधा विभक्तं दमनं ॐ हं नमः सं नमः दीं नमः
मं नमः लं नमः वं नमः पं नमः रं नमः उं नमः इति सं

पूज्य अस्त्रमंत्रेण संरक्ष्य कराभ्यां त्रिशूलमुद्रां वध्वा कव
चमंत्रेण दमनोपरि भ्रामयित्वा नूतनवस्त्रेण छाद्य रह
सि स्थापयेत् इत्यादिवासनं रात्रौ कुर्यात् अस्त्रमंत्रायो
मूलमंत्रस्य षडंगोक्ता मंत्रा ज्ञेया एवं पूर्वदिनानिमंत्रण
धिवासनेन कृतेचेत् पूजादिनेवा तद्वयं कार्य्यमिति त
तः पूजादिने प्रातः साधकः स्नानादिपूजां निर्वृत्य सम
पिभिः सह स्वस्तिवाचनपूर्वकं दमनं पूजास्थानमानीय
क्वचित्स्थले सिंदूरेण चतुरस्रवृत्तद्वयवेष्टितमष्टदलकम
लं विभाव्य तस्य मध्ये संस्थाप्य स्वासनपूजादिपीठपूजां
तं प्रागुक्तविधिना कृत्य स्वदक्षिणभागे सर्वतोभद्रमंडले
प्रागवदष्टदलकमले वा सिंदूरादिना कृत्वा तन्मध्ये पंच
वर्णरजोभिः शोभितं कृत्वा तस्याग्निकोणमंडले का
मदेवं तरुणं अरुणवर्णं रक्तवस्त्राभरणमाल्यानुलेपन
धरं वामदक्षिणयो रतिप्रीतियुतं पुष्पवाणेक्षुधनुर्ध
रं ध्यात्वा ॐ ऐं क्लीं श्रीं क्लीं कामाय नमः इति मंत्रेण गंधा
दि पंचोपचारैः संपूज्य तद्वामभागे रतिं गौरवर्णां रक्तव
स्त्रपरिधानां सर्वाभरणभूषितां पद्मद्वयकरां ध्यात्वा।
श्रीं श्रीं श्रीं क्लीं रत्यै नमः इति मंत्रेण रतिं गंधादिभिः संपूज्य
कामस्य वामभागे प्रीतिं श्यामवर्णां सर्वाभरणभूषितां र
क्तवस्त्रपरिधानां तांबूलकरां ध्यात्वा श्रीं श्रीं श्रीं क्लीं प्रीत्यै नमः
इति मंत्रेण पंचोपचारैः तां संपूज्य कामदेवस्याग्रे कदंबव
नं मध्ये वसंतं गौरवर्णं वामहस्ते सुधा कुंभं दक्षिणहस्ते नाना

पुष्प समुद्वयं दधानं दधानं रक्तवस्त्राभरणमाल्यानुलेप
नालंकृतं ध्यात्वा वँ वसंताय नमः इति मंत्रेण पंचोपचारै
स्तं संपूज्य पुनः कामदेवं तन्मंत्रेण संपूज्याष्टदलके शरेषु।
अग्रीशासुरवायव्य मध्ये चतुर्दिक्षु च क्लां हृदयाय नमः क्लीं
शिरसे नमः क्लूं शिखायै क्लैं कवचाय क्लौं नेत्राय क्लः अ
स्त्राय नमः इति संपूज्याष्टदलेषु देवाग्रादि प्रादक्षिण्येन।
ॐ कामाय नमः इत्यष्टौ कामान्संपूज्य चतुरस्त्रे लोकपा
लान् तदस्त्राणि च संपूज्य पुनः कामदेव तन्मंत्रेणाभ्यर्च्य
धूपदीपादितांबूलानुपचारान्समर्प्य प्राणस्य कामदेवाय
विद्महे पुष्पवाणाय धीमहि तन्नोनंगः प्रचोदयात् इति
कामगायत्रीं यथाशक्तिं जपित्वा समर्प्य नमोस्तु पुष्पवा
णाय जगदानंदकारिणे मन्मथाय जगन्नेत्रे रतिप्रीतिप्र
दायच इति कामदेवं प्रणम्य इतिं० ऋष्यादिन्यासान्कृ
त्वा मध्यकुंभे देवमाहूयावासप्राग्वत्सर्वोपचारैः सांगसा
वरणं दमनं संपूज्य आवाहितोसि देवेश सद्यः कालो मया
शिव कर्तव्यं तु यथा लाभं पूर्वं सर्वं तदाज्ञया इति विज्ञाप्य
सांगं सावरणं देवं दमनं संपूज्य धूपदीपनैवेद्य नित्यहो
मोक्तविधिना तदुक्तद्रव्यैस्तु त्रिगुणं संख्यं हुत्वा नित्यजप
संख्या त्रिगुणं संख्यं जपं च कृत्वा पूजाशेषं समाप्य गुरुं वि
तादिभिः परितोष्य कुमारकान् ब्राह्मणान्नादिभिस्तोषये
त् इति दमनपूजाविधिः अथ पवित्रारोपणं तत्रैव मिथु
नसंक्रमणमारभ्य तुलासंक्रमणावधि मासचतुष्टयस्य

पक्षद्वयगतचतुर्थ्यष्टमीनवमी चतुर्दशी मन्यतमतिथौ पवित्रे देवं पूजयेत् पवित्राणि तस्मारी रजतताम्र पट्टसूत्रसरी पद्मसूत्रदर्भमुंजशनवल्कलकार्पास सूत्रैर्यन्यतमसूत्रै कुर्यात् कार्पाससूत्रं चेत्स्ववासिनीभिः वर्तितत्रिगुणं त्रिगुणीकृत्य नवसूत्रस्यैकसरत्वेन कल्पितै रुक्तसंख्यैः सूत्रैः पवित्राणि कुर्यात् तत्राष्टोत्तर शतसूत्रैः कृतमानि चतुः पंचाषड्भिर्मध्यमानि सप्तविंशतिभिः कनिष्ठानि नवतावदंगुलदैर्घ्याणि दशदशग्रंथियुक्तानि पवित्राणि कुर्यात् इत्थं पूजावरणदेवतावृंदसम संख्यानि पवित्राणि कृत्वा अष्टोत्तर शतं सरग्रंथियुतं वितासूजाविष्टरमानदैर्घ्यमेकं बृहत्पवित्रं कृत्वा त्मनस्त्वागमत्तानां क्रमत्तानां शिष्याणां चस्कंधादिनापर्य्यंतं दैर्घ्य मुक्तपक्षत्रयेप्येकपक्षात् सारसरग्रंथियुक्तानि पवित्राणि कुर्यात् अन्येषां सामान्य पवित्राणि एक ग्रंथियुक्तानि यथेष्टसंख्यातं तुभिः परिधान प्रमाण दैर्घ्याणि पवित्राणि कुर्यात् ---------------------------------- पशुश्चेष्टस्त्वया

प्रीत्यं खड्ग नाथ नमोस्तु ते इति खड्गाभिमंत्र्य कुशजलादिकमादाय ॐ अद्येहेत्यादि तिथ्युलेखनांते अमुक गोत्रः अमुक शर्मा वा मम सकल शत्रु दैत्यदमकामः श्रीभैरव इमं छागबलिंतभ्यमहंसंप्रददे इत्युक्त्वा पुष्पाक्षतादिकं सजलपशोः शिरसिनिक्षिप्य ततः शिरस्पृष्ट्वा ॐ यज्ञार्थे पशवः यज्ञार्थे पशुपातनं अतस्त्वां घातयिष्यामि

भै॰पा॰
४७

तस्माद्यज्ञे पशोर्वधः इति तं बोधयित्वा तु मंत्रमुच्चार्य्य
छिंधि छिंधि स्वाहा इति मंत्रेण खड्गं तस्य स्कंधे संयोज्य
स्वयं भैरवरूपो भूत्वा तं मैकप्रहारेण छित्वा शत्रुपक्षस्य
रुधिरं पिशितं च दिने दिने भक्षय स्वगणैः सार्द्धं सारमेयस
मन्वितः इत्यनेन शत्रुनामाक्षरैर्विदर्भितेन बलिमंत्रे
ण शत्रुसैन्यं बलित्वेन कल्पयित्वा तेन सार्द्धं तं छाग
बलिं देवाय निवेदयेत् अनेन बलिदानेन संतुष्टबटु
केश्वरः शत्रुसैन्यं सर्वं क्रुद्धः सन् स्वगणेभ्यो विभज्य
दद्यात् इति बलिदानविधिः ॥ ॥ अथ काम्यहोम
विधिः ॥ तत्रादौ तत्रोक्तपरिपाट्याग्निचक्रं विचार्य्य सौ
म्यक्रूरग्रहमुखे स्थाहुति प्रवेशं विज्ञाय शुभं ग्रहप्रवे
शदिने शुभहोमः अशुभग्रहप्रवेशदिने वा अशुभहो
मारंभं कुर्यात् तत्परिज्ञानप्रकारस्तु सूर्यस्थितनक्षत्रं
कैकस्य ग्रहस्य त्रीणि त्रीणि नक्षत्राणि सूर्यादिभ्यो विभ
ज्य दद्यात् तत्रादौ सूर्यस्ततो बुधस्ततः शुक्रस्ततः शनि
स्ततः चंद्रस्ततो भौमस्ततो गुरुस्ततो राहुस्ततः केतुरिति
ग्रहाणां क्रमो ज्ञेयः अत्र यस्य त्रिके होमारंभस्तस्य मुखे
तदाहुतिप्रवेशः इत्याग्निचक्रपरिज्ञानप्रकारः अत्र
होमे सूर्यादिग्रहाणां मुखे स्वाहुतेः प्रवेशस्य फलानि
त्रसूर्ये शोकः बुधे धनागमः शुक्रे मीष्टफललाभः श
नौ पीडा चंद्रे सौख्यं भौमे बंधनं गुरौ धनप्राप्तिः राहौ रोगः

केनैौ मृत्युरिति अथैवमग्निचक्रं विधाय सौम्यग्रह
मखे याहुतिप्रवेशादिने शुभनक्षत्रादियुक्ते वक्ष्यमाणवि
धिना कुंडादिकं कृत्वा तत्र वक्ष्यमाणविधिनाऽग्निस्थाप
नं कृत्वा ततो ऋद्व्यैर्यथोक्तफलसिद्धये विधिज्जुहुया
त् तत्र काम्यहोमद्रव्याणि शारदातिलके जुहुयात्सर्पि
षा मंत्री यथेष्टां शुभमाप्नुयात् वश्याय जुहुयान्मंत्री म
धुना दिवसत्रयं रोगार्त्तौषधिहोमेन रोगो नश्यति तत्क्ष
णात् कृत्याद्रोहे ग्रहद्वेषे भूतापस्मारसंभवे व्याघ्राजि
ने समासीनो जुहुयादयुतं तिलैः भूतादयः पलायंते
नेक्षंते तां दिशं भयात् कृष्णाष्टमीं समारभ्य यावत्स्या
त् चतुर्दशी तिलतंडुलसंमिश्रेण करत्रयलोहितैः त्रिस
हस्रं प्रतिदिनं जुहुयात्संस्कृतेनले वटुकेश्वरमभ्यर्च्या म
त्स्यभोज्यफलान्वितं नित्यं निवेद्य नैवेद्यं मध्यरात्रौ वलिं
हरेत् एवं जपित्वा प्रयतः सहस्राण्येकविंशतिः एवं प्र
त्यहं त्रिसहस्रमित्यर्थः समाप्तिदिवसे रात्राव तं हुत्वा व
लिं हरेत् ततः कारयित्वा राजा तोषयेत्साधकं धनैः वि
धिनानेन संतुष्टो वटुकेश्वरः प्रयच्छति तेजो बलं यशः पुत्रा
न्कांतिं लक्ष्मीमरोगतां नश्यंति शत्रवस्तस्य वर्द्धते तत्र वांध
वाः अवग्राहो न जायेत विषये तस्य भूपतेः जुहुयात्केव
लैर्लीणैरयुतं स्तंभनेच्छया निगडादिविमोक्षाय प्रयोगो
यमुदाहृतः अथाभिषेकविधिः तत्र शारदातिलके
अभिषेकं प्रकुर्वीत राज्ञो विजयकांक्षिणः पूर्वोक्ते मंडले

क्षिप्तो वितानध्वजशोभिते सर्वतोभद्रमालिख्य कर्णि
कां तस्य पूरयेत् अष्टद्रोणप्रमाणेन शालिभिः शोभनैः
शुभैः तदर्धं तंडुलास्तस्मिन्न्यस्य कूर्चाक्षतान्वितं होमा
दिभिहितं कुंभं नवरत्नसमन्वितं संस्थाप्य विमलैस्तो
यैरापूर्यास्मिन् विनिक्षिपेत् क्षीरद्रुमप्रवालानि लक्ष्मी
दुर्वीमहापुनः कर्पूरं चंदनं विल्वमुशीरं कुंकुमं पुनः
कंकोलमगुरुं जातिमल्लिकाचंपकोत्पलैः गोमेदंडाडि
मं पश्चा पट्टयुग्मेन वेष्टयेत् तस्मिन्नावाह्य वटुकं राजसं
संप्रपूजयेत् वहिरष्टसुकुंभैरवानष्ट पूजयेत् त्रयोद
शसुकुंभेष्वलोकेशवटुकांजपेत् तद्वहिषुषट्कुंभेषु श्री
कंठादीनस्वरीश्वरान् पंचत्रिंशद्घटेष्वथोत्कादि वर्णेश्व
राक्रमात् इति गंधादिभिः सम्यक् पंचावरणमर्चयेत्
अयुतं प्रजपेत्स्पृष्ट्वा तान्घटान्देशिकोत्तमः पायसैस
र्पिषास्तुद्धैतिलैर्दशशतं पृथक् जुहुयात तद्घटान्स्पृष्ट्वा
प्रत्यहं बलमाहरेत् राजसूक्तोप्रकारेण रात्रौ देशिकस्ततः
सत्तमः स्वदिने शोभने लग्ने वाचयित्वा द्विजन्मभिः स्व
स्तिमंगलवाक्यानि विशुद्धैर्वेदपारगैः नदत्सु पंचवाद्ये
षु प्रणम्य वटुकेश्वरं जितेंद्रियं शुद्धकायं राजानं ब्राह्मण
प्रियं आस्तिकं सत्यवचनमभिषेचेत्प्रसन्नधीः अभिषि
क्तो नरपतिः प्रणिपत्य गुरुं परं भूयसीं दक्षिणां दद्यात्प्रसी
दति यथा गुरुः राजाभिषेक्तो भवति साक्षात्भूमिपुरंदरः
परान्विजयते भूपान्पूज्यते सकलैर्जनैः कृत्वाभिषेकंच।

एमां सं प्रतिमां सं महीपतिः चतुरस्त्रोथ वलयांशास्तिसंवी

वतुंधरां युद्धेषु सुमहती शक्तिर्जायते पूर्वतोधिकाः पू

र्वोक्तौ अत्र वक्ष्यमाणे सर्वतोभद्रे वक्ष्यमाणकर्णिकांशा

लिभिः पूरयेदिति संबंधः ततऊर्ध्वचतुर्द्रोणप्रमाणं कूर्च

वक्ष्यमाणं होमादित्यादि पदेन रजत ताम्र कांचनं मृन्मया

न्यष्टौ ते नवरत्नानि पुष्पनील वैडूर्य्य विद्रुम मौक्तिक म

रकत वज्र गोमेद पद्मरागाख्यानि संस्थाप्य वक्ष्यमानवि

धिना तस्मिन् शालिपुंजो परि ताम्रकुम्भ प्रवालानि अश्वत्थो

दुंबरप्लक्ष वटू पल्लवानि लक्ष्मीं भार्गी सहकुमारी राजसंरा

जसेध्यानोक्त रूपं पृथक् प्रतिद्रव्यं सहस्रमित्यर्थः अ

न्यसुगमं अथ खड्गादि शस्त्र साधन विधिः॥ पूर्ववदेवमा

राध्य कुंभस्थापन पूर्वकं उक्त द्रव्यैर्युतं हुत्वा तर्पणांच

विधानतः देवस्य पुरतो खड्गादीं स्थापयित्वा समर्चयेत्॥

स्पृष्ट्वा तान् लक्ष्यमेकैकं प्रत्येकं जपमाचरेत् अभिषिंचे

च कुंभस्थैः साधकैः साधकोत्तमः इष्टं सर्वमप्येवं मभि

प्रेतमवाप्नुयात् चासुंडे त्वं त्रिशूलेन चापेनार्जुनतो व्रजे

त् भैरवत्वं ड मरुकैः साधितं भवति ध्रुवं कवचेनापिसि

द्धेन भवतीश्वर सन्निभः तत्र साधन काले तु सिद्ध मन्त्रेनि

वेदयेत् देवाय जुहुयाच्छिष्टं छिष्टं भुंजीत साधकः पूर्व

वन्नित्य पूजोक्त क्रमेण कुंभस्थापन पूर्वकं अभिषिक्तो

विधिना कुंभं संस्थाप्य तत्राराधानोक्त रूपं देवमावास।

सेपूजयेदित्यर्थः उक्त द्रव्याणि प्राभिषेक प्रकरणोक्तपा

भै॰पा॰ यस्य तति लोका संख्यया हुतेत्यर्थः तर्पणं च चकारा
४९ द्धोमदशांशनेतर्पणं कुर्वीतेत्यर्थः तर्पणं च अभिषिंच्य प्रा
गुक्त विधिना राजानमिति शेषः साधितैः प्राग्जपहोमादि
भिः कुंभस्थैर्जलैरिति शेषः सिद्धमन्त्र पायसादि शिष्टं
जुहुयादिति एकस्माद्भांडात् किंचिदुद्धृत्य नैवेद्यं कल्प
यित्वा वशिष्टं जुहुयात् शिष्टं भुंजीत हुतशेषमित्यर्थः
अथ वंध्यानां पुत्रजननप्रयोगः तत्र शरदातिलके वचाचू
र्णं पलं जप्तं गव्येनाज्येन लोहितं विभज्याभक्षयेत् वंध्या
मंडलं पुत्रकांक्षिणी विनीतं पुत्रमाप्नोति मेधारोग्याद
लान्वितं अत्र वचाचूर्णसाधनप्रकारः प्रयोगारंभादिना
त्पूर्वं पूर्वदिने रात्रौ प्रागुक्तविधिना पीठे देवं संपूज्य प्रा
गुक्तविधिना ब्राह्मणीनामार्थे प्रयोगोक्तियमाणे प्राग
क्त सात्विकं बलिं तृतीय दिस्त्रीणां मर्थे वंध्यासं बलिं दत्वा दे
वस्य सन्निधौ पद्मपत्रे स्थितं चूर्णितं वचाचूर्णं वस्त्रगालि
तं पलमात्रं तावन्मात्रं घृतं च पृथक् निधाय मूलमंत्रेण
संपूज्य तदोषधं स्पृष्ट्वा मूलमंत्रमष्टोत्तरसहस्रवारं ज
प्त्वा देवस्य हस्तात्प्राप्तमिति मन्वादेवं ध्यायन् ऋतुस्ना
ता पतिव्रता परमेश्वरे भक्ति पूजां तदोषधमेकोनपंचा
शत् भागेन विभज्य घृतं च तथा विभज्य ऋतुस्नानदिन
मारभ्यैकोनदिनं पंचाशत् दिनपर्यंतं प्रतिदिनं किंचिद
धिकसार्द्ध षट्गुंजापरिमितं तावन्मानघृतेनमिश्रित
प्राशयेत् समाप्तदिने च रात्रौ देवं संपूज्य बलिं दद्यात् ॥

उक्तफलसिद्धिर्भवति अत्र सर्वकाम्यप्रयोगेषु प्रयोगारं
भदिनात्पूर्वदिने रात्रौ प्रयोगसमाप्तदिने रात्रौ देवमाराध्य
यथोक्तबलिदानं कृत्वा तत्तत्फलमवाप्नोति नान्यथेति
शिवशासनं अथ भस्मसाधनविधिः तत्र शारदातिल
के साधयेत्मनुनानेन भस्म सर्वार्थसिद्धिदं उशीरं चंद
नं कुष्ठं घनसारं सकुंकुमं श्वेतार्कमूलं वाराहीं लक्ष्मीं क्षी
रमहिरुहां त्वचो विल्वतरोर्मूलं पेषयित्वा च चूर्णयेत्।
चूर्णं व्योमगृहीतेन गोमयेन समन्वितं कृत्वा पिंडानि सं
शोष्य संस्कृते हव्यवाहने मूलेन दग्ध्वा तं भस्म शुद्धे पात्रे
विनिक्षिपेत् केतकीमालतीपुष्पैर्वासितं भस्म शोधि
तं अयुतं प्रजपेन्मंत्रं स्पृष्ट्वा भस्म सुपूजितं एतदादाय
देवेशः त्रिपुंड्रं च करोति यः तस्य रोगाः प्रणश्यंति कृत्या
द्योग महाग्रहाः रिपुचौरमृगादिभ्यो भयमस्य न जायते
वर्द्धते संपदः सर्वाः पूज्यते सकलैर्जनैः राजा वश्यो भवेत्त
स्य सामान्यासपरिच्छदः अथ वाक्सिद्धिकरः प्रयोगः ॥०
तत्र भैरवतंत्रे विद्यासिद्धिकरं देवि विधानं शृणु साधनं
शुक्लपक्षे द्वितीयायां शुक्रवारेषु भोदये देवं संपूज्य वि
धिना ह्रस्वैरुक्तैर्यथाक्रमं यवचूर्णपलं सार्द्धं तन्मानं घृत
संयुतं पद्मपत्रे विनिक्षिप्य त्रिवारं च जपेत् बुधः प्राशये
न्नियतो भूत्वा पुनर्लक्षत्रयं जपेत् तस्यैवं कुर्वतः प्रज्ञा
निःसीमा भवति ध्रुवं गद्यपद्यमयी वाणी स्फुरत्तस्या(

भै॰पा॰ ५०

50

र्थीवधारणं अथांजनविधिः तत्रैवभैरवतंत्रे कृष्णप
क्षेचतुर्दश्यांभूमिपुत्रस्यवासरे आराध्यविधिवद्देवंतस्या
अस्थापयेद्बुधः रोचनांहेमजेपात्रे संपूज्यविधिनाचतां गं
धपुष्पादिनास्पृष्ट्वा तांजपेदयुतत्रयं तत्कर्भवर्तिप्रज्वाल्य
कपिलाघृतसेवितां सौवर्णके कपालेवा पात्रे संपूज्यचां
जनं संग्रहस्यापिपुनर्जप्त्वातन्मात्रेमसग्रहं ध्यात्वादेवं
दृशोरेतदाचरेदंचनंबुधः वश्याभवंतितेसर्वे तान्यान्प
श्यतिसाधकः देवंराजसध्यानोक्तरूपं विधिनागंध
पुष्पादिनासंपूज्येत्यन्वयः कपाले नृशिरकमालेपात्रे।
अंजनंसंग्रहस्य संपूज्येतिसंबंधः अपिशब्दात्पुनरयुतत्रय
मंजनं स्पृष्ट्वाजप्त्वेत्यर्थः अन्यत्स्वगमनं अथमंत्रं तत्र
शारदातिलके श्रीमायास्मरकूटमंत्र विलिखेन्मध्ये दले
ष्वष्टसुद्धिः प्रोक्तं बटुकायशब्दमपरान् मंत्रवर्णान्वहिः
अष्टद्व्दलेषु तद्बहिरचलत्तंस्वपात्रेद्यथोद्वात्रिंशद्दल
कादिसांत सहितं यंत्रंलिखेद्भूपुरे आपदुद्धारणं यंत्रमन्य
मल्पमृत्युनिवारणं सर्वसंपत्प्रदंनित्यं सर्वसौख्यप्रदाय
कं रक्षाकरं ग्रहार्तीनां राज्ञांविजयवर्द्धनं अयमर्थः अष्ट
दलकमलंकृत्वा तत्कर्णिकायां श्रीबीजं भुवनेश्वरीबी
जं कामबीजं नृसिंहबीजंचलिख्यमध्यस्थभुवनेश्वरी
बीजस्यहकारस्यगतईकारस्याने अमुकस्यरेफस्याने
ग्रहार्तिमध्ये हकारोदरेनाशयेत् साध्यनामसमालि
ख्य वहिरष्टसुदलेषु वटुकायइत्यष्टौवर्णान्प्रतिदलेमे

कैकशःसमालिख्य तद्बहिर्षोडशदलकमलंकृत्वा तद्दले
षु स्वाग्रादिप्राक्दक्षिणयेन आयइडुद्धारणाय इत्यादिही
कारांतान् षोडशवर्णानालिख्य तद्बहिःपुनःषोडशदलं
कमलंकृत्वा तद्दलेषुस्वाग्रादक्षिणयेन अकारादिविस
र्गांतान्सविंदूकारान्विलिख्य तद्बहिर्द्वात्रिंशद्दलकमल
मलिख्यतद्दलेषु स्वाग्रादिप्राक्दक्षिणयेनककारादिस
कारांतान् द्वात्रिंशद्वर्णान्सविंदुकानालिख्याष्टवज्रलां
छितेनचतरस्रेणवेष्टयेत् अत्रवर्णालेखनेमध्यस्थवीज
त्रयाभिमुखाः सर्ववर्णायथाभवंति तथागुरूपदिष्ट
विधिनालिखेत् एतद्यंत्रमुक्तफलदंभवति ॥अथ
यंत्रलेखनद्रव्याणि तत्रकुलार्णवे त्रिगंधंशांतिकेपो
ष्टिकेपंचगंधंतवश्यके सर्वकार्येषुगंधःस्यात्क्रूरेवाष्ट
विषाणिच अत्रत्रिगंधः चंदनागुरुकर्पूराणि पंचगंध
श्चंदनरक्तचंदनकुंकुमागुरुकर्पूराख्यानि अष्टगंध
स्तुपुरस्तात्दीक्षाप्रकरणे वक्ष्यते अत्रस्तंभने चंदनगो
रोचनहरिद्रागजमदइति गंधचतुष्टयंतंत्रांतरोक्तंज्ञेयं
अष्टविषाणितु मध्येनानग्रंथिपिंडानिधत्तूरकारसस्तथा ग्रह
धूमंत्रिकुटकंविषाष्टकमुदीरितं इतिग्रंथेनविष्टा अग्नि
चित्रकंलोनपिंडकद्रतिमलवर्णा ॥अथयंत्रलेखनाधा
रविशेषाः तत्रकुलार्णवे शांतिकेरजतंताम्रंभूर्जपत्रं
चवश्यके सर्वकार्येषुसौवर्णंक्रूरेस्यात्प्रेतकर्पटं प्रेत

कर्पटं शवत्यक्तवस्त्रं अथ यंत्रलेखनेविशेषः तत्रकुला
र्णवे शांतिकेलेखनीदूर्वावश्यादौशिखिपिच्छिका हस्तः
सर्वाणिकार्याणिक्रूरे स्यात्काकपिच्छिका शिखिपिच्छिका
मयूरपिच्छिका वश्यादित्यादिपदेनाकर्षणमोहनस्तंभना
निगृह्यंते अथ यंत्रप्रतिष्ठाविधिः कृतनित्यकृत्यः साध
कः तत्रशुभदिनेसमङ्कूर्त्ते तत्कर्मादिदेवतापूजापूर्वकंस्व
गुरुंप्रणम्य तत्तत्कर्मादितेकालेतत्तत्कर्मीक्ताधारेतत्तत्क
र्मोक्तद्रव्यैस्तत्कर्मीलेखिन्या तत्तत्कर्मयुक्तसाध्यनामासहि
तंप्रोक्तपात्रमालिख्य स्वपुरतः क्वचित्पीठेसंस्थाप्य गुर
वादिवंदनपूर्वकं मूलमंत्रस्यऋष्यादिकरषडंगन्यासंवि
धाय प्रागुक्तप्राणप्रतिष्ठामंत्रे ममपदस्थाने अमुकयंत्र
स्येतिपदंसंयोज्य प्राणप्रतिष्ठामंत्रयंत्रस्पर्शपूर्वकं त्रिःप
ठेत् यंत्रस्यप्राणप्रतिष्ठांविधाय ॐयंत्रराजायविद्महेदेव
ग्रहायधीमहि तन्नोयंत्रःप्रचोदयात् इतियंत्रगायत्र्यादप्रा
धाभिमंत्र्याद्ध्येस्थापनपूर्वकं तत्रदेवमावाह्य सांगंसाव
रणंसर्वोपचारैःसंपूज्य यंत्रंस्पृशन्मूलमंत्रमष्टोत्तरसहस्रं
जपित्वा वक्ष्यमाणविधिना कुंडादावग्निंसंस्थाप्य घृतैर्ज
पसंख्यादशांशंप्रत्याहुतिंशुभलग्नेहुतशेषंघृतंयंत्रेसंस्था
पयन्हुत्वा पुनःसंयोतमितिकं तद्यंत्रंमूलमंत्रेणाष्टोत्तरश
तवारमभिमंत्र्य धारणपक्षेहोमारंभात्पूर्वमेव वक्ष्यमाण
विधिनाकुंभंसंस्थाप्य तत्रदेवमावाह्यसंपूज्य यथाविधि

साधितैस्तत्कुंभजलैर्यंत्रधारकमभिषिंच्य साधितंतद्यंत्रं
गुलिकीकृत्य लक्षयावेष्टितंताम्ररजतसुवर्णाख्यलोहत्रये
णवेष्टितमभिषिक्ताय भक्तिमतेतस्मैदद्यात् सोपितन्मस्त
केकंठेबाह्वोर्वाशुचिर्धारयेत् स्थापनपक्षेतुगुरूक्तविधि
नाशास्त्रोक्तपरिपाट्य तत्तत्कर्मोक्तस्थानेषुतथैवस्थापये
त् स्थापनप्रकारस्तु ग्रंथगौरवभयादत्रनलिखितः तत्त
द्गुरुमुखादेवावगंतव्यमिति ॥इतिश्रीभैरवाचार्यपारिजा
तेअष्टमस्तवकः ८॥ ॥ ॥अथदीक्षा कुलार्णवेदीय
तेज्ञानविज्ञानंक्षीयंतेपापराशयः तस्माद्दीक्षेतिसाप्रोक्ता
तास्तांतत्वविचारकैः इतिदीक्षाशब्दनिरुक्तिः तत्रसर्वलक्ष
णसंयुक्तः सर्वागमज्ञः श्रीगुरुः सर्वलक्षणसंपन्नायशिष्या
यसकलान्मंत्रदोषात् तत्परिहारायप्रपंचितदशविधसंस्कारा
सम्यग्विज्ञायतेमंत्रसंस्कृतंनक्षत्रराशिस्वकुलान्यकुलाकथहा
कडमपद्मेरचक्रऋणधनादिभिः सम्यक्शोधितंप्राचीसाध
नपूर्वकं निर्मितंमंडपेवेदिकुंडरचनावास्तुपूजांकुर्यात्पू
र्वकं शुभमासर्त्वल्पतिथिवारयोगकरणलग्नानिविशेषण
शिष्टेशुभदिनेयथाविधिशिष्येणवृतोयंगुरुर्यथोक्तविधिना
विहितद्वारपूजनपूर्वकंमंडपंप्रविश्य कृतदीगभिषितायशि
ष्याय शास्त्रोक्तविधिनादीक्षांदद्यात् तत्रादौसद्गुरुलक्षणंशा
रदातिलके मातृतःपितृतःशुद्धःशुद्धभावोजितेंद्रियः सर्वा
गमानांसारज्ञः सर्वशास्त्रार्थतत्वविन् परोपकारनिरतोज
पपूजादितत्परः अमोघवचनःशांतोवेदवेदांगपारगः यो
गमार्गानुसंध्यायीदेवताहृदयंगमः इत्यादिगुणसंपन्नो

भै·पा· ५२

गुरुरागमसंमतः इति अथ सत्शिष्यलक्षणं शारदातिलके शिष्यः कुलीनः शुद्धात्मा पुरुषार्थपरायणः अधीतवेदः कुशलो दूरमुक्तमनोभवः हितैषी प्राणिनां नित्यमास्तिकस्त्यक्तनास्तिकः स्वधर्मसहितो भक्त्या पितृमातृहितोद्यतः वाङ्मनः कायवस्तुभिः गुरुशुश्रूषणे रतः एतादृशगुणोपेतः शिष्यो भवति नः परः अथ शिष्याणां दीक्षायोग्यता कालविशेषः तत्रैव एकाब्देन भवेद्योग्यो ब्राह्मणस्तु द्वयान्नृपः वैश्यो वैश्यस्त्रिभिः शूद्रश्चतुर्भिर्वत्सरैर्गुरोः शुश्रूषुः परियासो दीक्षागवृतादिग्विति अथ मंत्रेषु दोषः तत्र शारदातिलके छिन्नादिदुष्टा मंत्रास्ते पातयंति न साधकं छिन्नो रुद्धः शक्तिहीन पराङ्मुख उदीरितं बधिरो नेत्रहीनश्च स्तंभितः कीलितस्तथा दग्धस्त्रस्तश्च भीतिश्च मलिनश्च तिरस्कृतः भेदिनश्च सुषुप्तिश्च मदोन्मत्तश्च मूर्छितः हतवीर्यश्च हीनश्च प्रध्वस्तो बालकः पुनः कुमारस्तु युवा प्रौढो वृद्धो निस्त्रिंशकस्तथा निर्वीर्यः सिद्धिहीनश्च मंदः क्रूरस्तथा पुनः निरंशः सत्त्वहीनश्च कींकरो बीजहीनकः धूमितालिंगितश्चैव मोहितस्तु क्षुधार्दितः अतिदृप्तांगहीनश्चाप्यतिक्रुद्धः समीरितः अतिक्रूरश्च सव्रीडः शांतमानस एव च स्थानभ्रष्टश्च विकलश्चातिवृद्धः प्रकीर्तितः निःस्नेहः पीडितश्चापि वक्ष्याम्येषां च लक्षणं अथैतेषां दोषाणां लक्षणानि मनोर्यस्यादिमध्यांते स्वानिलं बीजमुच्यते संयुक्तं वा वियुक्तं वा स्वराक्रांतं त्रिधा पुनः चतुर्धा पंचधा वाथ स मंत्राछिन्नसंज्ञकः आदिमध्यावसानेषु भूबीजं बिंदुलांछित रुद्धमंत्र स विज्ञेयो भुक्तिमुक्तिविवर्जितः मायातत्व

स्त्रीबीजरावहीनस्तुयोमन्तुः शक्तिहीनस्तु कथितोयस्यम
ध्येनविद्यते कामवीजंमुखेमायाशिरस्यंकुशमेवच असौ
पराङ्मुखप्रोक्तोहकारोविंदुलांछितः आद्यंतमध्येविंदुवीन
भवेत् वधिरःस्मृतः पंचपँवर्णीमन्तुर्यस्मादेशकेंडुविवर्जितः
मंत्रहीनःसविज्ञेयोदुःखशोकभयप्रदः आदिमध्यावसानेषु
सप्रसादवाग्भवेः हकारंविंदुमान्जीवंएवंवापिचतुःकलं
मायानमामिचपदंनास्तियस्मिन्सकीलितः एकंमध्येद्वयं
मूर्द्धियस्मिन्नस्त्रपुरंधरौ नविद्यतेसमंत्रःस्यास्तंभितःसिद्धि
रोधितः वह्निवायुसमायुक्तोयस्यमंत्रस्यमूर्द्धनिः सप्तधा
दृश्यतेतंतदग्धंमन्येनतंत्रवित अस्त्रंद्वाभ्यांत्रिभिषड्भिःचाष्ट
भिदृश्यतेक्षरैः त्रस्तःसोभिहितोयस्यमुखेनप्रणवस्थितः।
शिवोवाशक्तिमथवाभीताख्यःसप्रकीर्तितः आदिमध्यावसा
नेषुभवेन्मार्णचतुष्टयं यस्यमंत्रःसमलिनोमंत्रवित्तंविवर्जी
येत् यस्यमध्येदकारोवाक्रोधोवामधुलिद्विधा अस्त्रंतिष्ठति
मंत्रस्यसतिरस्कृतईरितः भोद्वयंहृदयेशीर्षेवषड्कारंचमध्य
तः यस्यासोभेदितोयत्रस्याज्यःसिद्धिमुमुक्षुरिभिः त्रिवर्णी
यंसहीनोयःसस्तुप्तःसंउदाहृतः मंत्रोवाप्ययवाविद्यासप्ता
धिकशताक्षराः फट्कारापंचकादिर्यीन्मदोन्मतउदाहृतः
तद्वदस्त्रंस्थितंमध्येयस्यमंत्रःसमूर्छितः विरामस्यानेगंयस्य
हृतवीर्यःसकथ्यते आदौमध्येतथामूर्द्धिचतुरस्त्रयुतोमनुः
एकोनविंशाद्वर्णा
स्तातध्योहीनइत्येषयस्मादष्टादशाक्षरः
वायोमंत्रस्तारसंयुतं हृल्लेखांकुरबीजाड्यस्तंप्रध्वस्तंप्रवक्ष

भै·पा· ५३

53

ते सप्तवर्णो मनुर्बालः कुमारोष्टाक्षरस्मृतः षोडशार्णो युवा प्रोढो च
त्वारिंशाक्षिपिर्मनुः त्रिंशद्वर्णश्चतुःषष्टिवर्णो मंत्रशताक्षरः चतुश
ताक्षरश्चापि वृद्ध इत्या(भि)विधीयते नवाक्षरो ध्रुवयुतो मंत्रस्त्रिंशश्च ईरि
तः यस्यावसाने हृदयं शिरोमंत्रश्च मध्यतः शिखा चर्म च संख्या
तो वौषट्कार एव च शिवशक्त्यर्णहीनो वा स तु निर्बीज इतीरितः।
येषु स्थानेषु फट्कारषोटा यस्मिन्प्रदृश्यते स मंत्रः सिद्धिदाही
नः स्यान्मंदः पंक्त्यक्षरो मनुः कूट एकाक्षरो मंत्रः स एवोक्तो निरं
शकः द्वेवर्णस्तत्वहीनः स्याच्चतुर्वर्णकेकरः षडक्षरो बीजही
नस्त्वर्द्ध सप्ताक्षरो मनुः सार्द्ध द्वादश वर्णो वा धूपितः स तु निंदितः
सार्द्धबीजत्रयस्तद्वदेकविंशतिवर्णकः विंशत्यर्णस्त्रिंशदर्णो य
स्मादालिंगितस्तथा द्वात्रिंशत्यक्षरो मंत्रो मोहितः परिकीर्तितः।
चतुर्विंशतिवर्णोपि सप्तविंशतिवर्णकः क्षुधार्तः स तु विज्ञेयश्च
तुर्विंशतिवर्णकः एकादशाक्षरो वापि पंचविंशतिवर्णकः त्र
योविंशतिवर्णो वा मंत्रो दृप्त उदाहृतः षड्विंशत्यक्षरो मंत्रः षट्त्रिं
शद्वर्णकस्तथा त्रिंशदेकोनवर्णो वा षंडाहीनोभिधीयते अष्टा
विंशत्यक्षरो एकत्रिंशदथापि वा अतिक्रूरः समादितो निंदितः सर्व
कर्मसु चत्वारिंशतमारभ्य त्रिषष्टिं यावदक्षरं तावत्संख्यानिग
दितो मंत्रः सव्रीडसंज्ञकाः पंचषष्ट्यक्षरो येषु मंत्रास्ते शांतमा
नसः एकोनशतपर्यंतं पंचषष्ट्यक्षरादितः ये मंत्रास्ते निग
दितास्थानषष्ट्यङ्कयावुधैः त्रयोदशाक्षरा ये स्युर्मंत्राः पंचदश
क्षराः विकलास्ते विधीयंते शतं शार्द्धशतं तु वा शतद्वयं द्विन
वतिरेकहीना यथवापि सा शतत्रयं वा यत्संख्यानि स्नेहास्ते समी

रितः चतुशतान्यतारभ्य यावत् वर्णसहस्रकं अतिवृद्धः प्रयो
गेषु परित्याज्यः सदा बुधैः सहस्राणाधिका मंत्रः षडंशा सप्त
धाकृताः ज्ञातव्यास्तोत्ररूपास्ते मंत्रा ये ते यथास्थितः तथावि
द्यास्त्ववोद्धव्या मंत्रिभिः काम्यकर्मसु दोषानिमानि विज्ञाय
यो मंत्रं भजते जडः सिद्धिर्न जायते तस्य कल्पकोटिशतैरपि इति
अथैतेषां श्लोकानां विषमपदव्याख्या अत्रअंति लं बीजं पंका
रः भूवीजं ग्लौं त्रितत्वं प्रणवः एकः फें अंकुशः क्रौं द्रुडः सका
रः अर्कहकारः प्रासादहौं वाग्भवः ऐं जीवः सः चतुकलं हुं
अस्त्रं फट् पुरं यरोलकारः वदिरेफः शिवः अं शक्तिः अः क्रोध
हुं हृदयं नमद्वयं शीर्षं स्वाहाद्वयं हंसः स्वरूपं हकारो वा ए
तदस्त्रं फट्कारपंचकं विरामस्थानं गं मंत्रावसानस्थ अस्त्रं पं
चकमिति दोषः तारः प्रणवः हृल्लेखा भुवनेश्वरी ध्रुवः प्रणवः
हृदयं नमः शिरः स्वाहा शिखा वषट् वर्म हुं शिवो हंकारः श
क्तिमकारः प्रागंत्यस्वरो वा पंक्त्याक्षरो दशाक्षरः षडेसप्ताक्ष
रः अष्टादिक सप्ताक्षर इत्यर्थः त्रिंशत् एकोनवर्णाः एकोनत्रिं
शद्वर्ण इत्यर्थः साद्धिनवतिरेकहीनेत्यन्वयः अथोक्तदोष
दुष्टानां मंत्राणां तत्दोषनिरसनोपायस्तत्रैव इत्यादिदोषदु
ष्टानां तान्मंत्रान्नात्मा तयोजपेत् शोधयेत् उद्धपवनो वहया
योनिमुद्रया इति अस्यार्थः तत्र गुरुसिद्धासनस्थो वामपार्ष्णि
गुदमेकं दंतरं पीड्य तदुपरि दक्षिणपादं गुल्फाग्रयोरन्योन्यस
मर्दं यथा भवानि तथा दक्षिणपार्ष्णि लिंगमूलं निपीड्य स्थि

भै॰पा॰ ५८ 54

रकायमप्रविश्य गुदनार्क्कं व्यापानवायुमुत्थाप्य संरुद्ध प्राणवा
युः प्राणापानयोः सम्पदं कुर्वन्नेकचित्तो मूलाधारगतचित्स्व
रूपेर्कंऽऽत्मात्मके परमात्मनि स्वसाध्यमंत्रं ज्ञातदोषं संचिंत्य त
न्मंत्राक्षराण्येकैकशः सुषुम्णामार्गेण मूलाधारस्वाधिष्ठानम
णिपूरकानाहतविशुद्धाज्ञाख्यषट् चक्रभेदक्रमेण ब्रह्मरं
ध्रं प्राप्य तत्रस्थसोममंडले निर्गतामृत प्लवसिक्तानि मंत्रा
क्षराणि पुनः सुषुम्णामारोप्य मार्गेणाज्ञाविशुद्धानाहत म
णिपूरक स्वाधिष्ठानचक्रमेण मूलाधारं प्रापयेदिति ततस्त
न्मंत्रे ऋष्यादिन्यासपूर्वकं यथोक्तं भावनया शोधनं सहस्रं
जपेदित्यांतराणो मंत्रसंस्कारः अथवा वाह्यक्रियारूपो मं
त्रदोषनिरासनयि दशविधसंस्काराः शारदातिलके मंत्रा
णां दश कथ्यंते संस्काराः सिद्धिदायिनः जननं जीवनं पश्चात्ता
डनं बोधनं तथा अथाभिषेको विमलीकरणाप्यायते पुनः
तर्पणं दीपनं गुप्तिर्दशैता मंत्रसंस्क्रिया इति- अथ दशानां
संस्काराणां लक्षणानि तत्रैव मंत्राणां मातृकामध्ये उद्धारो
जननं स्मृतं प्रणवांतरिताकृत्वा मंत्रवर्णान्जपेत्सुधी २
तज्जीवनमित्याहुर्मंत्रतत्त्वविशारदाः भूर्जे संलिख्य मंत्राणां
ताडयेच्चंदनांभसा प्रत्येकं वायुना मंत्री ताडयं तदुदाहृतं ३
ति विलिख्य मंत्रं तन्मंत्री प्रसूनैः करवीरजैः तन्मंत्राक्षरसंख्या
तैर्हन्याद्यांतेन बोधनं ४ अतंत्रोक्तविधानेन मंत्री मंत्राणि
संख्यया अश्वत्थपल्लवैर्मंत्रमभिषिंचेत् विशुद्धये ५ संचिं

त्यमनसामंत्रंज्योतिर्मंत्रेणनर्दहेत् मंत्रीमलत्रयंमंत्रीविम
लीकरणंत्वदं ६ तारंव्योमाग्निमनुयुक्दंडिज्योतिमनुर्मतः ।
कुशोदकेनजप्तेनप्रत्यर्णीमोक्षणंमनोः तेनमंत्रेणविधिवदे
तदाप्यायनंमतं ७ मंत्रेणवारिणापात्रेतर्पणंतर्पणंस्मृतं
तारमायारमायोगोमनोदीपनमुच्यते ८ जप्यमानस्यमंत्र
स्यगोपनंतप्रकाशनं १० संस्कारादशसंप्रोक्तासर्वतंत्रेषुगोपि
तः यान्कृत्वासंप्रदावेनमंत्रीवांछितमश्नुते अथमंत्राणामि
त्यास्च प्रकाशनमित्यंतस्य श्लोकाष्टकस्यायमर्थः तत्रप्रथ
मश्लोकस्यपूर्वार्द्धेनैतदुक्तंभवति तत्रकाचितश्रीपर्णी चंदना
दिपीठे कुंकुमादिना अकारादिक्षकारांतोमातृकांविलिख्य
तन्मध्यात्स्वाभीष्टमंत्रंस्वरव्यंजनविंदुविसर्गसंयोगाक्षराणि
पृथक्पृथक् उद्धृत्यैकैकास्वगुरूपदेशेनज्ञानेमंत्रेजनये
दितिजननं अथप्रथमश्लोकस्यार्द्धेनद्वितीयश्लोकस्यपूर्वा
र्द्धेनचैतदुक्तंभवति प्रागुक्तस्यमंत्रस्यैकैकमक्षरंप्रणवां
तरितंकृत्वाष्टोत्तरशतंजपेत् यथानमःशिवायेतिमंत्रः त
स्यजपप्रकारः ॐनॐमःॐशिॐवाॐयॐ एवंसर्वत्रावधेयं
इतिजीवनं अथद्वितीयश्लोकस्योत्तरार्द्धेनतृतीयश्लोकस्यपू
र्वार्द्धेन चैतदुक्तंभवति भूर्जपत्रेकुंकुमादिद्रव्यैस्तंमंत्रंविलि
ख्य चंदनमिश्रितंजलेनयमितिवायुवीजमुच्चरप्रत्यक्षरं
ताडयेदिति एतत्ताडनं यथातृतीयश्लोकस्योत्तरार्द्धेन चतु
र्थश्लोकस्य पूर्वार्द्धेन चैतदुक्तंभवति तत्रप्रागुक्तपीठेमंत्रं
विलिख्य तन्मंत्राक्षरसंख्यातानिकरवीरपुष्पाण्यादाय रमि

तिवह्निबीजमुच्चरन्प्रत्यक्षरैः पुष्पैः शतशतवारं हन्यादिति एतच्छोधनं अथ चतुर्थश्लोकस्योत्तरार्द्धेन पंचमश्लोकस्य पूर्वार्द्धेन चैतदुक्तं भवति तत्र प्राग्वत्पीठे कुंकुमगोरोचनादिभिरष्टदलकमलं कृत्वा तत्कर्णिकायां कुंकुमादिद्रव्यैः मालतीकलिकाभिस्तन्मंत्राक्षरसंख्याभिरेकपाकलिकायैकमेकमक्षरं लिखेदिति तन्मंत्रं विलिख्य तन्मंत्राक्षरसंमितान्यश्वत्थपल्लवानानीय तमेव मंत्रमुच्चरन् अमुं मंत्रमभिषिंचामि नमः इत्यभिषेकं स्वगंधिजलेनैकैकपल्लवेनाष्टोत्तरशतशतवारं कुर्यात् इत्यभिषेकः अथ पंचमश्लोक(स्वगंधिजलेनैकैकपल्लवेनाष्टोत्तरशत) स्योत्तरार्द्धेन षष्ठश्लोकस्य पूर्वार्द्धेन चैतदुक्तं भवति तत्र स्वमूलाधारे प्रागुक्तलक्षणे वह्निमंडले वक्ष्यमाणज्योतिर्मंत्रं संचिंत्य ततऊर्द्ध्वे संस्कर्त्तव्यमंत्रं विभाव्य ज्योतिर्मंत्रस्य तेजसा संस्कर्तव्यमंत्रगतमाणवकामंकर्मापीयं मलत्रयं सहजागंतुककामाख्यं मनसा पुनः पुनरेकमेकं निर्दग्ध्य तं मंत्रं विगतमलत्रयं ध्यायेदिति विमलीकरणं अथ षष्ठश्लोकस्योत्तरार्द्धेन ज्योतिर्मंत्रमुद्धरति तत्र तारः प्रणवः व्योम हकारः अग्निरेफः पुनश्चतुर्दशस्वर औकारः दंडी अनुस्वारः तेन ह्रौं इति ज्योतिर्मंत्रः अथ पद्यमश्लोकेनैतदुक्तं भवति तत्र प्राग्वत्पीठादौ तन्मंत्रं कुंकुमादिभिर्विलिख्य ताम्रादिपात्रे कर्पूरादिवासितं शुद्धजलमापूर्य्य लिखितमंत्रेणैवाष्टोत्तरशतवारमिति मंत्र्य तेनैव मंत्रेणैवा शतवारमभिमंत्र्य तेनैव मंत्रेण ततः

जलबिंदुभिः कुशैःप्रत्यत्तरांस्त्रिभिः प्रोक्षयेदिति एतदाप्या
यनं अथाष्टमश्लोकस्य पूर्वार्द्धेनैतदुक्तं तत्रनामादि पात्रे
प्रधानमंत्रावलिख्य पात्रांतरे कर्पूरादिवासितंशुद्धं जलमा
नीय त्वमेवमंत्रंपठन् तत्रअमुमंत्रं तर्पयामि नमइत्यष्टो
त्तरशतवारं लिखितमंत्रस्योपरिअंजलिदानेन तर्पयेदिति ए
तत्तर्पणं अथाष्टमश्लोकस्योत्तरार्द्धेनैतदुक्तं भवति तत्रतारं
प्रणवमाया भुवनेश्वरी रमाश्रीं बीजं योगलक्षणंतु आदौ
योगोभवेदित्युक्तं अयमाशयः प्रणवभुवनेश्वरीश्रीबी
जैतैसाध्ये मंत्रंकृत्वाष्टोत्तरशतवारं जपेदिति एतदाप्या
यनं अथोवीरितास्लोकस्यार्थस्यष्टएव इतिदशसंस्काराः
अथमंत्रलेखनप्रकारः तैद्रोनक्षत्रचक्रं तत्रदक्षिणोत्तरा
यताश्चतस्रोरेखालेख्याः प्राक्प्रत्यगायता दशरेखाश्च
विलिख्य सप्तत्रिंशतिकोष्ठानिकृत्वा दक्षिणोत्तरायतपं
क्तित्रयेषु तत्रोर्द्ध पंक्ति प्रथमकोष्ठे अआ द्वितीय इ तृती
ये ईउऊ चतुर्थे ऋॠ ऌॡ पंचमे ए षष्ठे ऐ सप्तमो ओ औ अष्ट
मे क नवमे खग इतिविलिख्य तदधस्य द्वितीयपंक्ते प्रथम
कोष्ठे घङ द्वितीयेच तृतीयेछज चतुर्थे झञ पंचमेटठ
षष्ठेड सप्तमेढण अष्टमेतथद नवमेध इतिविलिख्य
तदधस्यतृतीयपंक्ते प्रथमकोष्ठेनपफ द्वितीयेब तृती
येभ चतुर्थेम पंचमेयर षष्ठेल सप्तमे वश अष्टमेषसह
नवमेलक्ष अं अः अं अः इतिविलिख्य सर्वोर्द्ध पंक्ते प्रथ
मकोष्ठेमारभ्य सर्वाधस्य तृतीयपंक्ते नवमकोष्ठपर्यन्तं ॥

तेषु सप्तविंशानि कोष्ठेषु एकादि सप्तविंशत्यंतानं कानेकैकस्य नामाद्यच्छरं तिष्ठति तत्रस्याकं वर्णस्य विज्ञाय तत्र यन्नक्षत्रेण यातितित्साधकस्य जन्मनक्षत्रं परिकल्प तत्कोष्ठमारभ्य मंत्रस्याद्यक्षरं यस्मिन्कोष्ठे तिष्ठति तावत्पर्यंतं गणयित्वा तत्रमेकमक्षराणि च विज्ञाय तत्र यन्नक्षत्रं दृश्यते तदेव मंत्रस्य नक्षत्रं परिकल्प साधक नक्षत्रमारभ्य मंत्रनक्षत्र पर्यंतं जन्म संपद्विपत्क्षेम प्रत्यरि साधक वधमैत्रातिमैत्रंच जन्मादीनि पुनः पुनरिति पुनः पुनरिति कलाणी वो

अ	भ	कृ	रो	मृ	आ	पु	पु	श्ले
अआ	इ	इउऊ	ऋॠ लृॡ	ए	ऐ	ओऔ	क	खग
म	पू	उ	ह	चि	स्वा	वि	ऽनु	ज्ये
अङ	च	छज	झञ	टठ	उ	ढण	तथद	ध
मू	पू	उ	श्र	ध	श	पू	उ	रे
भपफ	व	भ	म	यर	ल	वश	षसह	लंक्षः अंअः

क्र प्रकारेण जन्मादि नवकं पर्यायत्रयेण विज्ञाय फलानि च निर्दिशेत तत्र फलानि च कलाणि व एव जनु षम्मार या मृ


त्युरायुनाशस्तृतीययामृत्युः पंचमतारायां सप्तमो घातकोम
तः द्विचतुःषडनवगतास्ताराः शुभामताः । इतिताराफलं
ज्ञात्वाफलंज्ञात्वा मंत्रंदद्याद्विदिशात्सुधीः अथनक्षत्राणांगण
भेदः अत्रकलमूलावतारे अश्विनीमृगशीर्षंच तथापुष्यपु
नर्वसू हस्त्यस्वात्यनुराधाचरेवतेविस्तुदेवतं भरणीरोहिणी
चैवआर्द्रापूर्वोत्तरास्तथा पूर्वाषाढाचोत्तराषाढा पूर्वाभाद्रप
दोत्तरान्नतः कृत्तिकादिमघाचित्राविशाखाज्येष्ठकस्तथा ।
मूलंधनिष्ठाशतभिषाचरक्षोगणाःप्रिये अथैतेषांगणाना
प्रीतिविशेषोरुद्रयामले चोत्तमामध्यमादेवमानुषे अधमारा
क्षसेदेवेमृत्युर्मीनवराक्षसे इतिगणशोधनप्रकारः ॥ ॥

अथगणमैत्रीचक्रमिदम् ॥

देवगण ॥	मनुष्यगण ॥	राक्षसगण ॥
अश्वि मृ	आर्द्रा रो	कृत्ति मघा
पुष्य पुन	भर पूफा·	अश्ले विशा
हस्त स्वा	पूषा पूभा·	शत चित्रा
ऽनु· रे·	उफा उषा·	ज्येष्ठा धनि·
श्रवण	उत्तराभाद्रपदा	मूल·

अथराशिचक्रं ॥ तत्रप्राक्प्रत्यगायतंरेखाद्वयं दक्षिणोत्तराय
तंरेखाद्वयंमध्येचतुरस्रंयथाभवति तथाविलिख्य मध्यस्थ

चतुरस्रस्यचतुष्कोणेषु कोष्ठे रेकैकां रेखां कृत्वा द्वादश खंडानि निष्पाद्यंते तेषु खंडेषु प्रागग्रादिप्रादक्षिण्येन प्रथमखंडे अआ इई उऊ ऋ तृतीयेॠऌॡ चतुर्थे एऐ पंचमेओऔ षष्ठे अंअः सषसहलक्ष सप्तमेकखगघङ अष्टमेचछजझञ नवमे टठडढण दशमे तथदधन एकादशे पफबभम द्वादशे यरलव एतेषु प्रागादिषु द्वादश खंडेषु एकादिद्वादशपर्यंतानंकानेकैकं समालिख्य यस्मिन्खंडे मंत्राद्यक्षरं तिष्ठति तत्पर्यंतं गणयेत् तत्र स्वलग्नादि द्वादश स्थानानां नामानि कुलार्णवे लग्नो धनभ्रातृ बंधु सुत शत्रु कलत्रोकाः मरणं धर्मकर्माय व्यया द्वादशराशयः इति । अथैतेषां फलानि रत्नसागरे।



एको वाप्यथवा पंचमोऽथ नवमो राशिषु सद्बांधवे राशिस्याद्दशमे द्वितीयसहितः षष्ठो भवेत्सेवकः रुद्राग्निस्वरसंख्यया ।

यदि मनो मंत्रो भवेत् पोषकः सस्याद्द्वादश काष्टक श्रुतिम्
तो मंत्रस्तु तो घातकः इति । अथ राशीनां वर्णभेदः ॥ प्रपंच
सार गरेस्तुः कर्कटो वृश्चिकं मीनविप्राः नृपाश्च सिंहो धनु
श्च मेषः तुलाश्च कुंभो मिथुनश्च शूद्रा कन्या वृषो योमक
रश्च वैश्य ॥ इति शोधन प्रकारः ॥ ॥ अथ पांच भौतिकं चक्रं

वायु	अ	आ	ए	क	च	ट	त	प	य	ष
अग्नि	इ	ई	ऐ	ख	छ	ठ	थ	फ	र	श
भूमि	उ	ऊ	ओ	ग	ज	ड	द	ब	ल	ह
जल	ऋ	ॠ	औ	घ	झ	ढ	ध	भ	व	श
आकाश	ऌ	ॡ	अं	ङ	ञ	ण	न	म	सं	हा

तत्र तद्दक्षिणोत्तरायताखंडेषाश्च विलिख्य पंचाशतकोष्टानि
कृत्वा दश दश कोष्टैरेकैका पंक्तिरिति पंक्तिपंचकं चक्रं प
रिकल्प तासु पंक्तिषु संवोध्यंते प्रथम पंक्तौ वामादिदक्षि
णांते दशसु कोष्टेषु अआ एकचटतपयषाः द्वितीयपं
क्तौ इई ऐ खछठथफरशाः तृतीय पंक्तौ उऊ ओ गजडद
बलहा चतुर्थ पंक्तौ ऋॠ औघझढधभवशाः पंचमपं
क्तौ ऌॡ अं ङ ञ ण न म स हा इति - वाय्वग्नि भूमिजलाका
शात्मकान्यं चवर्गात् विसर्गरहित पंचाशद्वर्णा विभागज
निताना लिख्य स्वनामाद्य स्वरं यत्र पंक्तौ तिष्ठति तदात्मं
अन्यत्र चेन्मंत्राद्यक्षरं तत्र वृद्धिं
त्रमेकभूतं देवत्यं सकुलं तेयं

तदातर्त्किंभूतदैवत्यमिति विचार्य तद्गुणदोषात् आत्मनो
नामाद्यक्षराधिदैवत भूतस्य विरुद्ध भूतदैवत्यं चेन्मंत्राक्षरं भ
वति तदा तन्मंत्रं त्यजेत् मित्रभूतदैवत्यं वा तटस्थभूतदैव
त्यं वा मंत्राद्यक्षरं स्यात् तदा तन्मंत्रं गृह्णीयात् अत्र भूतानां
वैरमैत्री तटस्थित्वा स्वरूपमुक्तं कुलार्णवे महीसलिल

अथ राशीनां वर्णभेदाः ॥

ब्राह्मण	क्षत्रिय	वैश्य	शूद्र
मीन कर्क वृश्चिक	मेष सिंह धन	वृष कन्या मकर	मिथुन तुल कुंभ


योर्मैत्रमनलानिलयोपि सामान्यमग्निभूम्योस्तु सलिलानिल
यास्तथा शात्रवं वै परित्येनमित्रं सर्वत्र चापरं परस्परविरुद्धा
नां वर्णानां यत्र संगति वर्जयेत्तादृशी मंत्रं नाशकृत् स्वकुलेश्वरी
अपरं आकाश इति स्वकुलान्यकुलशोधनप्रकारः ॥ अथ मं
त्राणां ब्रह्मक्षत्रादिभेदः तत्र कुलार्णवे ब्राह्मणक्षत्रियवै
श्यः शूद्रो भवन्ति वै मनुः अनुलोमेन देवस्य प्रतिलोमेन वा
विदिति वामकेश्वरतंत्रेषु ब्राह्मणक्षत्रियो वैश्यः शूद्राः
पौरस्त्यजातयः इति पंचभेदा रुक्ताः सौत्रामणीतंत्रे माया
वीजं ब्राह्मणस्याश्रीं वीजं क्षत्रियं स्मृतं कामबीजं भवेद्वैश्यो
वाग्भवं शूद्रमीरितं चतुर्वीजपरित्यक्तो मंत्रः पौरस्त्यसंज्ञकः ॥

चतुर्बीजं ब्राह्मणानां क्षत्रियाणां त्रिबीजकं कुलमूलावता
रे श्रीदेव्युवाच शाक्तशांभवसौराणां गाणेशे वैष्णवीषु च ब्र
ह्मक्षत्रादिवर्णानां शंकराणां विशेषतः प्रवृत्तिं श्रोतुमिच्छामि
साधकानां हिताय च येषु येषु च मंत्राणि तद्वदं वदशंकरः ई
श्वर उवाच उमामहेश्वरश्चैव दक्षिणामूर्तिघोरकं हयग्रीवं
च वाराहं मष्टाक्षरमतः परं प्रणवाद्यं वासुदेवं लक्ष्मीनाराय
णं तथा वर्णत्रये च दातव्यं नान्यवर्णे कदाचन पाशुपतं ना
रसिंहं तथा चैव सुदर्शनं वर्णद्वये च दातव्यं नान्ययोश्चैव क
र्हिचित् अग्निमंत्राश्च ये के चित्सूर्यमंत्राश्च ये तथा ताराध्य
क्षणमंत्राश्च दातव्याश्च त्रिवर्णके अनुष्टुभं शक्तिमंत्रास्तथा
विंध्यतिवासिनी तथा नीलसरस्वती दातव्याश्च विद्विवर्णके
मातंगी त्वुग्रतारा च कालिका स्यामला तथा छिन्नमस्ता च वा
ला च दातव्या सर्ववर्णके तारादिस्तु गणेशश्च हरिद्रासंगतस्त
था त्रिवर्णेष्वेव दातव्य कथितः सर्वसिद्धिदः त्रिपुराश्च ये मं
त्रा यं मंत्रा वटुकादयः सर्ववर्णेषु दातव्य पुरंध्रीणां विशेषतः प्र
णवं मायां लक्ष्मीं च वाग्भवं वर्षबीजकं एकद्विबीजसंयुक्तं दात
व्यं चादिवर्णके मायां लक्ष्मीं वाग्भवं च दातव्यं क्षत्रियेष्वपि ल
क्ष्मीं च वाग्भवं चैव कथितं वैश्यवर्णके वाग्भवं चान्यबीजं च
शूद्राणां समुदीरितं हृदादि हुं फट्कारादि शंकराणां प्रशस्य
ते इति॥ ॥ अथ सिद्धसाध्यादिशोधनप्रकारः तत्रादौ
द्वादशारचक्रे तत्र प्रागुक्तराशिचक्रप्रोक्तद्वादशारचक्रं विधाय
तत्र द्वादशखंडेषु प्रागादिप्रादक्षिण्यक्रमेण अकडम आखढ
य इगणर ईघतल उङथव ऊचदश ऋछधष ॠजनस

मै॰पा॰
५९

59

अथकडमचक्रमाह ॥ ॥



औजपऔह औजफल अंटवत्त अः ठभ इति मातृकावली
न्विलिख्य तेषु प्राग्वदेकामाद्यत्तरादि द्वादशांतानेकानपि समा
लिख्य यस्मिन्खंडे शिष्यनामाद्यत्तरं तिष्ठति तदारभ्य मंत्राद्य
त्तरपर्यंतं सिद्धसाध्यसुसिद्धारि क्रमेण गणयेत् तत्र कुलम्
लावतारे नवैक पंचमः सिद्धः साध्यषट् दशायुग्मकः सुसिद्धो
मुनिहुताग्निसूर्याष्टद्वादशोरिपुः इति दद्याद्द्वारारोहे मंत्रं दद्या
द्विशालधीः अथैतेषां फलान्यग्रे वक्ष्यंते ॥ अथषोडशार चक्रे
सिद्धसाध्यादिशोधनप्रकारः तत्रप्राक्प्रत्यगायतान्दक्षिणोत्त
रायताश्च पंचपंचरेखाविलिख्य षोडशकोष्ठानि चतुस्रतुः
कोष्ठैनैकैकचतुष्कमिति चतुष्क चतुष्टरूपेण चतुर्द्धा विभज्य।
तत्रैशानगतचतुष्कस्य कोष्ठचतुष्टये ईशाणकोष्ठादिप्राद
क्षिण्येन अकथह उङपल जम ओडप अग्नि चतुष्के ईशा

नदिशि दक्षिणेन आखदल उवफल लजय औढश नैर्ऋत्य
चतुष्के ईशानादि प्रादक्षिण्येन इगधक्ष ऋछव एटर अंणष
वायुचतुष्के ईशादिश दक्षिणेन ईचन ऋभम ऐठल अःतस
इति समस्तमातृकाणि विलिख्य शिष्यनामाद्यक्षरं यत्रकोष्ठे
तिष्ठति तत्कोष्ठमारभ्य मंत्राद्यक्षरः यत्रकोष्ठ एवस्थितिः चे
त्समंत्रः सिद्धसिद्ध इति ज्ञेयः तच्चतुष्क एव द्वितीयकोष्ठे चेन्मं
त्राक्षरे तदा मंत्राः सिद्धसाध्यः तृतीये चतुष्के चेत्समान कोष्ठे

प्रथकथहचक्रम ॥ ॥			
अकथह १	उङप २	आखदल ५	उवदफ ६
ओडव ९	लजम २	औढश ८	लजए ७
ईचन १२	ऋजभ १४	इगधुक्ष ७	अछव १०
अः तस १६	ऐठल १५	अणष १२	एटर ११

परिकल्प्य तदारभ्य प्रादक्षिण्येन गणयेत् तत्र प्रथमकोष्ठे मं
त्राद्यक्षरं तिष्ठति तदा समंत्रः साध्यः सिद्धः द्वितीये चेत्साध्यसा
ध्यः तृतीये साध्यसुसिद्धः चतुर्थे साध्यारिः एवं तृतीयचतु
ष्केपि प्रथमकोष्ठे सुसिद्धसिद्धः द्वितीये सुसिद्धसाध्यः तृती
ये सुसिद्धसाध्यः तृतीये सुसिद्धसुसिद्धः चतुर्थे सुसिद्धारिः ए
वं चतुर्थचतुष्केपि प्रथमकोष्ठे चेन्मंत्राद्यक्षरं तदा अरिसि
द्धः द्वितीये चेदरिसाध्यः तृतीये अरिसिद्धः चतुर्थे अर्यरि ॥

इतिसम्यग्विचार्य्य विज्ञाय मंत्रमेलनं कुर्यात् अन्यथा मंत्रस्त्व
नर्थकारि भवेत् नास्ति मंत्रसमं मित्रं नास्ति मंत्रसमोरिपुरिति
वचनात् अथैतेषां फलानि तत्रकुलमूलावतारे सिद्धः सिध्य
ति कालेन साध्या सिध्यति वा नवा सुसिद्धस्तत्क्षणादेव अरि
मूलं निकृंतति राजतंत्रे सिद्धः सिद्धोजपात्सिद्धोजपात्सिद्धो हि
गुणात्सिद्धि साधकः सिद्धिस्तु सद्यः संप्राप्नोतिसिद्धारिर्हंतिगोत्र
जात् साध्यसिद्धेस्तु संक्लेशात्साध्य साध्यो तदुःखकृत् साध्ये
सुसिद्धे भजनात्साध्यारिः स्वास्तियं हरेत् सुसिद्ध सिद्धोर्द्धजया
त्फलं दद्याज्जयेप्सितं सुसिद्धसाध्योजपाद्येसिद्धयोस्यादतोन्य
या सुसिद्धेतु सुसिद्धस्तु पूर्वजन्मकृतश्रमः तस्मात्तं सर्वसिद्धी
नां साधयेत् योजपेत् मनुं सुसिद्धारिरशेषेण स्वकुलं मारयेध्रुवं
अरिसिद्धः सुतं हन्यादरिसाध्यस्तु कन्यकां तत्सुसिद्धस्तु पत्नीं
भ्योअप्येरि साधकोपहः तथासारसंग्रहे दुष्टर्क्षराशिभूतारि
वर्णप्रचुर मंत्रकं सम्यक्परीक्षितं यस्माद्वर्जयेन्मतिमान् नरः
अत्रमंत्रमेलने प्रसिद्धमेव नामग्राह्यं सिद्धसाध्यादियोगेषु मं
त्रदाने विशेषतः प्रसिद्धनाम रक्षीयात्स्व सुप्तो येन जागृवान्
इति ज्ञानोनयनवचनात् तथासारसंग्रहे आदौसिद्धस्तथांते
च सर्वसिद्धिफलप्रदः आदावंतेभवेत्साध्यः कष्टसाध्यउदाहृतः
आदावंते सुसिद्धस्तु प्रियमेव प्रसिद्ध्यति आदौसाध्यः सुसिद्धोंते
प्रोक्तमार्गेण सिद्ध्यति सुसिद्धादिस्तु साध्यति स्वतर्गेण मुपेक्षि
ते आद्यंतयोर्यदासिद्धोमध्ये साध्यः प्रजायते आद्यंतयोर्यदा
सिद्धो---------तावुभौ साध्यसिद्धौहि जयाधिकेन सिध्य
तः आदौसिद्धिनसंयुक्तः सुसिद्धेन तथापरः श्रवणादिदेव

सिद्धे न साधकैकस्य न संशयः सिद्धं तरितसाध्यं तु सुसिद्धं तत

रितोयवा सिद्धं तिसिद्ध्यति मंत्रो यथोक्तं मंत्रवत्तमैः सिद्धं

नोतरितः शत्रुः सुसिद्धो पि तथा यदि सिद्ध्यत्यतीच कष्टेच साध

कस्य चनान्यथा रिपूणां तरितं सिद्धं सुसिद्धं च तथा त्यजेत्

रिपुणा दूषितो मंत्रो नैव ग्राह्यः कदाचन। विजयमालिनी

कात्यैं अल्पदोषा बहुगुणा मंत्रा देय विचक्षणैः सिद्धादि

कोष्ठकं ज्ञात्वा ततः सिद्धिप्रजायते कुलार्णवे एकाक्षरे

तथा कूटे त्रैपुरे मंत्रनायके स्त्रीदत्तो स्वप्नलब्धे वा सिद्धादीने

वशोधयेत् नृसिंहार्क वराहानां प्रासादप्रणवस्य च स

पिंडाक्षरि मंत्राणां सिद्धादीनै वशोधयेत् सोमसिद्धांते पा

णाद्यां त्र्यक्षरं मंत्रे त्रैपुरं चंडनायकं सौरं मृत्युंजयं शाक्त

णांभवं वनिताक्षते सौरमंत्रास्तु ये पिस्यु वैष्णवा नारसिंह

काः सिद्धसाध्य सुसिद्धारि विचार परिवर्जितः प्रणवेच्यक्ष

रं मायो व्योमव्याप्यं षडक्षरं मालामंत्रेषु सर्वेषु सिद्धादीत्रै

वशोधयेत् तथा रत्नसागरे हंसस्याष्टाक्षरस्यापि तथा

पंचाक्षरस्य च एकद्विश्रीणि बीजस्य सिद्धादीनै वशोधये

त् रुद्रयामले अघोरमंत्रं देवेशमाला मंत्रस्य पार्वति न

पुंसकस्य मंत्रस्य सिद्धादीनै वशोधयेत् कुलमूलावतारे।

स्वमोपदिष्टमंत्रस्य न विधिनैव च क्रिया उद्दिष्टदेवताध्याला

जपेत्सुभकरं भवेत् अगस्तिसंहितायां रामतंत्रेषु सर्वेषु


प्रणवस्य मुनिपुंगव तारकत्वान्मंत्रराजे सिद्धादीनैवशोधये

त् सिद्धांतरि त्नेश्वरे एकत्रिपंचाक्षरमन्त्राणं वहुाक्षरान्विते

भै॰पा॰
६१

द्वात्रिंशदक्षरे मंत्री सिद्धादीनेव शोधयेत् येच यौद्धातेनते या गोपाला वैस्नवा वे सिद्धारि विचारपरिवर्जितः व्योमव्यापी षडर्णीस्च मातृकाहरवल्लभा बहुरूपाह्वमंत्राः पंचसाधारणामताः अथ षट्दलचक्ररचनाप्रकारः॥ तत्र षट्दलं कमलमालिख्य तत्रदलेषु प्रागादिशदक्षिणेन ऋॠऌ ॡवर्जितात् मातृकावर्णानेकैकशः पुनः पुनः समालिख्य तत्र स्वनामाद्यक्षरं यत्र दलेतिष्ठति ततः प्रथमदलं परिकल्प तदारभ्य मंत्राद्यक्षरं यत्र तिष्ठति तद्दलपर्यंतं गणयित्वा तत्फलानि विचारयेत् तान्तिन्सारसंग्रहे प्रथमे संपद्धिद्धिष्ठाद्वितीये संपदं तकः तृतीये तथृतिर्विद्या चतुर्थे वै धुविग्रहः पंचमे शोस्यर्थं विद्यात षष्टे सर्वविनाशनः इति षट्दलचक्रम्॥ ॥अथ ऋणधन चक्रनिर्माणप्रकारः

षट्दद्दलचक्रमिदम्



तत्र दक्षिनायत सप्तरेखा प्राग्यत्यगायता द्वादशरेखाप्रत्यगायिता द्वादशरेखा स्वविलिख्य षट्षष्टि ६६ को

ष्टानि कृत्वा तत्र सर्वोपरि गतैकादशकोष्ठात्मक प्रथम
पंक्तौ स्ववामादि दक्षिणांतं प्रथमकोष्ठे १४ द्वितीये २७ तृ
तीये २ चतुर्थे १२ पंचमे १५ षष्ठे ६ सप्तमे ४ अष्टमे ७ न
वमे ८ दशमे ८ एकादशे ९ इत्येकादशभेदानांकालि
ख्य तदधो द्वितीये पंक्तौ स्ववामादि दक्षिणांतं अईउ ऋ
लृ एऐ ओऔ इत्येकादश स्वरानेकादशकोष्ठेषु समालि
ख्य तदधः पंक्तौ ककारादि टकारांतानेकादश वर्णान्स
मालिख्य तदधःपंक्तौ टकारादि फकारांतानेकादशवर्णा
न्नालिख्य तदधपंक्तौ वकारादिहकारांतानेकादशवर्णान्वि
लिख्य तदधपंक्तौ वकारादिहकारांतानेकादशवर्णान्वि
लिख्य १०।१।७।४।८।३।७।५।५।४।६।३ इत्येकाद
शविधानं कानेकादशं कोष्ठेषु लिखेदिति कटवचक्रं नि
र्मायाविचारयेत् तत्र स्विष्टमंत्रस्य वर्णात्स्वरव्यंजन विंदुवि
सर्गान्कृत्वा सर्वोपरि गतपंक्तिस्थानकेमस्थयस्य वर्णास्य
योयोअंतं तं वर्णं तेन तेनांकेन संजातसंख्या समुदायम
ष्टभिराहृत्या वशिष्टमंकं पृथक्संस्थाप्य शिष्यनामाक्षरा

							३	८	८	९
१४	२७	२	१२	१५	६	४	ओ	औ	अं	अः
अआ	इई	उऊ	ऋॠ	लृॡ	ए	ऐ	ज	झ	ञ	ट
क	ख	ग	घ	ङ	च	छ	ध	न	प	फ
ठ	ड	ढ	ण	त	थ	द	श	ष	स	ह
व	भ	म	य	र	ल	व	५	४	६	३
१०	१	७	४	८	३	७				

भै॰पा॰ णि च तथैव स्वरव्यंजनबिंदुविसर्गैः पृथक् कृत्वा सर्वाधः
९२ पंक्तिस्थांकेषु यस्य यस्य वर्णस्य यो योऽङ्कः तेनांकेन गण
यित्वा संख्यानां कसमुदाय मष्टभिर्भक्त्वा वशिष्टमेकं पृ
थक् संस्थाप्य मंत्रसाधकयोरवशिष्टांकद्वय मध्ये योऽङ्क
स्त्वधिकसंख्याकः स ऋणी मंत्रश्चेद्दृणी स्यात्तदा स मंत्रो ग्राह्यः
यस्य मंत्रस्य साधको ऋणी भवति स मंत्रस्त्याज्य इति इति
ऋणधनशोधनप्रकारः तंत्रराजे कथं ऋणत्वं मंत्राणां
साधकानां च मेवद पूर्वजन्मकृताभ्यासे पापादस्याफलाधि
कृत् पापेनष्टे फलावाप्तिर्नीयते शंसयेन्नृणां मंत्रस्तु प्राप्ति
मात्रेण प्राक्तनः सिद्धिदो भवेत् सिद्धमंत्राङ्कुरो मंत्रो यं सिद्धि
भागनरः लक्ष्मीमदादनादृत्य मंत्रभोगमवाप्नुयात् स मंत्र
स्य ऋणी ऋयो भजनं तस्य पूर्वकं तस्माद्दृणविशुद्धिस्तु का
र्या सर्वैस्तु सर्वतः इति मंत्रसाधकयोरन्योन्यं ऋणित्वं च
धनित्वं च ऋणविशुद्धिस्तु मंत्रस्य यावत्संख्याको साधको
जायते ऋणी तावत्संख्यालक्षजपेनै ऋणशुद्धिर्भवेदिति
संप्रदायिका ॥ इति श्रीभैरवार्चापारिजाते नवमस्तवकः ९
प्रथदीक्षांगभूतमंडपरचनार्थं प्राचीपरिज्ञानस्यावश्यक
त्वात् तत्परिज्ञानप्रकारः प्रदर्श्यते तत्र मेषानावृत्तसूर्ये
निर्मलेनभोमंडलीदिवसे वृद्धप्राप्ति साराघनावृत्ते भूप्र
देशे समसमे स्थाने क्वचिद्बिंदुं कृत्वा तदवर्षमतः प्रतिदि
वसं द्वादशांगुलमानेन वृत्तं निष्पाद्य तत्र षडंगुलमान प
रिणाह मूलमुत्तरोत्तरपरिणाहा प्रचयेन सूचीसवक्रीकृ
ताग्रपरिणाह मृज्वाकृति द्वादशांगुलोच्छायोपेते वृत्तकारं

शिल्पिवरेणनिर्मितं शंकुंवृत्तमध्यस्थं विंदुमध्येशंकुमूलप
रिणाह मध्यंययाभवतितथासंस्थाप्य ततःशंकुछायाग्रस्य पू
र्वाह्णेतद्वृत्तरेखापश्चिमभागेयत्रसंपातस्तत्राचिह्नं कृत्वापराह्णे
शंकुछायाग्रस्य तद्वृत्तरेखा पूर्वभागे यत्रसंपाते चिह्नंविधाय
तच्चिह्नद्वयप्रापियत्सूत्रंविधाय पूर्वपश्चिमंपारिकंकल्पयत चि
ह्नद्वयावष्टंभेवर्तिन तच्चिह्नान्तरात्समानस्यचेष्टाधिकेनार्द्धमा
नेनान्योन्यतमेनान्यतमेन किंचिदन्योन्य संश्लिष्टं पूर्वापरंवृ
त्तद्वयं विधायवृत्तरेखा दक्षिणोत्तर संधिद्वयप्रापिप्राक् पश्चि
मसूत्रमंत्रगत्वातिर्यग्रूपेणयत्सूत्रंतद्दक्षिणोत्तरंपरिकल्प्य द
क्षिणोत्तरसूत्रद्वयसंपाताद्धस्तमाणमानेनतुल्यरूप कल्पित
सूत्राग्रैस्तेषांमंडपकुंडादीनांप्राग्प्रत्यक् दक्षिणोत्तरात्मका
दिक्चतुष्टयंकरिकल्पयेदिति प्राचीसाधनंविधाय वाहमात्र मु
द्दिष्टमानान्यधिकांचतरत्वाभुवं खननादिभिः तथाणगाराश्थि
लोष्टचिकंमेरस्य सुदृढमुद्गिरापूर्य्य दृढीकृत्य कीलेनेकेकृ
त्य मूलेनपृथक् हस्तसमाग्रयोः दंडयोरग्रनेकयान्यस्य तन्म
ध्यचिह्नित कीलादिनायोजनीयदंडः समतया मूलदेशेलंबसू
त्रमशङ्कास्वतभुवंमूस्थेग्रयुगमेमध्यास्फातिय दंडनिगताद्यखने
तत्पूरये दन्यंनिम्नयेच्चापि युक्तितः शंकेयावत्सूत्रमेतिभूरेवं
समंताव्रजेत इतिशिल्पशास्त्र प्रकारेणभूमींसमीकृत्य तत्रो
त्तममध्यमकनिष्ठान्यतमंमंडपंकुर्यात तत्रषोडशहस्तैरष्टा
दशहस्तैर्वोत्तमोमंडपोद्विविधः विंशतिहस्तैरप्युत्तममंडपंके
चिदाहुः चतुर्दशहस्तैर्द्वादशहस्तैर्मध्यमोपिद्विविधः दशह
स्तैर्नवहस्तैः सप्तहस्तैः पंचहस्तैश्चसमायामविस्तारैः कनिष्ठश्च

चतुर्विधः अत्रपक्षत्रयेपि यथावकाशं शक्तिकस्यस्य सम
युपायुपवेशादि सौकर्ययुक्तमित्येकस्मात्प्रकारेण मंडपंकु
र्यात् हस्तचतुर्विंशांगुलं दैर्घ्यमानंज्ञेयं अथावशिष्टस्यदक्षि
णहस्तस्यमध्यमांगुलिमध्यपर्वपरिणाह मानस्यतृतीयांशों
गुलः तैश्चतुर्भिर्मुष्टिः मुष्टित्रयेण वितस्तिः वितस्तिद्वयेना
रत्निः अरत्निद्वयेनहस्तः इत्यन्यपक्षः अथवाऊर्ध्ववाहोः
समस्थितस्यनरस्य यः पंचमांशः सहस्तः चतुर्विंशतितमो
भागस्यांगुलः इत्येवमुक्तप्रकारः येयथागुरूपदेशमेकप्र
कारमंगीकृत्य हस्तादिपरिकल्प्यप्रोक्तमंडपादिकं कुर्यात्
तत्रप्रोक्तविधिनासमीकृते भूतलेपंचसप्तघोषप्रस्मरंवा
स्मरणैः स्वस्तिवाचयित्वा यथोद्दिष्टमानविचारं समचतुर
स्रं कोणांत्र चतुष्टयनिखातशंकुचतुष्टयलग्नं रज्जुचतु
ष्टयंविधायपूर्वपरायतं दक्षिणोत्तरास्त्रंतेच मध्यसूत्रं हूरि
कृत्य तच्चतुरस्रक्षेत्रंपुनर्नवधाविभज्य परितः कोणचतु
ष्टयेस्तंभचतुष्टयं दिक् चतुष्टयगतपूर्वापरायता दक्षिणो
त्तरायतसूत्रचतुष्कोष्ठगतस्तंभाष्टकमिति संभूतद्वादशस्तं
भात्रातिस्थूलकृष्णत्ववाक्रांतव्रणानेकजातीयान्सुवहस्तस
मुच्छ्रायान् द्वादशस्तंभान्खातप्रविष्टस्यस्वपंचमांशान् प्र
माणवहिस्स्वस्वस्यैाल्पतृतीयांशस्थूलदितस्थूलशिखायुक्ता
न् मध्यविभक्तेः कोणचतुष्टयेस्तंभचतुष्टयं पूर्वस्तंभसजा
यंपूर्वतः किंचित्स्थूलमनूपेतन्मानस्यार्द्धमानोच्चमंन्ये
मंडपेषण्हस्तसमुन्नतंपूर्ववत्समिस्तंभं पंचमांशेनप्रवि
ष्टम्भूतलमीति षोडशस्तंभालिखायते षामुपरिसमजातीया

निक्रजह्न्य ब्रणानि शिखाप्रदेशयोज्य वेदयुक्तकोटियुक्तद्व
यवतिरयाकाष्ठानि शिल्पिभिः परिकल्पितानि द्वादशस्तंभाग्रे
षु मध्यस्थेभ चतुष्टयाग्रेषु चतुरस्राकारेण समारोप्य मध्यस्त
भचतुष्टयशिखाग्रप्रविष्टमूलवेधयुक्तमकीकृताग्रचतुष्टय
नीविष्टं शिल्पिवरनिर्मितसयातीयकाष्ठकलशकमलाकृति
णोभितादिग्विदिस्थाद्वादशस्तंभशिखाग्रप्रोतमूलमध्यस्तंभ
चतुष्टयाग्रस्पृष्टाग्रंक तन्मध्यतिर्यक्काष्ठयमध्यगताग्रंक्र
ज्वाकृतिर्यथायोग्यदीर्घस्थौल्ययतप्रसारित द्वादशकाष्ठयुत
मन्यैरपि काष्ठैर्यथायोग्यदृढीकृतं नारिकेलदंतैर्वंशवटैर्वा
ससस्यगाद्वादितंतैरेवनिः शेषपिहितकोण चतुष्टयं चतुर्दि
क्षु तममध्यमकनिष्ठेषु सार्द्ध हस्तद्वयसंपाद हस्तद्विहस्तविस्ता
रयुतषड्द्वार चतुष्टयोपेतं मंडपं विरच्य मंडपस्य पूर्वद्वाराद्बहि
र्हस्तमात्रं परित्यज्यास्य चतुष्कोणोत्तममध्यमकनिष्ठेषु सद्यो
पंच
षड्हस्तोद्धितं दशांगुलविस्तृतं पंचांगुलस्थूलं विषमचतुरस्रं
प्रमाणातिक्तवितस्त्युन्नतशिखंडारस्योभययार्थ्ड तममध्य
कनिष्ठेषु सार्द्धसहस्तद्वयंरालंयथा पूर्वं पंचमं वंशेन प्रविष्ट
भूतलं फलद्वयं अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजं होता
रं रत्नधातमं इति मंत्रेण विधाय तत्सजातीयकाष्ठेन समान
विस्तारस्थूलं विषमचतुरस्रं कोटिद्वयेपि शिखाप्रवेशयोग्य
वेदयुतं द्वयांतरालेषु त्रिहस्तदेतिर्यक्कुलकं समारोप्य दर्भ
मालां च बध्नीयात् एवं दक्षिणद्वारे स्तंभतरुमयं तोरणं ॐ इषे
त्वोर्जे त्वा वायवस्थः देवो वः सविता प्रार्प्यतु श्रेष्ठतमाय कर्मण
आप्यायध्वमघ्न्या इंद्राय भागं प्रजापतिरनमीवा अयक्ष्मा वस्तेनई

घृतमाघ्रशूं ऽस्मिन्गोपतौस्यात्नवह्वीर्यमानस्यपश्भूत्याहि
इतिमंत्रेणन्यसेत् ततः पश्चिमद्वारेषु उडंबरमयं तोरणं प्राग्व
न्निर्मितं अग्न्यआयाहवीतयेग्रणानोहव्यदातये निहोतास
सिमेहिर्षिरितिमंत्रेणन्यसेत् ततउत्तरद्वारे वटृ वक्षमयंतोर
णं प्राग्वन्निर्मितं शन्नोदेवीरभिष्टये आपोभवंतुपीतये शंय्योर
भिस्रवंतनः इतिमंत्रेणन्यसेत् अथवा पूर्वद्वारेऽश्वत्थमयं
दक्षिणेऔदुंबरं पश्चिमेप्लाक्षं उत्तरेन्यग्रोधजमिति तोरण
चतुष्टय मुक्तलक्षणमंत्राविधिनैवस्थापयेत् ततस्तेषामुप
रितनतिर्यकफलकेषुमध्यतः स्वाणिरविधाय तेषु तोरणस
जातीयाकाष्ठेननिर्मितं हस्तमात्रदैर्घ्यशेवे त्रिशूलाकारं वै
ष्णवेशंखचक्रगदापद्मलांछितं प्रतितोरणमेकमेकंकील
मारोपयेत् ततोमंडपाग्रेदशहस्तदैर्घ्यंवंशदंडावलंवितंह
स्तमात्रविस्तृतं पंचहस्तदैर्घ्यंदातव्यं मंत्रदेवतावाहनमूर्त्या
कितंघंटादिभूषितांगं स्वशेतंमंत्र ततद्दैवतवर्णानुरूपवर्णा
वाध्वजमारोप्य दशादिक्षुवाहुमात्रदीर्घायथायोग्या मानदं
डावलंविता ततलोकपालवर्णानुरूपवर्णा तदोकपाल वाह
नमूर्त्याकिताः द्वादशांगुलविस्तृतः लोकपालांवेदोक्त तत्तन्मं
त्रेणपताकाश्चवध्नीयात् तत्रेंद्रस्यपीतवर्णाः वह्नेःपिंगलवर्णा
यमस्यकृष्णवर्णाः नैऋत्यामवर्णिवः वायोधूम्रवर्णाः सोमश्याम
वर्णाः ईशानस्यश्वेतवर्णाः ब्रह्मणोरक्तवर्णाः अनंतश्यामवर्णाः
इतिपताकाभिरलंकृत्य मंडपाभ्यंतरं सश्वेतवितानपुष्पमा
लादिभिरलंकृत्या(मंडपाभ्यंतरं स्व) श्चाश्वत्थदलग्रथितदर्भरं
जुरूप वर्धमालाया मंडपमंत्रवहिश्चपरिवेष्ट्यास्तंभतडकलेः।

संवेष्ट्य तन्मध्यगते चतुरस्रं हूपे मेध्यखंडे जपकोष्ठकाभिः
स्निग्धमृद्भि चतुरस्रां दर्पणोदरतिभयास्वत्तुष्टयमध्यप्रदेशास्त
मतलां हस्तमात्रोच्छ्रायवती वेदीविदध्यात् इति मंडपनिर्माण
विधिः ॥ इत्थं मंडपविधाय पूर्वादितोरणसमीपेषु शालिपंजो
परि वक्ष्यमाणलक्षणं वक्ष्यमाणविधिनाप्रतिद्वारमेकमेकं कुं
भं संस्थाप्य तत्रपूर्वदिग्गतकुंभे च वंदक्षिणे धरां पश्चिमे वा
क्पतीं उत्तरे विघ्नेशं संपूज्य तदनु मंडपस्य कोणचतुष्टये कुं
भान्संस्थाप्य तेष्वाग्नेयकुंभेषु अमृतं नैऋते दुर्जयं वाय
व्ये सिद्धार्थं ईशाने मंगलं च संपूज्य पुनः पूर्वादिकुंभे छिंद्रा
दीन् लोकपालान् वायुप्येदीनामंत्रैसंपूज्य पुनः प्रसाद्य
ष्टदिशि ऐरावतं पुंडरीकं वामनं कुमुदांजनौ पुष्पदंतसार्व
भौमं सुप्रतीकं च पूजयेत् । इति दिग्गजान्संपूज्य । अस्मिन्मंडपे
पूर्वाद्यष्टदिक्षु चतुर योनि अर्द्धचंद्रत्रिकोण वृत्त षट्कोणपद्म
अष्टास्राख्यान्यष्टकुंडानि कुर्यात् तत्रादौ चतुरस्रकुंडनिर्माणप्र
कार तत्र वेद्यः पूर्वभागे सार्द्धहस्तमात्रं भुवं परित्यज्य प्राक्क
ल्पितादिक्रमेण प्राक्प्रत्यगायतं सूत्रमास्फाल्य तन्मध्ये विद्ध
कृत्वा ततश्चिह्नपूर्वतः पश्चिमतः द्वादशांगुलमानेन चिह्नं कृ
त्वा तत्वधिकांशं मार्जयित्वा ततः चिह्नद्वयाच्चष्टंभेन ततस्तत्तु
ल्यमानक्रमेण पूर्वापरतः किंचिदन्योन्यसंश्लिष्टं वृत्तद्वयं विचा
र्य तयोर्दक्षिणोत्तरहंसपद प्राक्प्रत्यक् प्रसृतसूत्रमध्यगतहं
सपद समेदाद्दक्षिणोत्तरं तं चिह्नद्वयं विधाय तत्तदिकांशं मार्जे
यित्वा तत्सूत्राग्राश्चतुष्टयावलंबेन द्वादशांगुलमारोप्य चतुर्षु
कोणेष्वपि हंसपदं विधाय तत्पदं शपद प्राप्ति प्राक्प्रत्यक् सूत्रद्व

यंकें दक्षिणोत्तरसूत्रद्वयं च संभूय सूत्रचतुष्टयमास्फाल्य स
मचतुरस्रं कुर्यात् ततस्तस्य प्राक्प्रत्यगायतगवल्लसूत्रमा
नतिरस्तं चतुरस्रं तत्र खातं कृत्वा तत्परितः कुंडमानस्य च
तुर्विंशांशमितां भुवं परित्यज्य तद्बहिर्द्वादशांगुलविस्तारं च
तुरंगुले मेथा मेखलां कृत्वा तदुपरि वासे परितः चतुरंगुल
मानं त्यक्त्वा षडंगुल विस्तारा चतुरंगुलोन्नता द्वितीयां मेख
लां कृत्वा तदुपरि वासे चतुरंगुल त्यक्त्वा विस्तारोत्सेधाभ्यां च
तुरंगुलैर्मितां तृतीयां मेखलां कुर्यात् तत्रसेचेत्प्रथमे मे
खलां चतुरंगुलविस्तृता नवांगुलोन्नतं द्वितीया तु त्र्यंगुलवि
स्तारा पंचांगुलोन्नता तृतीया तु द्व्यंगुलविस्तृता द्व्यंगुलोन्नतेति
त्रिमेखलामातमाहुः तत्र त्रिमेखलायां सहहस्तमाख्या त
पक्षेरेयं हस्तमात्रखातपक्षे सर्वेषां मेखलामानं विन्यास
तष्टतद्द्वैकैर्विस्तारोत्सेधयोः कुर्यादिति तत्र राज्ञावचनात्
सत्यपूर्वीकगुणान्विता क्रमाद्द्वादशाष्टचतुरंगुलोच्छ्रितसर्व
तोंगुलचतुष्कविस्तृता मेखला सर्वसिद्धियस्तुमता इति प्र
पंचसारं पूर्वोक्त एव पक्षः समीचीनः इति सिद्धांतः ततः स
र्ववायुस्य मेखलामध्ये द्व्यंगुलयायामविस्तारमेकांगुलोत्सेधं च
तुरस्रं पीठं सदा कृत्वा तदुपरि निहितं मूलद्वादशांगुलदीर्घोत्त
रोत्तरहीनपरिसाह मध्ये मेखला सच्छाग्रनालयुता मूले कुंभद्व
ययुक्तां मध्ये सगतां सपरितनमेखलोपरिगतां षडंगुलमान
विस्तार मध्यां तत्प्रदेशादुभयपार्श्वतः अनेन संकुचितास्वाहा द
शांगुलमानायामां सैकांगुलोत्सेधामश्वत्थपत्राकारां मूलात् किं
चित् कालां क्रमान्निम्नां ईषन्नताग्रां कुंडशांति छायां योनिं कुर्यात् अ

स्यमध्यकुंडस्यार्हसपदावलेवनेनप्रतिदिशं चतुरंगुलमानेवव
त्तेनिष्पाद्यः पुनः षडंगुलमानेनचवृत्तं कृत्वावृत्तं कर्णिका
परिकल्प्य वृत्तेद्वयांतरालनीभ्यामष्टदलानि कृत्वा नाभि
कुर्यादिति इतिचतुरस्रकुंडानिर्माणविधिः॥ ॥अथयोनि
कुंडनिर्माणप्रकारः तत्रप्राग्वच्चतुरस्रंनिर्मीयचतः कोष्ठयुग
स्य तस्यप्रक्षसूत्रं तन्मानपंचमांशेन पूर्वस्यांदिशिवर्द्धयित्वा
तत्कोष्ठचतुयात्मकः चतुरस्रपश्चिमभागस्य दक्षिणोत्तरको
ष्ठयोनैरृत्यांएंतमाग्नेयादिवायव्यांतेच कोण सूत्रद्वयास्फा
लनेन लक्षित सूत्रद्वयसंपातविदितमध्यदेशावष्टंभतस्तत्को
णावधिमानेनोत्तर कोष्ठे प्रागपत्यग्ब्रह्मसूत्रपश्चिमाग्रादि
दक्षिणोत्तरतिर्यग्सूत्रोत्तराग्रावधि दक्षिणकोष्ठेतत्सूत्रपश्चि
मादि ततदक्षिणाग्रावधिव अमादर्द्धचंद्रद्वयमुपपद्य तन्म
ध्यतिर्यग्सूत्राग्रद्वयमारभ्य प्राग्प्रसारित भस्मसूत्राग्रावधि
सूत्रद्वयस्फालनेन योन्याकारंक्षेत्रं परिकल्प्य तद्बहिश्च कंटकेमेख
लयोर्यथोक्त मानेनोक्तआत्मायोनिमंडलद्वयंनिष्पाद्य प्राग्वत्प्र
तेकृत्या कंटमेखलाकल्पयेदिति २ अथार्द्धचंद्रकुंडरचनाप्रकारः
तत्रप्राग्वच्चतुरस्रंविधाय तद्विष्कुंभमानंदशधाविभज्य तेषुचै
कांशं तत्प्राग्वत्पश्चिमयोः परित्यज्य चिह्नद्वयं विभज्यविधाय
तत्पश्चिमचिह्नात् दक्षिणोत्तरायततिर्यग्सूत्रं तच्चतुरस्राद्बहिरंश
यंशात्रयस्मात् त्रयावधिकस्फाल्यतदग्रद्वयावधितकल्पितपश्चि
द्वस्व सूत्रसंधिमध्यवलंवनेन प्राककल्पितचिह्नादष्टांशमानेनभ्र
मादर्द्धचंद्राकारं कुंडंभवेदिति इत्यमर्द्धचंद्राकारं मंडपंनिर्मीय
तद्बहिरप्युक्तयुत्मा एकांगुलमानेनचार्द्धचंद्रनिभमंडलद्वयं क

त्वा प्रथमकृतमंडलमध्ये हस्तमात्रनिम्नखातं कृत्वा वहिकट
स्थानं परित्यज्य प्राग्वन्मेखलादिकं कुर्यादिति ३ अथ त्रिको
णकुंडरचनाप्रकारः तत्र प्राग्वच्चतुरस्रं कृत्वा तद्ब्रह्मसूत्रस्य
प्रागग्रं वहिर्गत्वा प्रसार्य तच्चतुरस्रविष्कंभमानं चोडा विभज्य ते
ष्वेकैकांशमानेन पाश्चिमतिर्यक्सूत्राग्रद्वयं पार्श्वद्वयोर्वहिःसूत्राग्र
तदग्रद्वयान्तत्सूत्रमानो येत सूत्रद्वयस्य प्राक् प्रसारित ब्रह्मसूत्र
स्य च त्रयसंपातदवध्यास्फाल्य त्रिकोणकुंडं परिकल्प्य तद्वहिरे
कांशमानेन तद्वहिर्दशांशमानेन चोक्तयुक्त्या त्रिकोणद्वयं निष्पा
द्य खातकंठमेखलादि प्राग्वत्कल्पयेदिति ४ ॥ अथ वृत्तकुं
डरचनाप्रकारः तत्र प्राग्वच्चतुरस्रं क्षेत्रं साधयित्वा तन्मध्यवि
ष्कंभमानमष्टादशधा विभज्य तदेकांशमानं तच्चतुरस्राद्वहि
ब्रह्मसूत्रस्य प्रागग्रं विस्तार्य मध्यचिह्नमवलंब्य विस्तारितब्र
ह्मसूत्राग्रमानेन कंठार्थं वृत्तं कृत्वा तत्तद्वहिः पुनर्द्वादशांगुलमा
नेन वृत्तान्तरं निष्पाद्य प्रथमकृतवृत्तमध्ये हस्तमात्रनिम्नखातं
कृत्वा कंठवृत्ताद्वहिः द्वादशांगुलांतरवीथ्यां प्राग्वन्मेखलात्रयं
योन्यादिकं च रचयेदिति अत्र वृत्तकुंडे योनिर्नास्ति केचित् यो
निपद्मकुंडे नाभिश्च नास्तीति सिद्धांतः ५ अथ षडस्रकुंडरचना
प्रकारः तत्र प्राग्वच्चतुरस्रं विधाय तन्मध्यमानं षोडशधा वि
भज्यते षेकांशमानेन ब्रह्मसूत्रस्य प्रामत्रे विकारस्य तन्माने
न चतुरस्रमध्यसूत्रं हंसपदमध्यावलंबेनेन भ्रमवृत्तं तन्म
ध्यविष्कंभमानार्द्धेन तन्मध्यात्तिर्यक्सूत्रं दक्षिणादिपरितो वृत्ते
चिह्नषट्कं विधाय तत्र चिह्नात् चिह्नं यावद्रूपं सूत्रयन् क्रमा
स्फाल्य तच्चायवद्रूपवृत्तखंडानि मार्जनेन षट्कोणकुंडक्षेत्रं नि

ध्याय तद्बहिः रेकांशत्तोद्वादशांसतः चोक्तयुक्त्याषट्कोणद्ब
यंनिधाय खातोदीनि प्राग्वत्कल्पयेदिति ६ अथ यमकुंडरच
नाप्रकारः तत्रप्राग्वच्चतुरस्रवृत्तं क्षेत्रमष्टधाविभज्य तन्मध्य
चिह्नावलंबेनेनपरितोंशत्रयमानेन कर्णिकाचतुरस्रवृत्तेचाद्ब
हिवृत्तंनिधाय तद्बहिरप्यंशत्रयमानेनकेशरार्थे वृत्तकृत्वा तद्ब
हिरप्यंशत्रयमानेनदलार्थे वृत्तंविरच्य तद्बहिरप्यंशत्रयमानेन
वृत्तंर्भ्रमयित्वा तद्बहिरपिसार्द्धषट्नयमानेनवृत्तमेकंभ्रामये
दिति वृत्तपंचकंकृत्वा द्वितीयवृत्तपंचमवृत्तयोरंतरालमानक
र्कटेन केसरवृत्तायाम्रर्वेवास्रवृत्तस्यष्टमगचयात् कारषोड
शाग्रोर्द्धचंद्राकंनिधाय सूत्रसाध्यान्यष्टदलानिकृत्वा तन्मध्य
कर्णिकावृत्तंविहाय केशरानिकर्णिकापरितः प्रकाशयत्।
केशरवृत्तंचसम्यक्खनित्वाचतुर्थे पंचमवृत्तयोर्दलानि सा
ध्यानियथाभवति चतुरस्रकुंडस्यविस्तारायामखातस्य समा
नक्षेत्रस्य फलवत् क्षेत्रफलंयथाभवति तथायुक्त्याखननंवि
धाय बहिःयस्याकारणेवकंटमेखलादिकंकुर्यादिति ७ अष्टा
धाय वहिःयत्नाकारणेवकंटमेखलादिकंकुर्यादिति ७ अष्टा
स्रकुंडरचनाप्रकारः तत्रप्राग्वच्चतुरंविधाय तन्मध्यसूत्रमानेच
तुर्विंशति द्वाविभज्यतेष्टकैकोशमानं तद्बहिःप्रतिदिशंप्रसारि
तसूत्राग्रपूर्ववच्चतुरस्रंप्रोक्तक्रमेणविधायतत्कोणसूत्रसार्द्ध
मानेन वालस्तवतुरस्रेकोणचतुष्टयव्यात्यसावष्टंभाद्भुभयतः
प्रतिरेखंचिह्नद्वयक्रमात् संभूयाष्टचिह्नानिकृत्वा ततचिह्न
चिह्नंप्राग्वत्सूत्रचतुष्कमास्फाल्यतद्बहिर्गतकोणंवामातेस्यान्या
नाष्टस्रं कुंडंभवति इत्यमचिह्नंचिह्नंप्रामसूत्रेचं घ्रालकुंडते
त्रे परिकल्प्यखातकंटकेमेखलादिकं यथावत् कुर्यादिति इतिदी

क्षायामष्टौकुंडानिकार्याणि अथ प्रसंगसंगत्या कामाहो
मार्थंच पंचास्रसप्तास्रकुंडयोरपि लक्षणमुच्यते तत्रादौ
पंचास्रकुंडनिर्माणप्रकारः तत्र प्राग्वत् चतुरस्रं तन्मध्यंकृ
त्वा सप्तमांशेन ब्रह्मसूत्रस्य प्रागग्रं वहिर्विकारयतन्मानेनत
च्चतुरस्रमध्यस्थहंसपदावलंबलेन भ्रमाद्वृत्तं निष्पाद्य तच्च
तुरस्रमध्यमूलं चतुर्द्धा कृत्वा नेष्टं शत्रयेण तत्सूत्रे ब्रह्मसूत्रप्रा
गग्रादि परतः पंचचिह्नानि विधाय तत्र चिह्नाच्चिह्नं ज्यारूपा
णि पंचसूत्राण्यास्फाल्य ततश्चायवृत्तखंडमार्जनात्पंचास्रकुंडं
भवति इत्थं पंचास्रकुंडं क्षेत्रं परिकल्प तद्बहिरपि प्रोक्तयुक्त्या
कुंडमेखलार्थं पंचास्रद्वयं परिकल्प्य स्थानादिकं परिकल्प्य प्रा
ग्वत्कल्पयेदिति ९ ॥ अथ सप्तास्रकुंडनिर्माणप्रकारः ॥ त
त्र प्राग्वत्सप्त चतुरस्रं कृत्वा तन्मध्यमानं दशधा विभज्यतेषांको
शमानेन ततब्रह्मसूत्रं वहिर्विकाश्य तन्मानेन तच्चतुरस्र
मध्यस्थहंसपदमध्यमवष्टभ्य वृत्तं कृत्वा तच्चतुरस्रमध्य
(स्थहंसपदमध्य) मूलमाने चतुषष्टिधा विभज्य त्रियस्त्रिं
शमानेन ब्रह्मसूत्रप्रागग्रादारभ्य वृत्ते सप्तचिह्नानि कृत्वा चि
ह्नाच्चिह्नं ज्यारूपेण सप्तसूत्राण्यास्फाल्य ततश्चाय रूपवृत्त
खंडमार्जनादेतत्सप्तास्रं वायुदिग्गतं चापि राशिस्थान प्रो
क्तं वैरिनाशकरं कुंडं भवेदिति इति दशविधकुंडनिर्मा
णप्रकारः १० ॥ अथ दीक्षायामष्टौकुंडानिकार्याणि ॥
अथ कुंडकरणाशक्तौ प्रागादि चतुर्दिक्षु चतुरस्रार्द्धचंद्रवृ
त्तपद्माख्यानि च कुंडानि कुर्यात् तत्राप्यशक्तावेदिशान

योमध्ये चतुरस्रमेवा चायकुंडमेवकुर्यादिति अथैतेषां कुं
डानां काम्यहोमेषु कुंडभेदेदः तत्रनकुलषकारः तथैव
चतुरस्रलंभेनेस्यात्सिद्धिकारं चततत् भोगाःपुत्रा योनि
कुंडेअर्द्धचंद्रंशुभावहं मारणेकेचिदिच्छंति त्रिकोणंहि
षकारकं रिपुघातकरंकेचित्वृत्तंशांतिकरंजगु षट्
कोणमुच्चाटमतिच्छंदेषुचविशिष्यते वृष्टिदंपुष्टिदंचा
पिपद्मकुंभेडेविदुर्बुधाः अष्टकोणंतमुक्तोस्यादरोगो
यातिकेनेचं पंचकोणंचाभिचारसमनेभूतकृंतने स
म्यग्मेवंविज्ञाय काम्यकर्माणिसाधयेदिति अथवर्णभे
देन कुंडभेदः कुलमूलावतारे वर्णानामादितः कुंडा
न्युक्तानिक्रमतःशिवे चतुरस्रंवृत्तमर्द्धचंद्रंत्र्यस्रमितिक्र
मात् सर्वेषां चतुरस्रंवादीत्तातमंशिवे अथकुंडस्वरू
पं महादशानां चप्रथमंतंत्रे परंशरीरं प्रकृतेकुंडरूपं पुरः
याम्यसौम्येकरौकुंडमुदरं पश्चिमेतथा योनिस्वरूणं प्रोक्तो
सर्वतंत्रेषुशांभवीति अथहोमसंख्याभेदेनकुंडमानभेदः
तत्रलक्ष्यसागरे पंचाशत्प्रतिहोमे कुंडरत्निमितंभवेत् अरत्नि
मात्रंतुसहस्रमितिहोमके चतुर्विंशत्यंगुल्याढ्यंद्विहस्तम
युतेमतं चतुर्हस्तमितंलक्षेषट्करंदशलक्षके कोटिहोमे
चाष्टहस्तंकुंडंकुर्यान्महेश्वरी प्रकारंचतत्रैव एकलक्षंस

मारभ्य यावत्स्याद्दशलक्षकं (कोटिहोमे चाष्टहस्तं कुंडं कु
र्यान्महेश्वरी) तथैव हस्तमारभ्य दशहस्तं विवर्द्धयेत् को
ट्यां दशकरं कुंडं प्रशस्तं परमेश्वरीति एतत्पत्रपुष्पके वल
घृतहोमेपि विज्ञेयं तत्रविस्तारस्याप्रियाजनाभावादिति
अथैतेषां द्विहस्तादिकुंडविशेषाणां मानांगुलक्षेत्रफला
नि चलक्षणसंग्रहे फलांगुलानि यावंति हस्तक्षेत्रे भवंति
हि द्विहस्तस्य तु डस्थं तो द्विगुणमिष्यते हस्तक्षेत्रांगुलान्य
त्रेषट् सप्तत्या सहैव च शतानि पंचाविंशं तेतन्मूलम
ध्यसूत्रकम् चतुर्विंशत्यंगुलानि विद्यादिकरे पुनः अं
गुलानि द्विर्तं पंचाशदेकादशतानि च तद्विजं मध्यतोल
क्षा चतुष्कं चार्द्धसंयुतं चतस्रश्च तथा यूका यवा सप्त तथै
व च अंगुलानि वयस्त्रिंशन्मानं सूत्रं तु मध्यमे सप्तदश
तान्यष्टाविंशतित्यंगुलानि च क्षेत्रस्य तु त्रिहस्तस्य मानमे
वमुदीरितं तन्मूलमंगुलान्येक चत्वारिंशाश्च तुर्यो वाः यू
का चतुष्टयं किंचिन्यूनं लिख्या चतुष्टयं चतुरंगुलयुक्ता
नि त्रयोविंशच्छतानि च चतुर्हस्तस्य कुंडस्य मानमेवमु
दीरितं मूलं स्यांगुलान्यष्ट चतुरिंशान्मितं भवेत् ब्रह्मसू
त्रं ततः पंचहस्तक्षेत्रांगुलानि तु द्विसहस्रं शतान्यष्टा व
शती वीजमुच्यते अरत्नानि त्रि पंचाशाविलक्षो नाश्च वाङ्

मनाः मध्यसूत्रे विदं मानं कटूकरे क्षेत्रे मुच्यते षट्पंचा
शदंगुलानि चतुस्त्रिंशद्युतानि च तन्मूलमष्टमं पंचदंगु
लानि च षट्युवा किंचिद्भागाधिकं यूकाद्वयं सप्तकरस्य
च वेदसंख्यासहस्राणि द्वात्रिंशत्संहितानि च मूलं च
तुर्यवेदः शार्कत्रिषष्टिरंगुलानि च ब्रह्मसूत्रं ततस्त्वाष्टह
स्तक्षेत्रांगुलानि च वेदसंख्यासहस्राणि साष्टातिषट्श
तानि च त्र्यंगुलानि तथा सप्तषष्टिः सप्तयुवा पुनः किं
चिद्वनं मूलमस्य नवहस्ते तु दृश्यते शतानि चैकपंचा
शच्चतुर्भिरधिकानि च अशीतिरंगुलान्यक्षेत्रमानमिदं भ
वेत् द्वासप्ततीरंगुलानि क्षेत्रस्य दशहस्तमितस्य च सह
स्राणि चसंख्यानि मुनिसंख्या शतानि च षष्टिश्च कथिता
न्यस्य तन्मूलं ब्रह्मसूत्रकम् वर्द्धयेत्पंचसप्तत्याधिकैः स
प्तयवैस्तथा अल्पाधिकाभ्यां लक्षाभ्यां साकमेकं प्रकल्प
येत् अतियत्नं समास्थाय कुंडानि रचयेत्सुधीः द्विहस्ता
दिमितानां चातिमाने दुर्घटं शिवे इति अतियत्नमतित्रि
सरेखावादिहस्त पर्यंतानभेदान्स्वस्थान्विधाय कुंडविला
रायासामानतिस्तथा तार्थं तं यथोक्तमानकं टमेल्लादि
कं चकुर्यादित्यर्थः दुर्घटं अतिप्रयत्नसाध्यत्वात् त्र
सरेखावादिमानभेदास्तु लक्षणसंग्रहे जालांतरगते भा

नीयत्सूक्ष्मं दृश्यते नरः प्रथमं तत्प्रमाणानां त्रसरेणुः प्रच
क्षते त्रसरेणुस्तु विज्ञेयोष्टाभिः परमाणुभिः परमाणोष्टय
ष्टगुणो रथरेणुस्तु संस्मृतः रथरेणुवसुष्टिष्ठो वालाग्रं तस्म
तं बुधैः वालाग्रेष्टष्ठ विख्यातं यूकावेकथितो बुधैः अष्टौ
एका यवं प्राहुरंगुलं तु यवाष्टकं रत्निस्त्वंगुलवर्याणि वित्ते
कस्त्वेकविंशति करएवं कलांशेन नो रत्निरुदाहृतः च
त्वारिविंशतिश्चैव हस्तसंदंगुलानि तु इति तथाच विंश
तिश्चतुरधिकाभिरंगुलाभिः सूत्रेणाप्यथ परिसूत्र भूमि
भागं ताभिश्च प्रखतनु तावतीभिरंशमिति प्रपंचसारवचना
त् यवद्वैकुंडविस्तारः खननं तावदेव हि इति शारदावच
नात् कुंडविस्तारखनिम्नमिति वायुवीजसंहितावचनात्
चतुरस्रं चतुष्कोणं सूत्रैः कृत्वा यथा पुरा हस्तमानेन तन्मध्ये
तावन्निम्नाय तं खनेदिति दिव्यसारस्वतप्रयोगसारवचनात्
चतुर्विंशांगुलायामं तावत्खातसमन्वितमिति गणेश्वरप
रामर्शनीयवचनात् विंशतिवचनात् संख्याभिरंगुलीभिः
स्वविस्तृतं खातं चरचयेत्कुंडमिति दक्षिणामूर्त्तिसंहिताव
चनात् कुंडविस्तारायामसमाननिम्नं खातं कर्त्तव्यमिति
सिद्धांतः अत्र केचित् हस्तमात्रं खनेत्तिर्यगूर्द्ध्वं मेखलया स
हेदिति होमसारवचनात् पंचत्रिमेखलोच्छ्रायां ज्ञात्वा शेष

मथः खनेदिति प्रतिष्ठा सार संग्रहे वचनात् व्यासात्खातः
करः प्रोक्तो निम्नं तथ्यं गुने नान्यिति विश्वकर्मा वचनात् कुं
डाजनो गुलै स्तीर्य ऊर्ध्वे मेखलया सहेति प्रथ मतंत्र वचना
त् खातकुंड प्रमाणं हृद्दे मेखलया सहैति सिद्धांतशेखर
वचनात् मेखलयासहहस्तमात्रं खातं वदंति एतदन्यं मेख
लया तदनुगमनेन खातस्याप्यनुगमन प्रसंगात् खातं
कुंडायते तल्य मंगत्वं गस्य कीर्तितं सन्निपत्योपकारेण
मेखला दे विशिष्यते इति योनीहृदय वचनात् सन्निप
त्योपकारे कस्य खातस्या ङगाप कांग मेखलाय सह ।
निवहितो चिंत्यात् विप्रविद्ध सम वायो भूपस्यां स्यात म
दर्मामितिन्यायात् उक्तपक्षस्यै वयुक्तत्वात् तस्मान्मे
खलायासह खात वचनान्तस्यर लादि कुंडेषु पंचाशदा
दिहोमविधाख्याताधिक प्रयोजनाभावात् द्विषयतीति
मेतव्यानि अथात मेखला पंच वा कार्याः षट् पंचाद्यैरिति
यत्नकोरिति लक्षणसंग्रह वचनात् षट् वाणाधि वह्नि
नेत्रामितास्तुः पंचमेखलाइतिसिद्धांतशेखर वचनाच्च पं
चमेखलाः कार्याः ॥ अथ कुंडा नाम यथा कारणे दोषाः
तत्र विश्वकर्माख्याताधिके भवेद्रोगी हीने धेनुधनक्षयः
वक्र कुंडे तु संतापो मरणं छिन्नमेखले मेखलारहितेणे

मे·पा·
८.
70

कोऽप्यधिकोवतसंशयः (भार्याविनाशकं कुंडं कर्कर मेखलं स्मृतं) भार्याविनाशकं कुंडं प्रोक्तं योज्याविनाकृतं अपत्यध्वंसनं प्रोक्तं कुंडं यत्कुंडवाजितमिति न्यूनाधिकप्रमाणं यत् कुंडं कर्कर मेखलं शृंगाररहितं यच्च यजमानविनाशकृदिति यथा वशिष्ठः अनेकदोषदं कुंडमत्रन्यूनाधिकं यदि तस्मात्सम्यक्प्रकर्तव्यं शुभमिच्छतेति तथाजयइथयामले सूत्राधिके सद्वेषोमानहीने दरिद्रता वाग्रोदकं ठहीनस्यात्सिद्धेन्यूनधातके अधिके चानुरेभोगोमानेनाधिकं यदि तस्मात्सम्यक्प्रकर्तव्यं कर्त्तव्यं शुभमिच्छतेति तथाजय इथयामले सूत्राधिके सद्वेषोमानहीने दरिद्रता वाग्रोधकं ठहीनस्यात्सिद्धेन्यूनधातके अधिके चानुरेभोगोमानेनाधिकमेखले व्याधयः संप्रवर्त्तंते वियोनौ स्याद्यस्मृतिः उच्चाटस्फुरिलेछिद्र संकुवाच्यता भवेदिति इत्यंनिंदा श्रवणा यथोक्तलक्षणसंपन्नानि सर्वाणि कुंडानि कार्याणीति अथ कंठः तत्र वशिष्ठः कंठोष्ठ यवमात्रस्यात्कुंडेतत्करमात्रके इतिकालोत्तरे खाताद्वाह्यंगुलः कंठः सर्वकुंडेष्वयंविधिः चतुर्विंशति मंभाग मंगलं परिकल्पयेदिति अथयोनिः तत्रसायंभुवे मेखलामध्यतो योनिः कुंडाद्वात्रिंशविस्तृता सिद्धांतशेखरेपि दीर्घार्क

पर्वभियोनियोनिविस्तारेण षडंगुलाउन्नतिनिर्म्येत्कुले
न्यासादिति योनिः सर्वत्रहेतुरग्रेप्रागुक्तविधिनास्थाप
येपि तत्र चतुरस्रे अर्द्धचंद्रकुंडे च योनिदक्षिणभागस्था
मेखलोपरिस्थाप्या तयोहोत्रोत्तराभिमुखत्वात् अन्येषु
कुंडेषुपश्चिममेखलोपरियोनिस्थाप्या तेषु होतृणां पूर्वा
भिमुखत्वात् होतुरग्रेयोनिरास्यात् पर्यस्थत्यपत्रतदि
तिवचनात् आसांमेखलानां ॥ इतिश्रीभैरवार्चापारिजा
ते दशमस्तवकः १० ॥ ॥ अथवास्तुपूजातत्रप्रोक्त
लक्षणमंडपे नैरृत्यकोणे हस्तमात्रविस्तारायामावितस्त्यु
न्नतां समचतुरस्रां वेदिकामितिसूत्रां कृत्वा तत्रवायव्य
कोणादाग्नेयकोणगतं नैरृत्यकोणादीशानकोणगतं
चेति कर्णसूत्रद्वयमास्फाल्य वास्तुचक्रं निर्माय त
न्मध्यगतकोष्ठचतुष्टयमेकीकृत्य तद्बहिः प्रागादिच
तुर्दिक्षु प्रतिदिनं चत्वारिकोष्ठानि मध्यकोष्ठसंलग्नान्ये
कीकृत्य सर्वमध्ये ॐ ब्रह्मणेनमः पूर्वादिचतुर्दिक्षु ॐ
अर्यमायनमः ॐ विवस्वतेनमः मित्राय० इतिप्रादक्षि
ण्येन संपूज्य आग्नेयादिकोणचतुष्कगताद्वैकोष्ठात्मके
षु प्रादक्षिण्येनैशानकोणपर्यंतां ॐ सावित्र्यायनमः एवं

मै·पा·
७१

सवित्रे शक्रायनमः शक्रजितेरुद्रायनमः रुद्रजितेग्र
क्षीग्रायवत्सायनमः इतिसंपूज्य ततबहिस्थवीथ्यामा
ग्नेयादि कोणचतुष्कगतः कर्णसूत्रभिन्नकोष्ठ चतुष्टय
पार्श्वगतकोष्ठानि यादिईशानपर्यंते ॐसर्वायनमः एवं
गृहाय अर्यमोजंभकाय पिलपिच्छकाय चरकौविदार्यै
पूतनायै इतिसंपूज्य ततस्तद्बहिर्गत वीथीचतुष्टये शा
चीदिगोतवीथ्यां ईशानाद्याग्नेयपर्यंते ॐईशानायनमः
ॐपर्यन्यायनमः ॐजयंताय· शक्राय· भास्कराय· स
त्याय· वृषाय· अंतरिक्षाय· इत्यष्टौदेवताः संपूज्य द
क्षिणवीथ्यां आग्नेयादि नैरृते ॐअग्नयेनमः एवंपूष्णे
वितथाय० वृषाय· गृहरक्षकाय· गंधर्वाय· भृंगराजा
य· मृगायनमः इतिसंपूज्य ततपश्चिमवीथ्यां नैरृ
त्यां द्यायव्यांते ॐनिरृतयेनमः एवंद्वौवारिकाय सूर्या
वायुः वरुणाय पुष्पदंताय असुराय शेषाय नमश्चत
संपूज्य उत्तरवीथ्यां वायव्याधिशांते ॐवायवेनमः ए
वंनागाय तक्षाय सोमाय भल्लाय अर्गलाय आदित्यै
इतिगंधपुष्पाद्यैर्वास्तुदेवतासंपूज्य तथाचचतुषष्टिको
ष्ठानि वक्ष्यमाणपंचवर्णरजोभिः रापूर्य ॐब्रह्मणेएष
वलिनमः इत्यादिपूजितदेवताभ्यरत्ननाम्नातिलडुग्ध

कदलीफलापूजनानाव्यंजनान्वितैः पायसैः तत्पदेतस्मै

वलिंनिवेदयेदिति इतिवास्तुपूजाविधिः अथवास्तुपूजा

फलं तदकरणेहानिश्च तंत्रराजे एवंसिंहगतेभानौपूर्णि

यांप्रतिवत्सरं स्वग्रहेवास्तुपूजायोमंडलेतुसमाचरेत् न

वालमरणंव्याधिभूतप्रेतादिकानिच नसर्पपीड्यनान्यो

न्यकलहादिसुभानिच पुत्रपौत्रधनारोग्यपशुदासीसम

द्धिभाक् आरोग्यविजयीस्यानचिरंजीवोसुखीग्रहे राज्ञवे

श्मसुसर्वत्रतथाचमहिषीग्रहे सायावमात्यलेनानिभव

नेतपुरीथवा विदध्यात्प्रतिवर्षंतप्रोक्तासिद्धिस्तुदेशिकाः

नचेयुक्तन्यूनफलैः क्लेशोनिशंभवेदिति अथांकुरार्पण

विधिः॥ तत्रदीक्षादिनात्पूर्वमेव नवभिः सप्तभिर्वैदिनैः

प्राङ् निर्मितमंडपस्योत्तरभागे सुसंवृतं ग्रहंनिर्मीयतत्र

गोमयोपलिप्तेसुसमेभूतलेप्राक्प्रत्यगायतास्तिस्रोरेखाया

म्योदीच्याःपताश्च सप्तरेखाकृत्वा द्वादशपदोपेतं मंडलंनि

र्मीयचतुः चतुःकोष्ठैःरेकमेकं विष्णुरुद्राणां पश्चिममध्य

पूर्वक्रमेण परिकल्प्य तत्रपश्चिमादि चतुष्कत्रयेपिप्रतिच

तुष्कमाग्नेयकोष्ठमारभ्य ईशानकोष्ठपर्यंतं पीतरक्तश्वे

तश्यामवर्णैः रजोभिचतुष्कमेकैकेनरजसैकंकोष्ठमिति।

तत्रस्नानचतुष्कं विष्णुदेवता

क्रमेण द्वादशकोष्ठान्यापूर्य

भै॰पा॰ चतुर्विंशत्यंगुलोन्नतविस्तृतियुक्ताः डमरुकाकाराश्च
७२ तस्याः पालिकामध्ये पिप्पलदलाम्रपल्लवैः सहसूत्रे
ण संवेष्ट्य संस्थाप्य तथा मध्यचतुष्कये कस्मिन्पात्रपंच
पात्राणि यथा भवति तथा शिल्पिवरानिर्मितानि प्रागवत्
डमरुककाराणि षोडशांगुलोन्नतिविस्तृति युक्तानि ब्र
ह्मदेवत्यानि चत्वारि पात्राणि तथैव पिप्पलदलादियुक्ता
नि चत्वारः सएवसंस्थाप्य इति द्वादश पात्राणि प्रक्षालि
तानि द्वादशकोष्ठेषु प्रतिकोष्ठमेकमेकंपात्रं शालिपुंजे
षु गंधाक्षतकूर्चयुक्तं संस्थाप्य तानिपात्राणि वालुकाः
मत्करीषकैः संपूर्य्य एकस्मिन्नूतनभांडे स्वर्णादिरचिते
म्रण्मये वाप्रियंगुश्यामाकतिलसर्षपशालिमुद्गाढकी
निष्पकत्रमाषाख्यानिष्पदशधान्येकीकृत्य वमित्यमृत
वीजेन गोदुग्धैः प्रक्षाल्य शंखस्वनादिपंचवाद्यघोषपुरस्स
रं तेषु पात्रेषु प्रथमं ब्रह्मदेवत्येषु ततो विष्णुदैवतेषु ततः
शिवदेवत्येषिति क्रमेण वीजानि निवीप्य हरिद्रामिश्रित
जलैः संसिच्य नूतनवस्त्रैराच्छाद्य संध्ययोरहोरात्रे च सप्तस्व
पिदिनेषु प्रतिदिनं वलिं दद्यात् तत्र प्रथमदिवसे तिलजैः ला
जासक्तुशाल्योदनानि हरिद्राचूर्णसंयुक्तान्येकीकृत्य कव
लत्रयं निष्पाद्य पात्रत्रये कृत्वा त्रिविधस्यापि पात्रसमीपे त्रि

कोणमंडलत्रयेसाधितं तद्बहि पात्रंनिधाय प्रथमंब्रह्म
देवतस्य पात्रस्यसमीपेसर्वभूतानिदिभिसंपूज्य ॐस
र्वभूतबलिद्रव्यायनमः इतिवलिद्रव्यंचसंपूज्य हस्तेज
लंगृहीत्वा वामहस्तेनबलिपात्रंस्मरन् ॐसर्वभूतेभ्यएष
वलिर्नमइति वलिपात्रोपरि जलमुत्सृजेत् प्रोक्तकालत्र
येपिवलिदानविधि ततोद्वितीयदिनेपितृभ्यस्तिलतंडु
लैः प्रागुक्तपरिपाट्यैवप्रोक्तकालत्रयेपिवलिंदद्यात् चतु
र्थेहनिनागेभ्योनारिकेलजलाप्लुतशक्तापिष्टवलिः पंच
मदिनेब्रह्मणेपञ्चामृतवलिः षष्ठिदिनेशिवायपयसंयु
क्तोदनवलिः सप्तमदिनेविश्वेगुडोदनबलिः नवरा
त्रिपक्षेतुविश्वेएवाष्टमदिनेदध्योदनबलिः नवमंदिने
कृशरान्नवलिर्देयः अत्रसर्वत्रबलिदाने प्रथमदिनेप्रो
क्तमेवविधिर्ज्ञेयः तत्रत्यापूजनंवल्युत्सर्जनं चोन्येयमि
ति अत्रनवस्वपिदिनेषुप्रतिदिनंतत्तद्देवताबलिदानानंत
रं दशदिक्पालेभ्योपितत्तदेवताबलिदानानंतरं दशदि
क्पालेभ्योतत्तद्दिक्षुबलिदेयः ॐइंद्रायएषवलिर्नमः इ
त्यादि तत्रत्राम्राशर्करासहितपायसेनबलिर्देयः इति
वीजारोपणविधिः ॥ अथदीक्षाकालः ॥ तत्रादौमासाः त
त्रभैरवतंत्रे चैत्रेदुःखायदीक्षास्याद्वैशाखेसर्वसिद्धिदा ज्ये

षेमृत्युप्रदास्यादाषाढे वंधुनाशिनी श्रावणे बंधुदात्वणे
नभसेदुःखदामता आश्विनेसर्वसिद्धिस्यात्कार्तिकेज्ञान
वृद्धिदा शुभदामार्गशीर्षे च पौषे मेधाविनाशिनी माघे
सुवर्णलाभस्यात्फाल्गुने सर्वसिद्धिदा तथासारसंग्रहे।
मधुमासेभवेद्दुःखंमाधवेरत्नसंचयः मरणंभवतिज्येष्ठे
चआषाढे वंधुनाशनं समृद्धिःश्रावणेनूनंभवेद्भाद्रपदे
क्षयः प्रजानामाश्विने मासे सर्वतःशुभमेवहि ज्ञानंस्या
त्कार्त्तिके सौख्यं मार्गशीर्षे भवत्यपि पौषेज्ञानक्षयंमा
घेभवेन्मेधाविवर्द्धनम् फाल्गुणेपि समृद्धिस्यामलमासं
परित्यजेदिति अथ नक्षत्राणि चिंतामणौ अश्विनीरोहि
णीवाह्मी तथापुष्योत्तरात्रयं हस्तचित्रास्वातिमैत्रविशा
खाचधनिष्ठया पुनर्वसुरेवती चदीक्षायामङ्गमामता त
थाकामधेनौ रोहिणीमृगशीर्षे च तथापुष्यश्च हस्तकः
स्वात्यनुराधारेवतीचतथा चाप्युत्रयंतरा शुभान्येतानि
दीक्षायां नक्षत्राणि वरानने इति अथ निषिद्धानि पिंग
लमते कृत्तिकायांमनस्तापो भरण्यां चमहायशः पू
र्वायां दंडयेद्राजा मघायां मृत्युमादिशेत् मूलेतु कलहं
विद्याज्ज्येष्ठे भवति हानिदा पूर्वाषाढे भयंप्रोक्तं श्रवणे
नेकरोगदा शतभिषायां क्षोभदास्यात्संतापं भाद्रपत

याপি अथतिथयः तथासारसंग्रहे पूर्णिमापंचमेचैवद्वि
तीयासप्तमीतथा त्रयोदशीचदशमीप्रशस्तासर्वकामदा तथा
श्रीकंठसंहितायां द्वितीयासप्तमीश्रेष्ठाषष्ठीसर्वत्रनिंदिता द्वाद
श्यामपिकर्तव्यंत्रयोदशामथापिवा विजयामालिनीतंत्रे पंचम्ये
कादशीशुक्लासप्तमीचत्रयोदशी दशमीशुक्लपक्षस्यद्वादशीच
विशेषतः रत्नसागरे तृतीयाविहितानित्यषष्ठिःसर्वत्रनिंदिता।
सप्तम्यांचतुलाभस्यादष्टम्यांगुरुनाशनं नवम्यांरिक्तानाश
नित्यंषष्ठिःस्याद्दशमीशुभदायिनी एकादश्यांमलामोचन।
स्ववृषभस्यच द्वादश्यांधनलाभस्यात्त्रयोदश्यांसदोदयः शिष्य
हानिश्चतुर्दश्यांपूर्णिमासीतिसिद्धिदा अमायांपुत्रनाशस्यात्प्रति
पत्वुद्धिनाशिनी अथदेवताविशेषेतिथिविशेषः ब्राह्मणः
पौर्णिमास्युक्ताद्वादशीचक्रधारिणः चतुर्दशीशिवस्योक्तावा
चः प्रोक्तात्रयोदशी द्वितीयातत्प्रियः प्रोक्तापार्वत्याश्चतृतीयका
चतुर्थीगणनाथस्यभानोःप्रोक्तातुसप्तमी अथवासराणि त
त्रमंत्रसद्भावे मंत्रारंभेरवौशुक्रेबुधेजीवेविशेषतः शनौमृत्यु
क्षयंभौमेसोमेसर्वंचनिष्फलं सारसंग्रहे रवौगुरौबुधेशुक्रे
कर्त्तव्यंपरमेश्वरी इतिज्ञात्वावरारोहेमंत्रंदद्याद्विचक्षणः।
विजयमालिनीतंत्रे रवौवृद्धिमवाप्नोतिशुक्रेचैवधनागमः
शन्यंगारकयोर्मृत्युर्बुधेभियोगरहितोगुरौपुत्रान्वितोभवेत्
इतिज्ञात्वावरारोहेदीक्षादद्याद्विशारदः
सुरविद्यासोमकेभवेत्

लधीति अथयोगः तत्ररत्नावल्यांयोगाश्च योगाश्चप्रीति
रायुष्मान्सौभाग्यशोभनः शुभः सुकर्मा चधृतिर्वृद्धिः तथासाध्य
श्चहर्षणः चतस्त्रापिशिवः सिद्धब्रह्मैन्द्रश्चैवषोडशी अथाप
योगः तत्रैवपूर्वाषाढांप्रातपदापंचमीकृत्तिकातथा पूर्वा
भाद्रपदाषष्ठीदशमीरोहिणीतथा द्वादशीसर्पनक्षत्रमर्यमाच
त्रयोदशी नक्षत्रलंपायतेदेवानामपितासदार्यत सर्पनक्षत्रम
श्लेषा अर्यमाउत्तराफाल्गुनी तथाज्योतिःशास्त्रे नीचस्थेवक्र
संस्थेप्यतिचरणगतेबालवृद्धास्तगेवा संन्यासोयत्तयात्राव्रत
नियमविधिःकर्णवेधस्यदीक्षा मौंजीबंधोगनानांपरिणयनवि
धिर्वास्तुदेवस्यप्रतिष्ठा वर्ज्याःसद्भिःप्रयत्नात्रिदयतिगुरौसिंह
गेनैवकुर्यात् अथकरणानि तत्ररत्नावल्यां शुभानिकरण
न्याहदीक्षायांचविशेषतः शकुन्यादीनिविष्टिंचविशेषेणविवर्जि
येत् इतिअत्रादिपदेन किंतुघ्नचतुष्पदनागानांग्रहणं अथल
ग्नानि तत्रसारसंग्रहे मंत्राद्यारंभनंमेषेधनधान्यप्रदंभवेत् वृ
षेमरणमाप्नोतिमिथुनेपत्यनाशनं कर्कटेसर्वसिद्धिस्यात्सिं
हेमेधाविनाशनं कन्यालक्ष्मीप्रदानित्यंतुलायांसर्वसिद्धयः
वृश्चिकेस्वर्णलाभस्याद्धनुज्ञानविनाशनम् मकरःपुत्रदःप्रो
क्तःकुंभोधनसमृद्धिदः मीनेदुःखप्रदोनित्यमेवराशिफलं
प्रिये तथारुद्रयामले मीनेसिंहेतथाचापेवृषेहानिप्रजा
यते मेषेसर्वसमृद्धिस्यात्कन्यारत्नप्रदाभवेत् तुलायांध

नधान्यं स्याद्वृश्चिके सर्वसिद्धयः मकरे पुत्रलाभः स्यात्कुंभे
पशुसमृद्धयः मिथुने शुभनाशः स्यात्कर्कटे राज्यदो मतः ए
वं लग्नफलं ज्ञात्वा मंत्रं दद्याद्विशालधीः वृषं मीनं तथा चापं सिं
हलग्नविवर्जितं सुखदं शुभदं नित्यं कन्याढ्यं सर्वसिद्धिदमिति
अथ चंद्रफलं जन्मत्रिषट्सप्तैकादशपंक्तिगः शशि शुभफल
प्रदो मतः नेत्रद्वादशवसुपंच वेदग्रहराशिगः शशिदुष्टस्ततः
अथ दीक्षाकालः तत्र शैवागमे अथोगमे शुभे च चंद्रशुद्धौ वि
शेषतः कृत्वा ताराबलं कुर्यात्स्वनामादि विचिंतनं धर्मदः प्रा
तः कालः स्यात्सर्वं राज्यवदस्ततः मध्याह्ने सर्वसिद्धिः स्यात्साया
ह्ने मध्यमो भवेत् रजनी मंत्रदाने तु निषिद्धा देशिकोत्तमैः दि
वा सर्वं प्रकुर्वीत सिद्धि परमं स्मृतमिति अधोमुखनक्षत्राणि
तु मूलाग्नेयं मघाहिदैव भरणी सार्प्याणि पूर्वात्रयं ज्योतिर्विद्भि
रधोमुखे हि नवकं भानामिदं कीर्तितं वापीकूपतडागगर्तेप
रिखातो निधेहध्यते ज्ञेयो द्यूतविलप्रवेशगणितारंभप्रसिद्धं
ति च द्विदैवं विशाखा अथ दीक्षायां कालविशेषः तत्र ज्ञानार्ण
वे मंत्राद्यारंभनं कुर्याद्ग्रहणे चंद्रसूर्ययोः ग्रहणे देवदेवेश
कालः सप्तदिनावधीति कुलमूलावतारे सतीर्थे कविद्वर्यो
सेतं तु दामनपर्वणि मंत्रदीक्षां प्रकुर्वाणो मासर्क्षादीन शोध
येदिति अत्र यद्यपि सूर्यसोमग्रहणयोः दीक्षायां समान का
लरुक्तः तथापि ग्रहणप्रशंसकानि वचनानि सूर्यग्रहणपरा

भै॰पा॰
७५

75

एयेवत्तेयानि सूर्यग्रहणकालेतुनान्यदत्तेशतंभवेत् सूर्यग्र
हणकालेतुसमोनान्यः कदाचन तत्रयद्यत्कृतंसर्वमनंतफ
लदोभवेत् तथानमासतिथिवारादिशोधनंसूर्यपर्वणि दद्या
तिष्ठंचगृह्णीयात् तस्मिन्कालेगुरोर्नरः सिद्धिर्भवतिमंत्रस्यवि
नाभ्यासेनवेगतः इति रत्नचिंतामणिकालिकोद्भवयोसूर्यग्र
हणस्यैवविधायकवचनेदर्शनात् चंद्रग्रहेतुयादत्तायाव
तचरिणांजनकस्यतुयादीक्षासरिद्धंसप्तजन्मनि इतियो
गिनीतंत्रे चंद्रग्रहणेदीक्षानिषेधवचनदर्शनात् प्रागुक्त
रजनीमंत्रदानविशेषवचनेचेति किंतुचंद्रसूर्यग्रहेतीर्थेसि
द्धक्षेत्रेशिवालये मंत्रमात्रस्यकथनमुपदेशसद्भुच्यतइति
कालिकोद्भववचनात्मंत्रांतरेषु विधिवत्दीक्षितानां प्राप्तपू
र्वाभिषेकानां कौतुकार्थमन्यमंत्रग्रहणेचेद्भवति तदानि
जगुरोरेवशकाशाचंद्रग्रहणकालेप्युपदेशरूपतोमंत्रग्रह
नदोषभवं इति ग्रंथेवांविचार्य्यविहितकालेषु दीक्षादि
नापूर्वादवमेशिष्यः प्रातस्नातः कृतानित्यकृत्यः समलंकृ
तः पंचवाद्यद्योषपुरस्सरंब्राह्मणैः कृतस्वस्तिवाचनः
प्रियःसुहृद्भिः सार्द्धस्वगुरुगृहंगत्वा तंविधिवत्प्रणम्य
तदाज्ञयाप्राणायामपुरस्सरं ॐअद्यामुकमासेअमुकप
क्षेअमुकराशिगतेसवित्र्यमुकतिथौ अमुकगोत्रः ब्राह्म
णश्चेदमुकशर्माक्षत्रियश्चेदमुकवर्मावैश्यश्चेदमुकवर्मा

पूर्वस्येदमुकदासोहं चतुर्विधपुरुषार्थसिद्धिकामोऽमुकमंत्र
ग्रहणं करिष्येति कुशहस्तः प्राङ्मुखोदङ्मुखो वा संकल्पं वि
धाय धौतोत्तरीयपट्टादयश्च स्वर्णांगुलीयं कंकणनरण स्व
र्णयज्ञोपवीतहारकेयूरांगदादिनाविधाभरण चामरोपण
युगलाशैय्यतल्पाभरणपाद्याचमनीयार्घ्यमधुपर्कादिपात्रवि
शेषसंपन्नां वरणसामग्रीं गुरुसन्निधौ निधाय अद्येत्यादि
प्रागवत्तिथ्युल्लेखनांते अमुकगोत्रः अमुकशर्मेत्यादि यथास्व
वर्णविहितमुच्चार्य अहं चतुर्विधपुरुषार्थसिद्धिकामोऽमुकमं
त्रग्रहणार्थं अमुकवेदांतर्गतामुकशाखाध्यायिनममुकशर्मा
णं त्वामेभिर्यथाशक्तिविहितवरणसाधने गुरुपादयोः प्रणम्य
वृणमानयोः निवेदयेत् ततो वृतोस्मीति गुरुणा प्रतिवच
ने दत्ते शिष्यः कृतांजलिर्यथोचितं गुरुकर्म कुरुष्वेति ब्रूयात्
ततो गुरुः करवाणीति प्रतिब्रूयात् अत्र मंत्रग्रहणीति वीर्यं
तपितुर्मंत्रं तथा मातामहस्य च सहोदरस्य कनिष्ठस्य वैरिप
क्षाश्रितेचेति ज्ञानो न यत वचनादेते गुरुत्वेऽत्यं गुरु चरणं वि
धाय तदनुज्ञया अष्टौ ब्राह्मणान्वेदवेदांगपारगान्सदाचारान्स्वे
ष्टदेवतोपासकान् प्राग्गुरुचरणोक्तसामग्रीभीस्तथैव ऋत्वि
ग्रत्नेन वृणुयात् चतुःकुंडपक्षे चत्वार एव ऋत्विजः कार्या
नांगीकर्तव्या ततः शिष्यो नैवं वृतो गुरुः कृतनित्यस्नानः पं
चवाद्यघोषपुरस्सरं ब्राह्मणैः सह जनैश्च ततः शिष्येन सह
मंडपद्वारं गत्वा प्रागुक्तविधिना द्वारपूजां विधाय तथोवभू

तोत्साधनं पूर्वकं मंडपांतः प्राविश्य तथैव पंचगव्याद्यैः तो
यप्रोक्षण पूर्वकं प्रागुक्त वीक्षणादि चतुर्भिः संस्कारैः सं
स्कृते दंडपाण्यंतरे चंदनागुरुकर्पूरधूपिते चंदनसर्षपदूर्वा
भस्माक्षतलाजान्नस्त्र मंत्रेण सप्तधाभिमंत्रितान् मंडपांतर
विकीर्यास्त्र मंत्रेण कुशमुष्टिना संमार्ज्य मंडपस्य ईशानको
णे संस्थाप्य ब्राह्मणैः पुण्याहवाचकं कारयित्वा वास्तुपुरुष
पूजादिकं विधाय भैरवाज्ञापुरःसरं प्रागुक्तां तां वेदिकाया
मासिर्य्य संपूज्य स्वपुरतः सुसमे भूतले वेदिकोपरि सर्व
तो भद्रं मंडलं कुर्यात् तत्र प्राग्प्रत्यगायता दक्षिणोत्तराय
ता सप्तदशरेखाः कृत्वा षट्पंचाशदुत्तर शतद्वयकोष्ठयु
तं चतुरस्रं मंडलं कृत्वा तन्मध्यगत षड्विंशत्कोष्ठान्येकी
कृत्य तद्बहिः चतुर्दिक्ष्वेकं पंक्ति परितः संमार्ज्यैकेकृत्य
पीठं परिकल्प्य तद्बहिरपि चतुर्दिमात पंक्तिद्वयमेकीकृत्य
संमार्ज्य वीथीं परिकल्प्य सर्वमध्यगत सरोजस्थाने वहिः
परितो द्वादशांशं भागं परित्यज्य सर्वमध्यावलंबेन संमां
तरालं समाद्य तत्र सर्वमध्य वृत्त कर्णिकायां परिकल्प्य
तद्बहिर्गत वृत्तरालमानेन गुरुयुक्त्या षोडशार्द्धं चंद्रं परिक
ल्प्य ते नाष्टदलानि कृत्वा ततोपहृत्वाद्बहिस्त्यक्तैकांश
तो मध्यचिह्नावलंबेन वृत्तांतरं निष्पाद्य गुरोक्तयुक्त्या
पत्रापत्राग्रहाणि विधायैकैकदलमूले केशरद्वयं यथा
दृश्यते तथा विरच्य पद्मं कृत्वा पद्मवहिर्गतैक पंक्तिं दू

पचतुरस्तु पीठस्य कोणचतुष्टयेपि कोष्ठत्रयेण पीठपादा
परिकल्पावशिष्टकोष्ठैरेकीभूतैः पीठगात्राणि विधाय त
द्बहिर्गतपंक्ति द्वयकोष्ठानि सम्यक् प्रमार्ज्य तद्बहिर्गत
पंक्तिश्चतुर्दिक्षु मध्ये मध्ये द्वयमेकीकृत्य सर्ववासग
तपंक्तेरपि दिशां कोष्ठचतुष्टय मार्जनेन द्वारचतुष्टयं प
रिकल्प्य द्वारचतुष्टयस्यापि पार्श्वयोः पंक्तिद्वयगतको
ष्ठेषु प्रांतः पंक्तेः कोष्ठद्वयमिति कोष्ठत्रयं कोष्ठद्वय
मेकीकृत्योपशोभां विधाय तत्पार्श्वयोरप्यंतः पंक्तेको
ष्ठद्वयं बहिः पंक्तेरेक कोष्ठमिति कोष्ठत्रयं मेकीकृ
त्योपशोभः परिकल्पावशिष्टैः षड्भिः षड्भिः कोष्ठैश्च
त्वारि कोणानि परिकल्पयेदिति सर्वतो भद्रमंडलेनिर्मि
य सरोजकर्णिकाकेसरदलाय पीठ वेथी द्वारशोभो
पशोभाकाणस्याननि पंचवर्णरजोभिः भूषयेत् पंचव
र्णरजांसितु हरिद्राचूर्णपीतंरजः तंडुलचूर्णं सुक्लंकु
सुंभचूर्णं रक्तं दधितंडुलचूर्णं कृष्णं विल्वपत्रचूर्णं श्या
ममिति रजोविन्यासप्रकारस्तु सीमागतः सर्वे रेखाः
सुक्लाः रजसा एकांगुलीत्सेधविस्तारयुक्ता कार्या पी
तरजसा कमलकर्णिकां केशरांश्चापूर्य सुक्ल रजसाद
लानि च संपूर्य श्यामरजसा दलसंधीनापूरयेत् ॥

भै॰पा॰
७५

अथवा कर्णिकां पीतेन केशरान् पीतरक्ताभ्यां दलानि रक्तैः दलसंध्यै कृष्णेन रजसा संपूर्य्य पीतकृष्णेन वा पीठगर्भमापूर्य्य पीठपादान् रक्तेन पीठगात्राणि शुभ्ररजसापूर्य्य वीथी चतुष्टये कल्पवल्ली पत्रमूलकोरकपुष्पपल्लवफलैर्मंडितानां वर्णरजोभिरापूर्य्य शुभ्रेण रजसा द्वारचतुष्कमापूर्य्य रक्तवर्णेन द्वारशोभाः पीतेनोपशोभाः कृष्णेन कोणानि वा पूर्य्य तद्बहिरेखात्रयमेकैकांगुल्यांतरं शुक्लरक्तरजोभिः कुर्य्यादिति सर्वतोभद्रमंडलं विधाय वेदिं परितो दीपान्प्रज्वाल्य प्राग्वत्पूजाद्रव्याण्यासाद्य तथैव तानि संस्कृत्य छत्रचामरद्वयदर्पणव्यंजनादि च यथा यथां निधाय गुर्वादि वदनपूर्वकं करशुद्धि तालप्राणप्रतिष्ठामातृकान्यासयोगपीठन्यासः मूलमंत्रन्यास प्रागुक्तविधिना विधाय मुद्राविरचनध्यानमानसपूजां तद्वैश्वदेव मूलमंत्रेजप तत्समर्पणाद्य देवतास्थापनात्मपूजों नां हवण मूलमंत्रजपतत्समर्पणां विधाय सर्वभद्रमंडलायतमइति गंधादि पंचोपचारैः संपूज्य तत्कर्णिकां शालिभिरापूर्य्य तदुपरि तंडुलान् कुशान् दूर्वाविंशतिभिः कुशैरेकीकृताग्रविरचितब्रह्मग्रंथिकं कूर्च्चं च शालिपुंजोपरि निधायाद्य जलेन संप्रोक्ष्य तत्र प्रा

गुक्तविधिनापूजांविधाय तत्रस्वर्णादिभिर्मितं त्रिगुणीकृ
तसूत्रवेष्टितं सर्वांगचंदनागुरुकर्पूरधूपदीपितकुंभंप्रण
वमुच्चरन्संस्थाप्य तत्रपुष्परागनीलवैडूर्य्यविद्रुमदूर्वान्वितं
प्रागुक्तलक्षणंकूर्चंनिधाय तत्रक्षंलंहंसंषंशंवंलंरंयंमंभं
मंबंफंपंनंधंदंथंतंणंढंडंठंटंञंझंजंछंचंङंघंगंखंकंअः अं
औंओंऐंएंॡंलृंॠंऋंऊंउंईंइंआंअं इतिविलोममातृ
कांतेमूलमंत्रंजपन् आत्मनः कुंभस्य योगपीठस्यचैक
स्य भावयन्प्रागुक्तपंचाशदौषधिक्वाथैः अश्वत्थोदुंबरप्ल
क्षवटत्वाक्काथैः पलाशवृक्षक्वाथैः कर्पूरचंदनकस्तूरी
कुंकुमवासितैस्तीर्थजलैर्वाकुंभमापूर्य्य स्वपुरतः प्रागु
क्तविधिनाशंखंसंस्थाप्य तत्रप्रागुक्तवह्निकलाः सूर्यक
लासोमकलाश्चावाह्यपृथक्संपूज्य तासांप्राणप्रतिष्ठांवि
धाय प्रणवोत्थैकपंचाशत्कलाः प्रागुक्तकलामातृकान्या
सोक्ताः समावाह्य प्रथममकाराद्ब्रह्मणउत्पन्नाककचवर्गो
त्थासृष्ट्यादिदशकलाःसंपूज्य ओंहंसः शुचिषद्वसुरंतरिक्ष
सद्धोतावेदिषदतिथिर्दुरोणसत् नृषद्वरसदृतसद्व्योमसद
ब्जागोजाऋतजाअद्रिजाऋतं बृहदितिमंत्रमुच्चार्य्य ओंब्रह्म
णेनमइति ब्रह्माणंसंपूज्य सृष्ट्यादिदशकलानांप्राणप्र
तिष्ठां विधाय उकाराद्विष्णोरुत्पन्नाटतवर्गोत्थाजराधिद
शकलाःसंपूज्य ओंप्रतद्विष्णुस्तवते वीर्येणमृगोनभीमः

कुचरोगीरिष्ठाः यस्योरुषुत्रिषुविक्रमणेष्वधिक्षयंति
भुवनानिविश्वाः ॐविष्णवेनमः इतिविष्णुंसंपूज्य प्राग्व
ज्रादि दशकलानांप्राणप्रतिष्ठांविधाय मकाराद्रुद्ररु
त्पलामध्यवर्गोत्थाः तीक्ष्णादिदशकलाःसंपूज्य ॐत्र्यंब
कंयजामहे सुगंधिंपुष्टिवर्धनम् उर्वारुकमिवबंधना
न्मृत्योर्मुक्षीयमामृतात् ॐरुद्रायनमः इतिरुद्रंसंपू
ज्य तीक्ष्णादीनांप्राणप्रतिष्ठांविधाय ईश्वराद्बिंदोरुत्प
न्ना अकारादि क्षकारांतपंचाशद्वर्णोत्थाः पीतादिपंचाश
त्कलासंपूज्य ॐतद्विष्णोपरमंपदंसदापश्यंतिसूरयः दि
वीवचक्षुराततं ॐईश्वरायनमः इतिसंपूज्य पीतादीनां
प्राणप्रतिष्ठांविदध्यात् अत्रकेचित्चतुर्थमंत्रं गायत्री
माह ततोदानात्सदाशिवादुत्पन्ना स्वरजपनिवृत्त्यायाः
षोडशकलाःसंपूज्य ॐविष्णुर्योनिकल्पयतुत्वष्टारूपा
निविंशतु आसिंचतुप्रजापतिर्धातागर्भंदधातुते ॐस
दाशिवायनमः इतिसंपूज्य इत्थंचतुर्णांवत्तिदेवताशंखे
संपूज्य तत्रगंधाष्टकमालोड्य सकलकलामयंशंख
जलं कुंभजलेसंयोज्य वक्ष्यमाणविधिनापूजयेत् तत्र
गंधाष्टकंत्रिविधं शैवशाक्तवैष्णवभेदात् तत्रादौशै
वगंधाष्टकं जलकाश्मीरकुष्ठैस्तुरक्तचंदनैः तमाला
गुरुकर्पूरैः शांभवंचाष्टगंधकं श्रीवेरंचंदनंकुष्ठमगु

रुं कुंकुमं गुरुं सेव्यकं च जमांस्यां सेवेत्स्वं तदुदारितं चं
दनागुरुकर्पूरचोरकुंकुमरोचना जटामांसीकपियुताश
क्तेः गंधाष्टकं विदुः २ जलं वालकं काश्मीरं कुंकुमं ह्रीवे
रं वालेकं सेव्यकुसृसीरं १ चौरः प्रसिद्धः कशि हृकं सिलार
सप्रसिद्धः ततोऽश्वत्थपर्णी आम्रपल्लवानि इंदुवाहणील
जयासंवेष्ट्य कल्पवृत्तयासंवेष्ट्य कल्पवृत्ताधिया कल
शोपरिनिधाय तदुपरि कलशजातीयं कलशजातीयतं
डुलपूर्णं २ नारिकेलफलाम्नं कल्पवृत्तफलत्वध्यापा
त्रं संस्थाप्य पटवस्त्रयुग्मेन घटं संवेष्ट्य तत्र प्रागुक्तप्र
कारेण मूलेन मूर्त्तिं परिकल्प्य तत्र देवमावाह्य प्रागुक्त
विधिना षोडशोपचारैः सांगं सावर्णं देवं संपूज्य विद्याद
क्षिणभागे हस्तमात्रायामविवह्निं संस्थाप्य तत्र देवमा
वाह्य नित्यहोमोक्तविधिना हुत्वा पुनर्देवं संपूज्य कुंभ
स्थमूर्त्तौ देवं विसृज्य तथैव वह्निं संपूज्य विसृज्य प्रागु
क्तविधिना सर्वभूतबलिं दत्वाऽन्यदेवतापक्षे तत्तत्कल्पोक्त
विधिना सर्वभूतबलिं दत्वा अन्यदेवतापक्षे तत्तत्कल्पोक्त
विधिना बलिदानं विधाय दवयोत्तरायेशानादिनिराज
नांतं नित्यपूजोक्तविधिना विधाय मूलमंत्रप्राणायामं
ऋष्यादिन्यासपूर्वकं अष्टोत्तरसहस्रं जपित्वा देवाय जपं
समर्प्य पूर्वमंडपस्यैशानकोणे स्थापित विकिरपुंजोप

मे·पा· रिस्ववर्णगर्भवस्त्रयुग्मवेष्टितं जलपूरितं करकं विन्यस्य
७५ तत्रास्त्रदेवतांसिंहारूढां दक्षिणवामकरयोः खड्गखेट
कधारिणीं घोररूपां पश्चिमाभिमुखीं ध्यात्वा तिष्ठन्तीं धा
दिपंचोपचारैः संपूज्य नमस्कृत्य करकं कराभ्यामुद्धृ
त्य मंडपाभ्यंतरे प्रदक्षिणं भ्रमणे तत्रालेनोदकधारं
सिंच्य शंभोर्लोकपालानांचाज्ञयामासशिष्यं रक्षरक्षेति
वदन प्रदक्षिणंपरिक्रम्य तंकरकं स्वस्थाने निवेश्योप
विश्य अस्त्रमंत्रेणपुनस्तामस्त्रदेवतां पंचोपचारैः संपूज्य
ततः प्रागुक्तेषु कुंडेषु गुरुचार्य्यकुंडे वक्ष्यमाणविधिना
ग्निं संस्कृत्य नूतनं पात्रादिपात्रमस्त्रमंत्रेणप्रक्षाल्य तत्र
मूलमंत्रेणाष्टधाभिमंत्रितात् पंचदशप्रसृतिमिता
नस्त्रमंत्रं जपन् निक्षिप्य तत्रगोदुग्धं यावत्सृतं भवति।
तावन्निक्षिप्य प्रक्षालितपात्रे कवचमंत्रमुच्चरन् तत्पा
त्रावदनं विधाय मूलमंत्रं स्मरन् प्राङ्मुखो गुरुश्चसंप
क्वातस्मिन् स्विन्ने मूलमंत्रेण तत्पात्रमवतार्य्या स्त्रमं
त्रेणाभिमंत्रिते कुशास्तरे निक्षिप्य त्रिधाविभज्यैकं भा
गं देवतायै निवेद्य द्वितीयं भागं मूलमंत्रेण हुत्वा तृ
तीयभागं शिष्येन सह गुरुर्भक्त्वा गुरुः स्वयमाचांतः।
स्वाचांताय शिष्याय षडंगन्यासयोगेन सकलीकृता
य प्रादेशमात्रं यथोक्तं दंतकाष्ठं हृन्मंत्रेणाष्टधाभिमंत्रि

तेदद्यात् शिष्योपि दंतधावनं विधाय दंतकाष्ठं प्रक्षाल्य पुरतः परित्यज्याचम्य गुरोः समीपं गच्छेत् ततो गुरुः शिष्य शिखाबंधनेन मूलमंत्राभिमंत्रितेनाशिष्यं संरक्षितेन सा ईं तस्यां वेद्यां कुशास्तरणे तां सांशयनं कुर्यादित्यधिवासः ॥ इति श्री वघेलकुलकमलप्रद्योतप्रचंडमार्तंड श्री महाराजकुमार श्री जैत्रसिंहदेवविरचिते श्री भैरवाचार्य्यजाते एकादशस्तवः ११ ॥ ॥ कुंडे गोमयोपलिप्ते वह्निस्थापनं कुर्यात् तत्रादौ कुंडसमीपे वै गुरुः प्राक् नित्यपूजोक्तविधिना स्वासने पूजाद्यखिलन्यासनानसंपूजाद्यर्घ्यस्थापनान्तं पूजानां विधाय कुंडं मूलमंत्रेणाभ्युक्ष्य स्वमंत्रेण प्रेक्षास्त्रमंत्रेण कुंडमध्ये किंचित्खननं कृत्वा अस्त्रमंत्रेणैतन्मृदमंगुष्ठानामिकाभ्यां तद्धृत्य बहिस्त्यक्त्वा हृन्मंत्रेण शुद्धमृत्तिकया। खातं स्थानमापूर्य्य अस्त्रमंत्रेण समीकृत्य कवचमंत्रेण जलैः संसिच्य अस्त्रमंत्रेण काष्ठादिना कुट्टयित्वा दृढीकृत्य कवचमंत्रेण कुशैः कुंडमध्यं संमार्ज्य कवचेनैव गोमयाद्भिः संलिख्य कवचेनैवाग्निसोमात्मकां षट्त्रिंशत्कलारूपं संचिंत्य कवचेनैव मेखलात्रये पित्रिसूत्रीकृतसूत्रेण प्रतिमेखलं त्रिस्त्रिः संवेष्ट्य ॐ अस्त्र

मै॰पा॰ कक्कुंडाय एतदासनं नमः अमुककुंडाय एषोर्घ्यः स्वा
८१ हा इत्यादि प्रागुक्तासनादिदीपांतैरुपचारैः प्रणवचतु
रस्रादि तत्तत्कुंडं नाम चतुर्थीनमोंतेन संपूज्य तथैव ना
भिं च संपूज्य मेखलात्रयं हृन्मंत्रेण तथैव संपूज्य अस्त्रे
ण कुंडं वज्रवत् दृढं संचिंत्य हृन्मंत्रेण कुशैः कुंडस्य च
तुर्दिक्षु वह्नेर्ज्वालाविनाशाय चतः पथं मार्गचतुष्टयम्
परिकल्प्य कवचमंत्रेणाच्छिन्नाग्रैः कुशैरस्त्रमंत्रादि
भिर्मंत्रितैः कुंडमित्येगणं सर्वमाच्छादयन् अच्छपाठ
नं विदध्यादित्यष्टादशसंस्कारान् कुर्यात् प्रथमोदितै
र्वा तुर्भिरेव संस्कारैः कुंडं संस्कृत्य तत्र हृन्मंत्रेणास्त्रमंत्रे
ण वा दक्षिणोत्तरमध्योत्तरेषु प्रागग्रा मपश्चिममध्यमपूर्वेषु
उदगग्रा इति तिस्रः तिस्रो रेखाः कुशमूलेन विलिख्य प्र
णवेनाभ्युक्ष्य प्रागग्रास्त्रे रेखास्वदक्षिणरेखायां विष्ण
वेनः मध्यरेखायां रुद्रायनमः उत्तररेखायां इंद्रायनमः
उदगग्रासु रेखासु पश्चिमरेखायां ब्रह्मणेनमः मध्य
रेखायां यमायनमः पूर्वरेखायां सोमायनमः इति सं
पूज्य तत्र प्रागुक्तयोगपीठपूजाक्रमेण मंत्रकादि परत
त्वांतं योगपीठं संपूज्य तत्केसरेषु स्वाग्र्यादि प्रादक्षिण्ये
न मध्यांते ॐ जयायै नमः विजयायै नमः अजितायै॰

अपराजितायैनमः नित्यायै॰ दोग्ध्यैः विलासिन्यै अघोरा
यै॰ मंगलायैः इतिसंपूज्य श्रीं ह्रीं सर्वशक्तिकमलासना
यनमः इतिमध्येपुष्पांजलिंनिक्षिप्य तत्रभुवनेश्वरीं तन्मं
त्रेणवाह्यावाहनादि परमोकरणांतं तत्तन्मुद्रयाविधा
यासनादि षोडशोपचारैः संपूज्य श्रीभैरवंध्यात्वा मूल
मंत्रेणतथैवतंसंपूज्य देवीमनुस्मृत्य देवंचकामोन्वतो
विचिंत्य स्वर्णादिपात्रेमृत्पात्रेण मृत्पात्रेचेन्नूतनेन का
सूर्यकांतादिभवंवाश्रोत्रियद्विजगृहाद्वाग्निमानीय त
न्मध्यादस्त्रमंत्रेणैकमंगारकंक्रव्यादांशंनैरृत्यकोणेप
रित्यज्य देवांशंमूलेनस्वपरतः संस्थाप्य मूलमंत्रेणवे
क्ष्य अस्त्रमंत्रेणप्रोक्ष्य अस्त्रेनकुशैसंताड्य कवचेनाभ्यु
क्ष्य तत्रस्वमूलाधारस्थवह्निमंडलमध्यगतपरमात्मस्व
रूपाग्नीषोमात्मकविंदोस्सकाशाद्वह्निमणिपूरणगत ज
ठरानलेनसहस्वसुषुम्णावहन्नासापुटाध्वनानिष्कास्य र
मितिवह्निबीजमुच्चरन्पुरतः पात्रस्थितवह्नौ बहिश्चि
तन्यंसंयोज्य औदर्यंवाद्युपपार्थिववह्निनामैकंविभा
वयन् प्रणवेणाभिमंत्र्य वमितिधेनुमुद्रयामृतीकृ
त्य अस्त्रमंत्रेणसंरक्ष कवचमंत्रेणावगुंठ्य ॐरंवह्नवे
नमः इतिगंधादिभिसंपूज्य जानुभ्यांधरणींगतः त

भै॰पा॰ त्पात्रं कराभ्यामादाय कुंडस्योपरि प्रदक्षिणं परिभ्राम्य
७९ देव्या येनोशिवबीजमिति ध्यायन् स्वाभिमुखं कुंडमध्ये
८१ प्रणवमुच्चरन् तमग्निं निक्षिप्य मेथनोद्भदीयादेवदेवो
८६ राचमनं दद्यात् ॐ चित्पिंगल हन हन पच पच दह दह
सर्वं ज्ञापय स्वाहा इति मंत्रमुच्चरन् मुखं कृत्वा ह्य
शेरग्निं प्रज्वाल्य काष्ठैः पटुं कृत्य कृतांजलिस्तिष्ठेत् ॐ
अग्निं प्रज्वालितं वंदे जातवेदं हुताशनं सुवर्णवर्णममलं
समिद्धं सर्वतो मुखं इति ज्वलंतमग्निं उपस्थाय मेयोप
विश्य वक्ष्यमाणवह्निमंत्रेण प्राणायामत्रयं कृत्वा शि
रसि भृगुऋषये नमः मुखे गायत्री छंदसे नमः हृदये
अग्निदेवतायै नमः मुखे रं बीजाय नमः पादयोः स्वा
हा शक्तये नमः इति विन्यस्य दीक्षांगहोमे विनियोग
इति कृतांजलिर्वदेत् लिंगे ॐ सं हिरण्याय नमः गुह्ये
गं गगनाय नमः शिरसि स्फूं रक्तायै नमः मुखे व्यूं कृ
ष्णायै नमः मनसि लं सुप्रभाय नमः नेत्रयोः रुं बहुरू
पाय नमः पूं अतिरक्तायै नमः इति सप्त जिह्वा विन्य
स्य सहस्रार्चिषे हृदयाय नमः ॐ स्वस्ति पूर्णाय शिर
से स्वाहा ॐ तिष्ठ पुरुषाय शिखायै वषट् ॐ धूम व्यापि
ने कवचाय हुं ॐ सप्तजिह्वाय नेत्रत्रयाय वौषट् ॐ ध

र्धरायअस्त्रायफट् इति षडंगमंत्राणां गुष्ठाविकरतलांतं करयोर्विन्यस्य हृदयादिषडंगेष्वविन्यसेत् ततःशिरसि अग्नये यांजातवेदसेनमः वामांशे ॐअग्नये सप्तजिह्वाय नमः वामपार्श्वे ॐअग्नये हव्यवाहनायनमः वामकक्षां अग्नये अश्वोदरायनमः लिंगे अग्नये वैश्वानरायनमः दक्षिणकक्षां ॐअग्नये कौमारतेजसेनमः दक्षिणपार्श्वे ॐअग्नये विश्वमुखायनमः दक्षिणांशे ॐअग्नये देववक्त्रायनमः इति विन्यस्य वक्ष्यमाणवह्निरूपं स्वात्मानं ध्यायन् सप्तजिह्वां मुद्रांबध्वा कुंडस्योत्तरभागेकुशास्तरे स्रुक्स्रुवौ प्रणीता पात्रे आज्यस्थाली चरुहोमे चरुस्थाली परिधित्रय सती त्वचकात्मकमिध्मंलून मूलमग्रदीर्घकुशामुष्टिरिति पात्राण्येकेमुखानि संस्थाप्यान्यान्यपि होमद्रव्य दध्यक्षतादि वलिद्रव्याणि गंधपुष्पादि पूजाद्रव्याणि च यथापथं संस्थाप्या धोमुखानि स्रुक्स्रुवादिदिति सपवित्राधोमुखरहस्ल सेक रूपनोक्षणपूर्वकमुत्तानीकृत्य प्रणीतापात्रं प्रक्षाल्य स्वपुरतः कुशास्तरेणिधाय शुद्धजलेरापूर्य तत्रगंधाक्षतानि निक्षिप्य प्रादेशमात्रंसाग्रं कुशाद्वयं मध्यग्रंथेयुतं जल मध्ये निधाय करद्वयानामिकांगुष्ठाभ्यां पवित्रमूलाग्रेवि धृत्यास्त मंत्रस्मंत्रमुच्चरन् पवित्रमध्येनजलं पात्राद्बहि वि वारं मूमौनिक्षिप्येदित्युत्पवनं विधायतन्मध्ये किंचिद्व

मे·पा·
८५

त्रंनिक्षिप्य तत्पात्रंकराभ्यांनासामस्तकमहृत्य कुंडस्योत्तरभागे
कुशास्तरेनिधाय तदुपरिप्रागग्रान्दर्भान्निक्षिपेदिति प्रणीतापा
त्रंसंस्थाप्य प्रोक्षणीपात्रंप्रक्षाल्य शुद्धजलैरापूर्य्य तन्मध्ये
प्रणीतापात्रेजलंपात्रांतरेणोद्धृत्य किंचिद्दत्वातेनजलेन मू
लमंत्रेण सर्वाणि पात्राणिहोमद्रव्याणिच प्रोक्षयेदिति द्रव्या
साधनविधाय प्रोक्षणीजलेनाग्निं मूलमंत्रेणपरिषिंच्य ग
तैश्चतुर्भिर्द्दर्भैः प्राचीदिशिमारभ्य प्राच्यामुत्तराग्रैरीशानादिनै
ऋत्यंतंपरिस्तीर्य्य पुनर्दक्षिणस्यांप्रागग्रैःपूर्वपरिस्तरणमूल
माच्छादयन्नमः पुनःपश्चिमायांउत्तराग्रैर्दक्षिणपरिस्तरण
मूलं मूलेनाच्छादयन् पुनःउत्तरस्यांप्रागग्रैःपश्चिमपरिस्तरणा
ग्रं मूलेनपूर्वपरिस्तरणाग्रमग्रेणमाच्छादयन् परिस्तीर्यपरि
धित्रयमादायसर्वतः स्थूलपश्चिमेउत्तराग्रं ततःकनिष्ठं दक्षि
णेपूर्वाग्रंपश्चिमपरिधेर्मूलेपरिमूलंयथाभवति तथापुन
स्ततोपिकनिष्ठमुत्तरस्यांपूर्वाग्रं पश्चिमेपरिधेरग्रोपरिस्थमू
लमितिकुंडस्यमध्यमेखलोपरिस्थपरिस्तरणेपरिधित्रयंनि
क्षिपेत् अत्रपश्चिममेखलायांतत्परिस्तरणपरिधिस्थापनं
योनिनालस्तृतीयमेखलोरंतरालेकार्यमिति नालमेखलयो
र्मध्येपरिधिस्थापनंसाचारंध्रंकुर्यात् तथाहि विहन्मध्यमा
मेखलोपरीतिसारसंग्रहवचनात् ततःपश्चिमपरिधौ ॐब्र
ह्मणेनमः दक्षिणपरिधौ ॐविष्णवेनमः उत्तरपरिधौ ॐ

ॐरुद्रायनमः इतिसंपूज्य वह्निमंत्रेणप्रागुक्तपरिधीपा
द्यार्घ्याचमनीय मधुपर्कपात्राणिसंस्थाप्य सकुंडमध्ये
षट्कोणगर्भितंसकेशरं चतुर्द्वारयुक्तचतुरस्रवेष्टितमष्ट
दलकमलंवह्निपूजापीठंविभाव्य तत्रप्रागुक्तविधिनामं
डूकादितानात्मानंयोगपीठसंपूज्याष्टदलकेसरेषुस्वाग्रा
दिप्रादक्षिण्येनमध्यांऽन्तं ॐपीतायैनमः ॐश्वेतायै॰ अ
रुणायै॰ कृष्णायै॰ धूम्रायै॰ तीव्रायै॰ विस्फुलिंगिन्यै॰
रुचिरायै॰ ज्वालिन्यै॰ इतिनवशक्तिसंपूज्य रंसर्वश।
क्तिकमलासनायनमइतिसमस्तपीठंसंपूज्य तन्मध्येक
रैर्वरं स्वस्तिकशक्तिर्भीतिंदधानमंभोजगतंत्रिनेत्रंसिंदूर
वर्णंतपनीयभूषं वह्निंजटाभूषितमौलिमीडे इत्यग्निंध्या
त्वा सप्तजिह्वामुद्रांप्रदर्श्य ॐवैश्वानरजातवेदइहावहलो
हिताक्षसर्वकार्याणिसाधयस्वाहा अग्नयेनमइत्यग्निंत्रिःपु
ष्पांजलिनापुनर्वह्निमंत्रमुच्चार्य अग्नयेएतदासनंनमः॥
पुनर्वह्निमंत्रं अग्नेएषतेर्घ्यंस्वाहा एवंएतत्तेपाद्यंनमः एत
त्तेआचमनीयंस्वधा एतत्तेमधुपर्कंस्वधा एतत्तेस्नानंनमः
इतिशिरस्त्वरणामुखमूर्द्धादिसर्वांगोद्देशेनमेखलयावह्निः
पाठांतरेपाद्यादिस्नानांतानुपचारान्वह्नेः तत्रदंगन्त्वावतया
परिकल्प्य पुनराचमनीयंदत्वा वस्त्रावैवववस्त्रंदत्वा पुनर्वह्नि
राचमनीयंदत्वा यज्ञोपवीतं निवेद्यवह्निः पुनराचमनीयंद

भै॰पा॰ ८२ त्वा गंधपुष्पंवस्त्रावेवानवेदयेदितिवह्निमंत्रेणप्रागग्रपरिधा
येवाधिवासनादि पुष्पांतानुपचारानुपचार्य्य षट्कोणेषुदेवा
83 यकोणमारभ्य ॐ ह्रूँहिरण्यायैनमः ष्रूँगगनायैनमः स्रूँर
क्तायै॰ व्रूँकृष्णायैनमः ल्रूँसुप्रभायै॰ रव्रूँबहुरूपायै॰ अ्रूँ
अतिरक्तायै॰ इतिसप्तजिह्वाःसंपूज्य षट्दलकेसरेषु अग्नी
शासुखायव्यदेवाग्रततदादिचतुर्दिक्षुच ॐसहस्रार्चिषेहृ
दयायनमः स्वस्तिपूर्णायशिरसेनमः ॐउत्तिष्ठपुरुषायशिखा
यै॰ धूमव्यापिनेकवचाय॰ सप्तजिह्वायनेत्रायनमः धनुर्धराया
स्त्रायफट् इतिषडंगानिसंपूज्याष्टदलेषुदेवाग्रदलमारभ्य ॐ
अग्नयेजातवेदसेनमः ॐअग्नयेसप्तजिह्वाय॰ अग्नयेहव्यवा
हनाय अग्नयेअश्वोदरजाय॰ अग्नयेवैश्वानराय अग्नयेकौमा
रतेजसे॰ अग्नयेविश्वमुखाय(अश्वोग्नयेअश्वोदर) अग्नयेदेवमु
खाय॰ इतिप्रादक्षिण्येनाष्टौमूर्तिंसंपूज्य तद्बहिश्चतुरस्रेप्राग
ग्रादीनिंद्रादीनृतदायुधानिचसंपूज्य पुनर्वह्निमंत्रेणवह्निंसं
पूज्य धूपदीपादिदत्वा नैवेद्यमुत्सृज्याग्नावेवनिक्षिप्य प्रग्व
दाचमनीयंदत्वा तांबूलंचवस्त्रावेवनिवेद्याग्निंप्रणम्य स्रुक्स्रु
वादायाधोमुखौतावग्नौप्रतप्य कुशान्गृहीत्वा तपोरग्रंकुशा
ग्रैर्मध्येमध्यमूलंमूलैरितित्रिःसंमार्ज्य पुनरधोमुखौतौप्रताप्य
वामकरेनादाय प्रोक्षणीजलेनदक्षिणकराग्रेणप्रोक्ष्य पुनर
पिप्रागवत्प्रतप्य कुशानग्नौप्रक्षिप्य स्रुकस्रुवौदक्षिणभागे

निधाय स्थाल्यामादाय अस्त्रमंत्रेण प्रक्षाल्य स्वपुरतः कुशा
स्तरेण निधाय तदुपरि दर्भाग्रं प्रादेशमात्रं साग्रं मध्ये ब्रह्मग्रंथि
युतं कुशद्वयरूपं पवित्रं निधाय पात्रांतरस्थं शुद्धं गोघृतं तुषा
दिदूषणरहितं वीक्षणादि चतुःसंस्कारैः संस्कृतमाज्यस्था
ल्यां निक्षिप्य कुंडस्य वायव्यकोणे कुंडादंगारानुद्धृत्य मेख
लायाः वहिः भूमौ निक्षिप्य तेष्वाज्यस्थाल्यां हृन्मंत्रेण निधा
य कुशाद्वयं प्रज्वाल्य हृन्मंत्रेणाज्ये निक्षिप्य शेषमग्नौ निवेश्य
पुनर्दर्भद्वयं प्रज्वाल्य कवचमंत्रेणाज्यस्थालीपरितः परिभ्रा
म्य दग्धशेषमग्नौ निक्षिप्य पुनः कुशान् प्रज्वाल्य हृन्मंत्रे
णाज्ये प्रदर्श्य दग्धशेषं वह्नौ निक्षिप्य आज्यस्थालीमुत्तज्य
प्रादक्षिण्येन कुंडपरितो भ्रामयित्वानीय स्वपुरतः कुशास्त
रे निधाय वामस्थानं गारान्कुंडमध्ये निक्षिप्याय संस्कृत्य
अंगुष्ठनामिकाभ्यां करद्वयेन पवित्रमूलाग्रे धृत्वास्त्रमंत्रमु
च्चरन् पवित्रमध्येन घृतमुत्प्लाव्य हृन्मंत्रमुच्चरन् तथैव प
वित्रमध्येन स्वाभिमुखं घृतं त्रिः संप्लाव्य तत्पवित्रमाज्यस्था
ल्यां प्रागग्रं मध्ये निवेश्य भागद्वयं कृत्वा दक्षिणभागं शुक्ल
पक्षं परिकल्प्य पुनस्तत्रैव वामभागे इडां दक्षिणे पिंगलां
मध्ये सुषुम्णामिति नाडीं संचिंत्य स्रुवेण दक्षिणभागाद्
न्मंत्रेणाज्यमादाय ओं अग्नये स्वाहा इति वह्नेर्दक्षिणे भ्रामे
नेत्रे हुत्वा इदमग्नये नम इत्युद्देशत्यागं विधाय पुनः हृदय

मंत्रेणवामभागादाज्यंगृहीत्वा ॐसोमायस्वाहा इतिवह्नेर्वा
मलोचनेहुत्वा सोमायेदंनममइत्युद्देशत्यागंविधायपुनः हृ
दात्मध्यादाज्यंगृहीत्वा ॐअग्नीषोमाभ्यांनस्वाहा इतिवह्नेर्ल
लाटलोचनेहुत्वा अग्निषोमाभ्यां मिदंनमम इत्युद्देशत्यागंवि
धाय पुनर्दक्षिणभागा दाज्यंगृहीत्वा ॐअग्नयेस्विष्टकृते
स्वाहा इतिवह्नेर्वक्त्रेहुत्वा(अग्नयेस्विष्टकृतेस्वाहा इतिवह्ने
वक्त्रेहुत्वा)अग्नयेस्विष्टकृतेदं नममइत्युदेशत्यागंविधाय
ॐभूर्भुवःस्वःस्वाहा प्रजापतयेइदंनमम ॐवैश्वानरजातवे
दइहावह लोहिताक्षसर्वकर्माणिसाधयस्वाहा इतिवह्नि
मंत्रेणवारत्रयंहुत्वा इदमग्नयेनमम इतिप्रतिवारमुद्दे।
शत्यागंकृत्वा ॐअग्नेगर्भाधानंसंपादयामिस्वामहा ॐअग्न
येपुंसवननंसंपादयामिस्वाहा ॐअग्नेः सीमंतोन्नयनं संपा
दयामिस्वाहा ॐअग्नेः प्रतिकर्माज्याहुष्टकंहुत्वा वागेश्व
रीजातंवह्निंप्राग्एक्तूपध्यायन् ॐअग्नेर्जातकर्मसंपादया
मिस्वाहा इत्यष्टावाहुतिहुत्वा वह्नेर्नालच्छेदंकृत्वा सूतं
कंसंशोध्य ॐवह्नेर्नामकरणंसंपादयामिस्वाहा इत्यष्टा
वाहुतिर्हुत्वा त्वंशिवाग्निरितितस्यनामंकृत्वा दिव्योवह्ने
पितरौसंपूज्य ॐवह्नेरुपनिष्क्रमणंसंपादयामिस्वाहा ॐ
अग्नेरन्नप्राशनंसंपादयामिस्वाहा ॐअग्नेःचैलंसंपादया
मिस्वाहा ॐअग्नेरुपघदंसंपादयामिस्वाहा ॐअग्नेगोदा

नेसंपादयामिस्वाहा ॐअग्नेसमावर्तनंसंपादयामिस्वाहा ॐ
अग्नेरुद्वाहंसंपादयामिस्वाहा इतिप्रतिकर्मोष्टाहुतिर्दत्वा।
अग्नेगर्भाधानाद्युद्वाहान्तान्संस्कारान्विधाय वह्निपितरौ देवदेव्यौ
प्राग्वत्संपूज्य विसृज्य मूलाग्नेरुद्धृतसंस्थिता पंचसमिध त्व
क्षीणेकदेवांजलिनावह्नौसमर्प्य ॐत्वंहिरण्यायैस्वाहा ष्क्रू
गगनायै· स्पूरक्तायैः ब्रूंकृष्णायै त्प्रूरक्तायै स्त्रूबहुरूपायै·
ष्क्रूअतिरक्तायै ॐसहस्रार्चिर्हृदयायस्वाहा ॐस्वस्तिपूर्णा
यस्वाहा शिरसेस्वाहा इतितत्पुरुषायशिखायस्वाहा ॐ
धूमव्यापिनेकवचायस्वाहा ॐसप्तजिह्वायनेत्रायस्वाहा
ॐधनुर्धरायास्त्रायस्वाहा ॐअग्नयेसप्तजिह्वाय· अग्नये
हव्यवाहनाय· अग्नयेअश्वोदराय· अग्नयेवैश्वानराय अग्न
येकौमारतेजसेस्वाहा अग्नयेविश्वमुखाय अग्नयेदेवमुखा
य· इतिजिह्वाग्नमूर्तिमंत्रैरेकामाहुतिर्हुत्वा सर्वत्रप्राग्व
त्तत्त्वान्मोदरत्यागंचकुर्यात् ततःस्रुवेणाज्यमादाय स्रु
चिचतुर्वारंनिक्षिप्य अधोमुखंस्रुकस्रुवौमुखेनिधायोत्था
य प्रागुक्तवह्निमंत्रमुच्चार्य्य वौषडित्यग्नौतिष्ठत्स्रुकस्रुवौ
पविष्य ॐस्वाहा ॐश्रींस्वाहा ॐह्रींस्वाहा ॐह्रींक्लींस्वा
हा ॐश्रींह्रींक्लींग्लौंस्वाहा ॐश्रींह्रींक्लींग्लौंगंस्वाहा ॐश्रीं
ह्रींक्लींग्लौंगणपतयेस्वाहा ॐश्रींह्रींक्लींग्लौंगणपतयेवर
वरदस्वाहा ॐश्रींह्रींक्लींग्लौंगंगणपतयेवरवरदसर्वजनं
मेस्वाहा ॐश्रींह्रींक्लींग्लौंगंगणपतयेवरवरदसर्वजनंमे

वशमानयस्वा इतिदशधाविभक्तेनमहागणपतिमंत्रेण
दशाहुतिंहुत्वा ॐश्रींह्रींक्लींग्लौंगंगणपतयेवरवरदसर्व
जनंमेवशमानयस्वाहा इतिसमस्तेन गणपतिमंत्रेणाच
तुर्वारमाज्येनजुहुयादित्यग्निस्थापनविधिः अतःपरंच
रुयोकसमेंमपप्रागुक्तभैरवपूजाचक्रंविभाव्य तत्रप्रागु
क्तविधिना मंडूकादिपीठमंत्रांतयोगपीठंसंपूज्य तत्रप्रा
(गुक्तभैरवपूजा) भगवतदेवमावाह्य प्रागुक्तविधिनामागंसा
वरणंसर्वोपचारैः पूजयेत् अन्यत्सर्वंकुंडमध्यमवत्कल्प
येदितिति ततोमूलमंत्रेणवह्निदेवतयोश्चैकीकरणार्थं
चावंशत्याज्याहुतिंहुत्वा स्वात्माग्निदेवतानामैक्यंभावये
त् मूलेननाडीसंधानार्थमेकादशवारंघृतेनहुत्वा षडं
गावरणदेवतानांनित्यहोमोक्तविधिनैकैकामाहुतिंहु
त्वाशेन मूलमंत्रेणपंचविंशतिंहुत्वा प्रागादिदिकस्थाष्ट
सुकुंडेषुऋत्विग्भिः प्रागुक्तविधिनाष्टादशसंस्कारैःसंस्कृ
तेषुगुरुः स्वकुंडादरग्निसमुद्धृत्योद्धृत्यःनिक्षिप्य ऋत्विज
श्चस्वस्वकुंडेवह्निंपरिषिंचेत् परिस्तरणपरिधिप्रक्षेपन
पूजादिभिः सम्यकपरितोत्तसमिद्धेतस्मिन्स्वेष्टदेवता
नित्यपूजोक्तविधिनास्वासनपूजादितोंमूलंतेरुपचारैः स
सम्यकसंपूज्य वह्नैकीकरणनाडासंधानांगावरणहो
मांते मूलमंत्रेणगुरुणाविभज्यदत्तेन घृतमिश्रेण पा
यसेन पंचविंशतिधाहुत्वा चार्येण सह यथोक्तमधि

वासनकर्मशेषं शयनांते विदध्युरिति ततो गुरुः शिष्यः प्रातरुत्थाय कृतप्राङ्‌निर्मितचरोरुत्तीर्यांशेन वधाविभज्यैकांकक्रियः शिष्याय प्रदिशमात्रं यथोक्तं दंतकाष्ठं मूलमंत्रेण सप्ताभिमंत्रितं दत्वा दंतधावनं कारयेत् शिष्योपि तेन प्रागुक्तं दंतधावने मंत्रस्मरन् दंतान्विशोध्य दंतकाष्ठं प्रक्षाल्य पुरतश्चतुरस्रे हस्तमात्रे स्थंडिले त्यजेत् ततो गुरुः तत्परीक्षां कुर्यात् तत्र शुभाशुभफलानि सारसंग्रहे ईशानाग्रे त्वन्नलाभः प्रागग्रे भूतिरुत्तमा आग्नेयाग्रे मतस्त्वापो वंधुनाशश्च दक्षिणे राक्षसाग्रे मृत्युभयं वारुणाग्रे मनःशुचिः व्यायव्याग्रे व्यग्रता च कौवेराग्रे सुखावहं । इति ततः स्वप्नपरीक्षां च कुर्यात् कुलप्रकाशतंत्रे क्रूरस्वप्ने प्रथमे दीक्षा ह्यक्रूरे मध्यमा भवेत् उत्तमस्वप्नपूर्वा तु दीक्षा सर्वोत्तमा मता इति तत्र दंतकाष्ठस्य अमंगलदिगग्रपाते दुःस्वप्नदर्शने च प्रायश्चित्तमाह सारसंग्रह एव अमंगलस्थानपाते प्रायश्चित्तं समाचरेत् इति प्राक् पुरश्चरण प्रकरणे दुःस्वप्नदर्शनजन्यदोषनिवृत्त्यर्थं यत् प्रायश्चित्तमुक्तमेवात्राप्याचरणीयमिति ततः शिष्योपशांतः कृतपूर्वाह्णिकक्रियः समलंकृत्वा श्रीगुरुं प्रणम्य तदाज्ञया तत्पार्श्वे उपविशेत् ततो गुरुश्चारुकलिजस्वस्ति कुंडे तथैव देवं सांगं सावरणं सांगं संपूज्य सद्यो तैस्तिलैस्तत्कल्पेषु

पुरश्चरणहोमोक्तहूवैवाष्टोत्तरसहस्रं अष्टोत्तरशतंवा
जुहुयुः ततोगुरुःशिष्यंपंचगव्यंपाययित्वा कुंडसमी
पंनीत्वा दिव्यदृष्ट्याविलोक्य तस्यहृदयारविंदाज्जीवा
त्मानंमूलसुषुम्नापरिपाट्यातदेहानाडीमार्गेणनिस्सा
र्य स्वात्मनियोगबलेनगुरूक्तयुक्त्यासंयोज्य शिष्यस्य
षडध्वशोधनंकुर्यात् । तत्रशिष्यस्यपादयोः कलाध्या
नंनिवृत्तिप्रतिष्ठाविद्याशांतिः शांत्यतीताचेतिपंचक
लात्मकंसंचिंत्य ततस्तस्यलिंगप्रदेशेशिवशक्तिश्वरसदा
शिवशुद्धविद्यामायाकालनियति कलाविद्यारागपुरु
षप्रकृति बुद्ध्यहंकार मन श्रोत्रत्वक् चक्षुजिह्वाघ्राण
वाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगंधाकाश
वाय्वग्निजलपृथिव्यात्मकषट्त्रिंशत्तत्त्वरूपंशैवंतत्त्वा
ध्वानंध्यायेत् इतिशिवदीक्षायांतु वैष्णवदीक्षायांतु
जीवप्राणोऽयसुर्मनइंद्रियदशकतन्मात्रा भूतानां
पंचकमपिहृत्पद्मंतेजसांत्रयंतदत्यक्षाक्षाश्चवासुदेवप्र
मुखाश्चत्वारउपविष्टा इंद्रियदशकं प्राणक्तश्रोत्रयावा
गादयश्च तन्मात्राशब्दादयः भूतपंचकमाकाशादि
त्येजसांत्रयंसोमसूर्याग्निमयंवासुदेवप्रमुखाः वासु
देवसंकर्षणप्रद्युम्नानिरुद्धाश्चत्वारः सौरदीक्षायांतु ।
भूतन्मात्रेंद्रियाणिमनोगर्वश्चाधीस्तथा प्रधानचेति

गर्भोहंकारः प्रधानंपुरुषंतत्वं शक्तिदीक्षायांतत्रा
त्मविद्याशिवाएतेविपरितात्सएवच सर्वंतत्वंचेतिवि
परित शिवविद्यात्मइतिक्रमेणतएव आत्मविद्याशि
वा एव इतिदशतत्वानि। इत्थंतत्वदीक्षायां तत्तद्ध्या
नंचिंतयेदिति ततःशिष्यस्यनाभौ अतलवितलसुत
ल महातलरसातल पाताल भूर्भुवः स्वः महः जनः
तपः सत्यंलोकात्मकचतुर्दश भुवनरूपं भुवनाध्या
नंसंचिंत्य ततस्तस्यहृदयेअकारादिक्षकारांतवर्णा
कदंबकरूपंवर्णाध्यानंविभाव्य तस्यललाटेमूल
मंत्रस्य वर्णसमुदायरूपंपदाधानंसंस्मृत्य तस्त
स्यशिरसि समुदायमयं मूलमंत्रस्वरूपं मंत्राध्या
नध्यायेदिति शिष्यशरीरेध्वषट्कं संचिंत्य तंकूर्चे
नस्पृशन् गुरुकुंडेअमुकस्य कलाधानशोधयामि
स्वाहा एवंघृताक्तेरष्टधाहुत्वा कलाधानंतत्वाध्व
निविलीनंविभाव्य पुनः ॐ वर्णाध्यानंशोधयामि
स्वाहा इत्यष्टधाहुत्वा तन्मंत्राध्वनिविलीनंविभा
व्य पुनःअमुकस्यध्यानंशोधयामिस्वाहा इत्यष्ट
धाहुत्वा तंब्रह्मरंध्रेपरमशिवेविलीनेविभाव्य पुनः
संहृतिप्रतिलोमेनपरमशिव सकाशात मंत्राधानं

भै॰पा॰ ८१

स्पृष्ट्वा ततः पदाध्यानं ततो भुवनाध्यानं ततस्तत्वाध्यानं
ततः कलाध्यानं च स्पृष्ट्वा तत्स्थाने संस्थाप्य शिष्यं दिव्य
दृष्ट्या विलोक्य स्वस्मिन्स्थितं शिष्यचैतन्यं तद्धृदयारविंदस्था
वाहनोक्तप्रकारेण तद्ब्रह्मरंध्रेण संयोज्य ॐ भूरग्नये च पृथि
व्यै च महते च स्वाहा ॐ भुवो वांतरिक्षे वायव्याय च महते च
स्वाहा ॐ स्वरदित्यायं च देवे च महते च स्वाहा ॐ भूर्भुवः स्व
श्चंद्रमसे च नक्षत्रेभ्यश्च दिशाश्च दिग्भ्यश्च महते च स्वाहा इत्या
ज्याहुतिचतुष्टयं हुत्वा इतः पूर्वं प्राणबुद्धिदेहधर्माधिकार
स्त्रजाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां
पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्प
णं भवतु स्वाहा इत्याज्याष्टाहुतिं हुत्वा ॐ सहस्रार्चिमहा
तेजा नमस्ते वह्निरूपधृक् सर्वाशिने गतपावकाय नमो
स्तु ते त्वं रौद्र घोरकर्मा च घोरहा त्वं नमामि च विश्व त्वं
लोकपालस्त्वं शांत्यमृतं प्रयच्छ मे इत्यग्निं प्रार्थ्य अग्निमं
त्रेण प्राग्वदग्निं संपूज्य ॐ न्यूनातिरिक्तसिद्ध्यर्थं ददामि स
घृतं तिलं ॐ हुं सां - गं कुरु कुरु स्वाहा इति तिलैरेकामा
हुतिं हुत्वा घृतेन स्रुवमापूर्य तदुपरि पुष्पमधोमुखं स्रु
चं निधाय शंखवत्संपुटाभ्यां कराभ्यां गृहीतोत्थाय स्रु
क्स्रुवयोर्मूलं नाभौ निधाय वौषडंतेन मूलमंत्रेणाहु

तित्रयंहुत्वा प्रागवत्तत्रदेवं संपूज्य वह्नेः सकाशाद्घस्य कल
शोविसृज्य प्रागवद्याहृत्यग्निजिह्वागमूर्ति मंत्रेरेकैकामाज्या
हुतिंहुत्वा प्रागवत्प्रोक्षणीजलेनाग्निं परिषिंच्य ॐभूर्भोवह्ने
महाशक्ते सर्वकर्मप्रसादकः कर्मांतरेपि संप्राप्ते सान्निध्यंकु
रुसाधनं इत्यग्निंप्रार्थ्य संहारमुद्रयातं स्वात्मनि विन्यस्य प
रिधायत् परिस्तरणस्त्रुचीमग्नौप्रक्षिप्य प्रणीतापात्रमग्ना
स्य पुरतः कुशास्तरे निधाय ॐप्राच्यैदिशेनमः दक्षिणायै
दिशे॰ ॐप्रतीच्यैदिशे॰ ॐऊर्ध्वायदिशेनमः इतितत्तद्दि
शिप्रणीताजलमुत्क्षिप्य ॐअधरायैदिशे॰ इतिभूमौज
लंनिक्षिप्य भूमौपतितजलेन स्वात्मानं शिष्यंप्रोक्षयेदि
ति प्रणीतोद्वासनंविदध्यात् इति दीक्षांगहोमविधिः ॥
इतिश्रीभैरवार्चापारिजाते द्वादशस्तवकः १२॥ ॥ ॥
कुशैः संप्रोक्ष्य ततोनेत्रमंत्रेणशिष्य नेत्रे नूतनपट्टवस्त्रेण
बध्वा तंहस्तेगृहीत्वा कुंभसमीपेनीत्वा तस्यांजलिंपुष्पै
रापूर्य स्वयं मूलमंत्रमुच्चारन् घटस्थ देवतायैपुष्पांजलिं
दापयित्वा तस्यनेत्रबंधमुन्मुच्य कुशास्तरे तंसमुपवेश्य
अज्ञानतिमिरांधस्यज्ञानांजनशलाकया चक्षुरुन्मीलितंये
नतस्मैश्रीगुरवेनमः इतिमंत्रंपठित्वा कुंभेचदेवंसांगंसाव
रणं सर्वोपचारैः संपूज्य प्रागुक्तभूतशुद्धिविधिनातस्यदेहंसं
हृत्य संशोध्योत्पाद्य तस्यदेहे मूलमंत्रस्यऋष्यादिखिलंन्या
सजालंविन्यस्य पुनः कुंभस्थदेवतागंधादिपंचोपचारैः

भै॰पा॰
८८

संपूज्य मंडपद्वारदेवताः सलोकपालांगावरणदेवताग
णेशादिचतुरायतनदेवताः स्वस्वांगावरणसहितादेवस्यां
गे विलीना इति विभाव्य तेजोरूपतामापन्नं तेजोरूपं कल
शजलं परंब्रह्ममयं संचिंतयेत् तं प्रागुक्तविधिना षडंग
न्यासयोगेन सकलीकृत्य शिष्यं समलंकृतं वेद्याः समी
पे सर्वतोभद्रमंडले विरच्य तत्र तं पूर्वाभिमुखं समुपवि
श्य पंचवाद्यघोषपुरस्सरं गुरुः कुंभं समुद्धृत्य कुंभमुखे
स्थाम्रपल्लवादिकं कल्पवृक्षशाखाबुद्ध्या शिष्यशिरसि नि
धाय प्राग्वद्विलोममातृकामुच्चरन् वेदघोषं कुर्वद्भिः
ऋत्विग्भिरन्यैश्च ब्राह्मणैः सह मूलमंत्रेण तं पूर्वाभिमुख
मुपविष्टमुत्तराभिमुखस्तिष्ठन् अभिषिंच्य पुनः पूर्वम
भ्यर्चितमस्त्ररूपिणं करकं गृहीत्वा ततोपरस्तार्थैतम
भिषिंच्य तत्करकस्थावशिष्टजलेन शिष्यमाचाम
यित्वा देवतास्वरूपं तं प्राग्वत् षडंगन्यासेन सकलीकृ
त्य शुद्धे धौते नूतनवाससी परिधाय स्वाचांतं तं स्वसमी
पे समुपवेश्य शिष्यदेहसंक्रांतं देवं तस्यैव देहे गंधादिपं
चोपचारैः संपूज्य शिष्यदेवयोरैक्यं विभावयन् स्वविनी
तस्य दक्षिणकर्णे श्रीमूलमंत्रं वारत्रयं वदेत् शिष्यो ब्रा
ह्मणश्चेत्तस्य हस्ते मंत्रदानरूपेणोदकं दद्यात् अन्येभ्यस्त्वे
वमेव वदेत् ततः शिष्यः स्वगुरूपदिष्टं मूलमंत्रं ऋष्या
दिकरषडंगन्यासपूर्वकं मष्टोत्तरशतमष्टाविंशति वा

रमष्टधा वा जपित्वा जपं प्रागुक्तविधिना समर्प्य गुरुदेव
तामंत्राणामैक्यं विभावयेत् साष्टांगं गुरुं बहुशः प्रणम्य
पुनः पंचांगं प्रणमेत् तत्राष्टांगपंचांगप्रमाणयोर्लक्षण
मुक्तं कुलप्रकाशतंत्रे प्रणामं गुरवे कुर्यात्साधको भक्ति
मान्सुधीः साष्टांगश्चापि पंचांगः पूजाकर्मसु मं ततः हस्ता
भ्यां चरणाभ्यां च जानुभ्यां वक्षसा तथा शिरसा दृष्ट्या तथा वा
चा चित्तेनाष्टांग ईरितः हस्तजानुशिरोवाक्यधीभिः पंचांग
ईरितः इति पंचांगप्रणवे विशेषमाह कुलार्णवे ग्रंथितां
गुष्टकौ कृत्वा करौ शक्राग्रतर्जनी जानुभ्यामवनिं गत्वा पं
चांगप्रणमेत् गुरुरिति इत्थं प्रणम्य गुरवे दक्षिणां द
द्यात् तत्र श्रीकुलार्णवे आचार्यार्तं ततः कुर्याच्छिष्यः
सद्यो विचार्य च अलंकारं वासांसि दद्यात् ऋत्विग्भ्य आद
रात् ईश्वरापि तु बुध्याद्द्विजाशीर्भिश्च नंदितः प्रदद्यात्
गुरवे शिष्यः स्वधनार्द्धं तदर्द्धकं दशांशं वा प्रदद्याद्वित्तशा
ठ्यविवर्जितः तदधीनमना नित्यं तच्चित्तं नपरायणः त
त्पादांबुरजो भूयो भवेत्साधकसत्तमः ततो नानाविधैर्भक्ष्यै
र्लेह्यचोष्यैस्तथेतरैः ब्राह्मणान्भोजयेत्तस्य प्रदद्याद्भूरिद
क्षिणाम् इति क्रियामयी दीक्षा अथैवं विस्तरतः क्रियादीक्षा
कर्तुमशक्तश्चेत्पूर्वोक्ते कनिष्ठे मंडपे प्राग्वद्वेदिकायां मंड
लं कृत्वा तथैव तत्र कुंभस्थापनं कृत्वा ऋत्विग्विवरणाश
क्तौ गुरुश्चतुरस्रमेकमेव कुंडं कृत्वा तत्राग्निस्थापनाद्यखि

लकर्मकृत्वोक्तविधिनाभिषिंच्यदीक्षांदद्यात् मंडपकरण
शक्तौ क्वाचित्प्रशस्तेस्थंडिलेप्राग्वन्मंडलंकृत्वा तदशक्तौच
तरस्रवृत्तवेष्टितमष्टदलकमलंवानिर्माय तत्रोक्तविधिना
कलशंसंस्थाप्य प्राग्वत्तत्रस्थंकुंडं तदशक्तौप्रागुक्तविधि
नास्थंडिलंवाकृत्वा तत्रोक्तविधिनाग्निंसंस्थाप्यऽग्निस्थापनो
विस्मरणशक्तौनित्यहोमोक्तविधिनावाग्निंसंस्थाप्योक्तविधि
नाहोमादिकंकृत्वाभिषिंच्यमंत्रंदद्यात् अथात्रभैरवार्चि
तप्रसंगाद्भैरवमंत्राउद्धार्यंते तत्रादौअष्टाक्षरमंत्रः तत्र
सिद्धकौलेशकोटिप्रभेदेव्योमवीजंसमुद्धृत्य वह्निमाया
समन्वितं विंदुनादसमायुक्तंप्रथमंवीजमुत्तमं गौरीचतु
र्थमुद्धृत्य भीषणीप्रथमंपुनः मालिनीप्रथमंविद्धि मोहि
नीप्रथमंततः मालिनाद्वितीयोपेतंवायुवीजंततःपरं ।
पूर्ववीजेनसंयुक्तंनमोंताष्टाक्षरोभवेत् व्योमवीजंहकारः
वह्निरेफः मायाईकारः विंदुनादौविंद्वर्द्धचंद्रौएतेन भुव
नेश्वरीवीजमुद्धृत्य गौरीचतुर्थंवकारः भीषणीप्रथमंटका
रः मालिनीपंचमंउकारः अत्रपुनःशब्देनतयोर्योगःसूचि
तः तेनटुइतिसिद्धं मोहिनीप्रथमंककारः मालिनीद्वितीयं
अकारः तद्युक्तेनकाइतिसिद्धं वायुवीजंयकारः पूर्ववी
जंभुवनेश्वरीवीजंनमः स्वरूपंआपदुद्धारणमंत्रमुत्तमं प
रिकीर्तितंसर्वसिद्धिकरंसाक्षाच्छिवेनपरिभाषितं ऋषि
स्तुवृहदारण्यःछंदोनुष्टुपउदाहृतं देवतावटुकःप्रोक्तः।

साक्षात्परशिवप्रिये षडंगं संप्रवक्ष्यामि वटुकस्य विशेष
तः ह्रांह्रींह्रूंह्रैं समुद्धृत्य ह्रौंह्रः श्चैव षडाक्षरं वटुशब्दं परे
पूर्वं च मविश्यदं पुनः हृदयाय पदं पश्चाद्धृदयं परिकीर्तितं ।
वटुप्रथमता पश्चाच्छिरसे वसमन्वितं शिखायै वषट् संयु
क्तं कवचं वटुकाय च नेत्रं वटुकसंयुक्तं वटुशब्दं ततः परं दं
डोयपातये पश्चादस्त्रमंत्रं समुद्धरेत् नमः स्वाहा वषट् वौ
षट् फट् तेन नियोजयेत् षडंगमित्यारभ्य नियोजयेदित्यं
तानां श्लोकानामयमर्थः ह्रां वटुचमीवर हृदयाय नमः
ह्रीं वटुप्रमथन शिरसे स्वाहा ह्रूं वटुशिखायै वषट् ह्रैं व
टुकाय कवचाय हुं ह्रौं वटुक नेत्रत्रयाय वौषट् ह्रः वटु
दंडपातयेऽस्त्राय फट् इति षडंगमंत्रानुद्धृत्य अत्रापि प्रा
ग्वदंगुलीदेहवक्त्रेषु पंचमूर्त्तयो न्यस्तव्याः द्वात्रिंशत्
लक्षमानेन जपेन्मंत्रं जितेंद्रियः जुहुयात्तद्दशांशेन तिलै
मधुरसंयुतैः एकविंशत्यक्षरोक्तवर्त्मना देवमर्चयेत् ।
अथ तंत्रोक्तकाम्यप्रयोगानथ नेन मंत्रेण साधयेदिति ।
अथ विंशत्यक्षरो मंत्रः तत्र रुद्रयामले विषमसारोद्धारे प्र
णवं पूर्वमुद्धृत्य देवीप्रणवमुद्धरेत् वटुकायेति वै पश्चादा
पदुद्धारणाय च कुरुद्वयं ततः पश्चाद्वटुकाय पुनर्वदेत्
देवीप्रणवमुद्धृत्य मंत्रोद्धारमिमं प्रिये इति देवीप्रणवं मा
यावीजं तस्य स्यतं त्वेषु पंचतारत्रिताराद्धारा दौ प्रणवसंक

तात् मंत्रोद्धारः सुगमः अत्र प्रागुक्ता षडंगमंत्रेषु प्रणवादि
त्वं विशेषः ऋष्यादयस्त्वेकविंशार्णोक्ता एव अयमेव प्र
णवरहितस्त्वेकविंशा विंशत्यक्षरो मंत्रः शारदातिलकादि
षूद्धृतः एतन्मंत्रोद्देशेनैवायं ग्रंथः प्रपंचितः अथास्य मंत्रां
तरं तु श्रीभैरवयामले अनंतो विंदुनामाढ्यं नकुलीशो भुजं
गयुक् त्रिमूर्तिश्रीमुखोभ्यां तद्द्वितीयं बीजमुच्यते क्रोधीभु
जंगनिलयस्सद्योक्रूरसमन्वितः तृतीयं बीजमाख्यातं चतु
र्थं श्रृणु पार्वति भुजंगेश्वर संवर्त महाकाली शिरीवती वा
लीशानुग्रहार्थीशा श्रीमुखीभिः समुद्धरेत् वटुकायपदं प
श्चादापदुद्धारणाय च कुरुद्वयं समुद्धृत्य वटुकाय पुनर्व
देत् द्वितीयं बीजमुच्चार्य वटुकायाग्निवल्लभा समुद्धृतो म
हेशानि चतुस्त्रिंशाक्षिरस्ततः अनंत अकारः विंदुरनुस्वारः
तेन अं इति सिद्धं नकुलीश हकारः भुजंग रेफः त्रिमूर्ति ई
कारः श्रीमुखीं विंदुः एतेन मायाबीजमुद्धृतं क्रोधी ककारः
भुजंगनिलयः रेफस्थः सद्यः ओकारः अक्रूरः अनुस्वारः
ताभ्यां युक्तः तेन क्रौं इति सिद्धम् भुजंगेश्वरः रेफः संवर्तो द्ध
कारः महाकालीशः मकारः रेवती रेफः वालीशः यकारः
अनुग्रहः ओकारः अर्धीशः उकारः श्रीमुखी स्वारः एतौश्चि
तामणि बीजमुद्धृतं वटुकायस्वरूपं वीप्से रुच्चार्य्य आप
दुद्धारणाय स्वाहा रूपं अत्र न संधिः चतुस्त्रिंशाक्षिरस्ततैः॥

इत्युक्तः कुरुद्वयं कुरुमिति वटुकायस्वरूपं द्वितीयंबीज
मापबीजवटुकायस्वरूपं अग्निवल्लभायस्वाहा ऋषिर्ब्रह्मा
समुद्दिष्टछंदोनुष्टुदाहृतः अतिपूर्वंदेवतास्यभैरवः परि
कीर्तितं वेदाष्टमुनिसंख्यार्णैकस्तुवाणविलोचनै मंत्रा
र्णैश्चरेदेवीपतियुक्तैः षडंगकं वेदाश्चत्वारः मुनयः सप्तव
सवः अष्टौ वाणाः पंच विलोनद्वे पानयनमः स्वाहावषट्कं च
वौषट्फट्कारएवच जातिषट्कमिदं प्रोक्तं हृदायस्त्रांतसं
पत्तमिति इतिसोमशंभुनोक्ता अत्रहृदादीतिपदेन हृद
यात दशांशेन तिलैर्व्रीहिः स्वाद्रुसंयुतैः शैवे पीठे यजेद्देवं ट
कविंशाणिवत्यनाइति अथाग्नेवर्णा यानारदपंचरात्रे पद्म
रागद्युतिश्रेष्ठोलाक्षारससमप्रभः वालार्कवर्णाद्भुतभुक्
यथार्थसस्यतेवधौ इंद्रगोपकसंकाशः शोणितालोकपा
वकः चक्रचापनिभः श्रेष्ठः कुसुंभाभस्तथैवच रक्तानांपु
ष्पजातिनां वर्णेनाग्निरिहोच्यते अथसुगंधइच्यगंधेग्निर्घृ
तगंधः सुशोभनः आयुर्दंपद्मगंधः स्याद्विल्वगंधश्चसर्वतं
नागपंचकपुन्नागपाटलायूथिकानिभः पद्मेंदीवरकल्हा
रसर्पिगुग्गुलसन्निभः पावकस्यसुभोगंधइति अथशब्दः
जीमूतवल्लकीशंखमृदंगध्वनितल्पकः श्रेष्ठोग्निसिद्धये
होमरतोन्यस्यादासिद्धिदः शारदातिलके भेरीवारिदहस्तिं
ध्वनिर्वह्नेः सुधावहेति अथाकृतिः प्राकारोथद्विजश्रेष्ठ
ध्वजचामरसन्निभः विमानानांहयानां च प्रसादानां वृषस्य
च प्राकारोनाथहंसानांमयूराणांचसिद्धिदः तथाकृतिहो

त्तु सदा वह्निः सिद्धिकरस्स्मृतः शेषाणां दंष्ट्रिणां रूपं नश
स्तं होमकर्मणि यत्तद्रूपं कथितं चेत्तयदि तस्य प्रतिक्षणं
अन्योन्यत्वं प्रपद्येत तदा सिद्धिकरानलः अथ शिखा वि
षमाश्च शिखा वह्नेस्त्रियादयशुभावह ह्रस्वा ह्रस्वोन्नता
दीर्घाग्निज्वाला सिद्धिदा मता तथा शारदातिलकेपि प्रद
क्षिणस्त्यक्तकंपाः स्वाभाः शिखिनः शिखा शुभदा यज
मानस्य राज्यस्यापि विशेषतः तथा नारदपंचरात्रे प्रदीप्ते
लेलिहानेग्नौ निर्धूमे शकुने तथा इष्टे तुष्टिप्रदे चैव होत
व्यं सिद्धिमिच्छता अग्निः प्रदक्षिणावर्तः स्वशब्दश्चापि यो भ
वेत् नित्यमेवं शुभकरो व्यत्यये प्यशुभोत्तमैः अथ निषि
द्धः ॥ अल्पतेजाश्च रूक्षश्च विस्फुलिंगसमन्वितः धूमाव
लीढजालश्च कृशानुर्नैव सिद्धिदः दुर्गंधश्चावलीढश्च सि
तकृष्णश्च यो भवेत् भूमिं च विलिखेद्यस्तु सोपि दद्यात्परा
भवं तथा शारदातिलके कृष्णः कृष्णगतेर्वर्णो यजमानं वि
नाशयेत् पूतिगंधो हुतभुजो हेतुर्दुःखप्रदो भवेत् छिन्ना
वृत्ता शिखा कुर्यान्मृत्युं धनपरिक्षयं शुभपत्रनिभो धूमः
पारावतसमप्रभः हानीतुरगजातीनां गवां च कुरुते चिरात्
तथा तंत्रांतरे खरोष्ट्रमहिषादीनां रुतमात्रं न सिद्धये रूक्ष
श्चटचटाशब्दस्त्वयशश्चागतिस्तथा उल्लिखेद्वसुधां पतेच्च
यश्चाधः शिख एव च नैषते सौम्यतिश्रेष्ठः शास्त्रेस्मिन्पारमे
श्वरे अत्रैवंविधेषु दोषेषु प्रायश्चित्तमुक्तं कुलप्रकाशतं
त्रे एवंविधेषु दोषेषु प्रायश्चित्तोपदेशिकः मूलेनाज्येन जु

हुत्या पंचविंशतिमाहुतिरिति पंचविंशतिरेकैकस्मिन्
दोषे अथवह्नेः सात्विकादिजिह्वाभेदाः तत्रदीक्षायांहो
मशांतिकादि सात्विकादिहोमेषु हिरण्याद्याः प्रागेवोक्ताः
अथवश्यादिकाम्यहोमेषुराजसजिह्वा कुलमूलावतारे
राजसेपद्मरागैकासुवर्णाभद्रलोहिता चतुर्थेलोहिताश्वे
ताधूमिकात्याकरालिकेति॥ अथक्रूरकार्येहोमेषुताम
सोपि तत्रैव तामस्योविश्वमूर्तिका स्फुलिंगिनीधूम्रवर्णा
चतुर्थीतुमनोजवा पंचमीलोहिताख्यातावकरालीगदिता
तथा कालिचसप्तमीप्रोक्तास्तास्तथाः कार्यभेदतः यागा
क्रियाकाम्यहोमक्रूरहोमेषुचक्रमात् अथजिह्वानामधि
देवता तत्रकुलप्रकाशतंत्रे जिह्वानामधिदेवास्तुविवि
धाःपितरस्तथा गंधर्वयक्षनागाश्चपिशाचाराक्षसास्त
था(गंधर्वयक्ष) रसनातस्मादीनांजुहुयुःकार्यसिद्धये
तस्मादस्युस्ततोदेवावांछितंसिद्धिसत्तमं रसनास्थीयनाभाः
तस्मात्तोप्रायशोमतारिति अत्रहोमकालेजिह्वाशिरः क
र्णादिकंज्ञात्वाजिह्वायामेवजुहुयात् तथाचोक्तं महाक
पिलपंचरात्रे गुरुकल्पेच सर्वकार्यप्रसिद्ध्यर्थं जिह्वायां
तस्यहोमयेत् चक्षुकर्णादिकंज्ञात्वा होमयेद्देशिकोत्तमः
अग्निकर्णेहुतंयस्तुकुर्याच्चव्याधितोभयं नासिकायांमह
त्दुःखंचक्षुषोनाशनंभवेत् केशेदारिद्र्यदंप्रोक्तं तस्माज्जि
ह्वासुहोमयेत् यत्रकाष्ठंतत्रकर्णौयत्रधूमस्तुनासिके य
त्राल्पज्वलनंनेत्रं यत्रभस्मतुतच्छिरः यत्रैवज्वलितोवह्निस्त

त्रजिह्वाप्रकीर्तितेति तथाशारदातिलकेपि अस्यांतत्त्र
ढ्याद्दक्षेविपश्चित्सर्वकर्मसु कर्णेहोमेभवेद्यापिनेत्रेत्वेष
तमीरितं नासिकायांनमःपीडामस्तकेधनसंक्षयः सधूमा
ग्निशिरःप्रोक्तोनिर्धूमोचतुरेवच ज्वलत्कृशोभवेत्कर्णः काष्ठ
लग्नश्चनासिका अग्निर्निर्जायतेयत्रशुद्धस्फटिकसन्निभः त
न्मुखंतत्रविज्ञेयंचतुरंगुलमानतइति अथस्रुक्स्रुवौतत्रशिं
सिपाश्वत्थ श्रीपर्णीखदिरामचंदन देवदारूचैर्ककतशमी
पलाशोदुंबर विल्वपनसबकुलाशोकनागकेसर पुन्नाग
पंचकवट्ठ्लक्षवृक्षानामन्यतमस्यशुष्कमव्रणमशीर्ण
धुणादिभिरदुष्टमदिष्टमानधिकदीर्घस्थूलयुक्तंसमचतुरस्त्र
काष्ठंगृहीत्वा तत्रचतुर्विंशत्यंगुलमानेषड्विंशदंशेनविभ
ज्यतेषुविंशत्यंशंदंडार्थंविभज्यावशिष्टषोडशभागेयग्रदे
शेभागाष्टकंमुखार्थंकल्पावशिष्टभागाष्टकेनसमचतु
रस्त्रांवेदींकृत्वा तन्मध्येचिह्नंकृत्वा तच्चिह्नमवलंब्याद्ध्यं
शमानोवृत्तंनिष्पाद्य तद्बहिरप्येकांशमानेनवृत्तांतरंनिष्पा
द्य वृत्तयोरंतरालेभागत्रयभिन्नंमध्येवृत्ताकारंकर्णिकां
स्थापयेत् गर्तंकृत्वा ततवाह्यिरर्द्धांशमानेनवहिवृत्तंनि
ष्पाद्य तद्बहिरप्येकांशमानेनवृत्तांतरंकृत्वा वृत्तद्वयांतरा
लेष्टदलानिपरिकल्प्य तद्बहिरर्द्धांशमानेनसमाकारंचित्रि
तांवाशोभांविदध्यात् ततोग्रेवशिष्टांशेष्वेकांशेनवेद्यास्तृ
तीयांशेनपार्श्वद्वयखंडनेनमध्येकंठंविधाय ततःकिंचि
न्निम्नंपर्मवशिष्टसप्तभिरंशैरग्रेकंठसमानविस्तारकंठ

मुखयोर्मध्ये किंचित्कंठसमाऽऽयेकंठतो न्यूनविस्तारमुत्तरोत्त
रं वर्द्धमानविस्तारं समतलमधस्तादधोऽधः क्षीयमाणविस्तारं
मुखं कृत्वा मुखेऽपि वेदिवत्से मेखलां परिकल्प्य कंठादधो मुख
स्य मेखलामभिंदन्व्रणाकारमेखलांशमात्तनिम्नं कनिष्ठा
प्रवेशयोग्यं खातं कृत्वा कर्णिकामध्यस्य खातमध्यात् मुख
मध्यस्थ व्रणलोकाखातमध्ये यथाऽऽपतं निःसरति तथा तन्नलो
दशालोकया कंठवेदीपरिधिभेदनं स्वाशिरं विधाय तथैवाग्रे
पि मुखपरिधिभेदिनं निर्गमनाय कनिष्ठाप्रवेशयोग्यं रंध्रं
कुर्यात् ततो वेद्याः पृष्ठभागं कूर्माकारं मध्ये किंचित्समतलं
भूमौ यथा तत्स्थलं तिष्ठति तथा कृत्वा मुखस्य पृष्ठभागे मध्ये
किंचिन्निम्नं कृत्वा मुखरंध्राधलाङ्ग्व भागं हंसमुखाकारं
वा सुभाकारयित्वा स्रुवं यंत्रमारोप्य तद्दंडमुद्दिष्टमानात्किं
चिदधिकं स्थूलं सुवर्तुलं शल्पिरेणकारयित्वा दंडस्य मूले
ऽेकांशेन कंकणाकारं चयं च तद्द्वयं वा कृत्वा तदधोंऽशचतु
ष्टयेन मुखकंठमध्यमूलादिसुशोभितमूर्द्धमुखं कुंभं निमी
य तदधः पुनरेकांशेन प्राग्वत्कंकणानि कृत्वा तदधो नवांश
मानसुवर्तुलं षडंशमानेदीर्घी सूत्रेण वेष्टनयोग्यस्थूलं दंड
मध्यं कृत्वा तदधः पुनरेकांशेन कंकणादि तदधोंऽशत्रयेण
प्राग्वदूर्द्धमुखं तदधः पुनरेकांशेन कंकणादि च कुर्यादिति
स्रुचं निमीय स्रुवं चतुर्विंशतिभागदैर्घ्यं चतुरंशमानदैर्घ्य
सूत्रवेष्टयोग्यस्थूलमग्रदेशे शङ्खयमानेन वर्तुलाकारस्थू
लाशिरोभागयुतं सुवर्तुलं स्रुवं निमीय तस्य मुखप्रदेशे पं

भै·पा· कमध्यगतमग्नपोतपद्माकारं कर्षमात्रघृतग्रहि खातं कृत्वा
९३ तदधो दंडमूले एकांशमानेन प्राग्वत्कंकणानि तदधोंशचतु
93 ष्टयेन कुंभं तत एकांशेन पुनः कंकणानि तत एकादशांशमा
त्रं त्यक्त्वा पुनरेकांशेन कंकणानि ततोंशत्रयेण कुंभं पुनरेकां
शेन कंकणानि च कुर्यादिति स्रुचस्रुवनिर्माणप्रकारः एवं
स्वर्णरौप्यताम्रमयौ वा स्रुक्स्रुवौ कार्यौ स्रुक्स्रुवाभावे पला
शस्य मध्यपत्रद्वयं पिप्पलदलद्वयं वा होमे ग्राह्यं संस्कारोपि स्रु
क्स्रुवयोरिव तस्मिन्समये पर्णयोरपि कार्यमिति । अथ होम
द्रव्यनामानि । तत्र शारदातिलके कर्षमात्रं घृतं होमे शुक्ति
मात्रं पयस्मृतं दधिप्रसृतिमात्रं स्याल्लाजास्तु मुष्टिसम्मिता म
धुकानतत्प्रमाणास्तु शक्तवोपि तथोदिता गुडं पलार्द्धमानेन स्या
च्छर्करापि तथा मता ग्रासार्द्धं चरुमानं चदिव्यः पर्वमिवस्थि
तः एकैकपत्रपुष्पाणि तथा पूपानि कल्पयेत् कदलीना
रंगाणां फलान्येकैकशो विदुः मातुलुंगं चतुःखंडं पनसं
दशधा कृतं अष्टधा नालिकेराणि खंडितानि विदुर्बुधाः त्रि
धा कृतं बिल्वफलं कपित्थं खंडितं द्विधा उर्वारुकफलं होमे
कथितं खंडितं त्रिधा फलानन्यानि खंडानि समिदः स्युर्द
शांगुलाः दूर्वात्रयं समादिष्टं गडूची चतुरंगुला व्रीहयो मु
ष्टिमात्राः स्युः मुद्गा माषा यवा अपि तंडुलास्तु तदर्द्धेन को
द्रवा मुष्टिसंमिता गोधूमा रक्तकल्मापा विहिता मुष्टिमान
तः तिलास्तु शुल्कमानाः स्युः सर्षपास्तत्प्रमाणकाः शुक्तिप्र
माणं लवणं मरिचान्यपि विंशतिः पूरं बदरमानं स्याद्राम

टं तत्समं स्मृतं चंदनागरुकर्पूरकस्तूरीकुंकुमानि च तिं
तिडिवीजमानि सं समाद्दिष्टानि देशकैरिति कर्षलक्षणमुक्तं
माषस्तु दशगुंजास्यात्षोडश मामाषो निगद्यते कर्ष इति।
तैलसाध्येन देवपरिमाणं शुक्तिः कर्षद्वयं प्रसृतिमात्रं प
लद्वये मात्रं मुष्टिफलं पलार्द्धं कर्षद्वयं यासा अशीतिरक्ति
कामितं तदुक्तं संज्ञाभिर्दशभिर्माषः शाणो माषचतुष्टयं द्वौ
शाणौ घटकः कोलो वदरं द्वंक्षणस्त्वयः द्वौ द्वौ पाणितलं क
र्षस्स्ववर्णिकलहग्रहः पिचुर्विडालपदकं बिंदुको क्षस्तद्द्वयं
शुक्तिरष्टमिका तेद्वे पले बिल्वं चतुर्थिका मुष्टिराम्रं प्रयुंजो
द्वे पले प्रसृतिस्तथेति मातुलुंगबीजपूरं उर्वारुक चकर्करी
टी तदर्द्धांशः शुक्तिमिताः चुलुकमात्राः पाणीतलप्रमा
णाः कर्षमात्रा इत्यर्थः गुरुः गुग्गुलुः बदरमात्रं अशीति गुं
जामितं रामठं हिंगुः । तथा नारदपंचरात्रे। तृतीयं खंडं मू
लानां द्व्यानि स्वप्रमाणतः शैलागमेपि खंडत्रयं स्यान्मूला
नां सूक्ष्माणि पंच होमयेत् कंदानामष्टमं भागं लतानामंगु
लद्वयमिति । अथ समिधः । नारदपंचरात्रेश मित्प्रादेशमा
त्रेण समच्छेदान्विता तथा तथा विशीर्णा द्विदला ह्रस्वा स्थू
ला कृशा द्विधा कृमिदंष्ट्रा च दीर्घाश्च निस्त्वचः परिवर्जिताः
विशीर्णायुःक्षयं कुर्यात् द्विदला व्याधिसंभवं ह्रस्वायां म
त्युमाप्नोति वक्राविस्तु करी तथा स्थूला भिहरते लक्ष्मी कृशा
यां जायते क्षयः द्विधायां नेत्रयो रोगास्तु कोटदृष्टार्थ ना
शिनी द्वेषं प्रकुरुते दीर्घा प्राणयोतिस्त्वचः स्मृतः सदा रा

भै॰पा॰ तवैधिकान्नूनास्समिधः सर्वकामदाः आद्रत्वचं मृहच्छेद्गात
९४ जीन्यंगुलवर्तुलं ईदृशी होमयेत्प्राज्ञः प्राप्नोतिविपुलांश्रि
९५ यां श्रौतेस्मार्त्ते च तंत्रोक्ते समिधः परिकीर्तिताः तथावायु
वीजसंहितायां तापालाश्यः परावापियत्तियाद्वादशांगु
गुलाः अवक्राअस्थयंस्तुकाम्लत्ववनिर्व्रणाः समादशांगु
लावाविहिता प्रादेशमात्रा वालाभेहोतव्यासकलश्रपि ।
अथप्रकृतेक्रियादीक्षाशक्तानां वर्णदीक्षाविधिर्लिख्यते
तत्र पुंप्रकृत्यात्मकान् अकारादिक्षकारांतान्मातृकाव
र्णान्संप्रकृत्यात्मकेशिष्यदेहे प्रागुक्तविधिनाविन्यस्य पु
नः संहारक्रमेण मूर्द्धादिहृदयांतस्थक्षकारं हृदयादिनाभ्यं
तस्थलकारे संहरति हृदयादिनाभिपर्यंतस्थं लकारं हृ
दयादि वामपादपर्यंतस्थे वकारे संहरामि हृदयादिवाम
पादपर्यंतस्थकारं हृदयादिदक्षिणपादाग्रपर्यंतसकारे सं
हरति हृदयादिदक्षिणपादपर्यंतस्थे सकारं हृदयादिवाम
पाणिग्रावधिस्थे दक्षिणपाणिग्रावधिस्थे शकारे संहरामि
पंचसक्त्याशकारं वकारे संहरामि पंचयुक्त्या शकारांवका
रे संहरामित्यादिसखवत्तस्य माकारं शिरस्थे अकारे संहरा
मीत्यत्र सक्तयुक्त्या वर्णान्संहृत्य पुनः तच्चैतन्यंसकलतत्वा
त्मात्मसमेतं परमात्मनिसंयोज्य विलीनसकलं तत्वसमू
हं विगीतनिखिलकल्मखं दिव्यतनुं शिष्यं संचिंत्य पुनः पर
मात्मनः सकाशादकारादिक्षकारांतान्वर्णानुत्पाद्य प्रा
गुक्तसृष्टिन्यासक्रमेणशिष्यदेहे मातृकावर्णान्विन्यस्य ॥

पुनः चैतन्यं तत्वग्रामसमेतं तस्मिन्संयोज्योक्तविधिनोप
देशं कुर्यात् इति वर्णदीक्षा अथ कलशदीक्षा तत्र पाद
तो जानुपादपर्यंतं निवृत्ति कलां जानुतो नाभि पर्यंतं प्रतिष्ठा
कलां नाभितः कंठपर्यंतं विद्या कलां कंठात् ललाट पर्यंतं शां
ति कला ललाटाद्ब्रह्मरंध्रांतां शांत्यातीतां कलां च शिष्य देहे
संचिंत्य निवृत्ति कलां प्रतिष्ठा कलां प्रतिष्ठा कलायां विद्या
कलां च शिष्य देहे संचिंत्य निवृत्तिकलां प्रतिष्ठाकलायां सं
हरामि प्रतिष्ठाकलां विद्याकलायां संहरामि विद्याकलां शां
ति कलायां संहरामि शांतिकलां शांत्यातीता कलायां संहरा
मि ततः शांत्यातीतायाः शांतिं ततः विद्यां ततः प्रतिष्ठां ततो
निवृत्तिं च सृष्टिक्रमेण शिष्यदेहे तत्स्थाने संयोज्योपदेशा
दिकं कुर्यादिति एवमष्टत्रिंशत्कलाभिर्वा एकपंचाशत्क
लाभिर्वा प्रागुक्तानि रुक्त्युक्त्या संहार सृष्टिन्यासक्रमेण
शिष्यं संस्कृत्य दीक्षां दद्यात् इति कलादीक्षा अथ स्पर्शदी
क्षा ततः गुरुः स्वहस्ततले शिवरूपं स्वगुरुं ध्यायन् मूलमंत्रं
मातृकां च जपां शेषस्य शिरसि स्वदक्षिण करं निधायोपवि
शेत् इति स्पर्शदीक्षा अथ वाग्दीक्षा ततः गुरुः पराचि
तद्रूपे शिवे चित्तं निधाय तदुद्भुतान् समंत्रान् ध्यायन् मयस्व
यं शिष्याय मंत्रानुपदिशेत् इति वाग्दीक्षा अथ दृग्दीक्षा।
तत्र गुरुः स्वनेत्रे तिनिमील्य परमात्मनस्वरूपिणीं मंत्रदेव
तां ध्यात्वा प्रसन्नचित्तो दिव्यचक्षुषा शिष्यं निरीक्ष्य मंत्रो
पदेशं कुर्यादिति दृग्दीक्षा पश्चादुक्तमेतद्दीक्षा वयं विरक्ता

नां शिष्याणां मत्वविद्या गुरुणा कार्यमिति स्त्रीणां तु वादीक्षाहृदी
क्षावा विहितानान्या अथ वेधदीक्षा ततः गुरुः शिष्यस्य मूला
धारे चतुर्दलपंकजमध्यत्रिकोणमध्ये प्राणरूपं कुंडलि
नीं ध्यात्वा तया तत्पात्रचतुष्टयमध्यस्थवादिसांताक्षरचतु
ष्टयं तन्मध्यस्थिते कमलासने संहृत्य तं ब्रह्माणं तदूर्ध्वग
तस्वाधिष्ठानाख्य षट्पत्रमलमध्यस्थिते (कमलासने)
विष्णुसंयोज्य वेदयित्वा तत्पत्रषट्कमध्यस्थं वादिलांतं वर्ण
षट्कं च विष्णौ संयोज्य तदूर्ध्वे नाभिमंडले दशकलकमलात्म
के मणिपूरकचक्रे विष्णुं संयोज्य तत्पत्रदशमध्यस्थडादि
फांतवर्णदशकसहितां विष्णुं तत्पंकजमध्यस्थे रुद्रे संयोज्य
वेदयित्वा तं रुद्रमनाहताख्ये हृत्पद्मे कादिठांतद्वादशव
र्णाढ्यद्वादशदलयुक्ते संयोज्य तैरक्षरैः सार्द्धं तं रुद्रं तन्म
ध्यस्थे रुद्रे संयोज्य वेदयित्वा तं रुद्रमनाहताख्ये हृत्पद्मे
कादिठांतद्वादशवर्णाढ्यद्वादशदलयुक्ते संयोज्य तैरक्षरैः
सार्द्धं तं रुद्रं तन्मध्यस्थिते ईश्वरे संयोज्य वेदयित्वा कंठदेशे
षोडशस्वराढ्यषोडशदलकमले विशुद्धिचक्रे तमीश्वरं सं
योज्य तैः स्वरैः सार्द्धमीश्वरं तन्मध्यस्थे सदाशिवे संयोज्य वे
दयित्वा तं सदाशिवं भ्रूमध्यस्थद्विदलपंकजमाज्ञाचक्रं नी
त्वा तत्पत्रद्वयस्थदक्षं वर्णद्वयसहितं तं सदाशिवं तन्मध्य
वर्तीनिजबिंदौ संयोज्य वेदयित्वा तं बिंदुं तदूर्ध्वस्थितायां सं
योज्य तां पुनर्नादे नादं नादांते नादांतं सन्मध्यांतां विष्णु
चक्रे विष्णुचक्रं गुरुचक्रे चेत्युत्तरोत्तरं संयोज्य वेदयित्वा

जीवनामासहितां कुंडलिनीं परशिवे संयोज्य वेदयेत् ८
वेकृतेशिष्यो गुवीज्ञयाछिन्न संसारपाशो विसंज्ञः सद्यः क्षि
तितले पतति ततो गुरुः संहृतविपरीतक्रमेण परशिवा
न् कुंडलिनीमुत्पाद्य तया संहृतमखिलं सृष्टिक्रमेण शि
ष्यदेहे तत्तच्चक्रे गतां देवतां संयोज्य हृदये जीवं मूलाधारे
कुंडलिनीं संयोज्योपदेशादिकं कुर्यात् ततः संजातदिव्यवे
धोभूतभविष्यवर्त्तमानज्ञः सदाशिवो भवति इति वेददी
क्षा पापः कलौ वेधदीक्षा करो गुरुस्तद्योग्यशिष्य स्तदु
र्लभ इत्याद्भुराचार्य्याः प्रसंगादत्रापि लिखितोयमिति शि
वं अथैवं दीक्षितानां सद्भक्तियुक्तानां शिष्याणां गुरुः पूर्णा
भिषेकाख्यं द्वितीयमभिषेकं कुर्यात् तत्र प्रागुक्ते सर्व्व
मंडपे वेदिकारहिते प्रागुक्तं विपुलं पूजाचक्रं निर्माय प्रा
ग्वत्पंचवर्णरजोभिः कर्णिकादलकेशरकोणादिकमा
पूर्य तत्र मध्ये स्वारितोय पूर्णकुंभं प्रागुक्तविधिना सं
स्थाप्य तत्रमध्यकुंभे देवमावाह्य प्रागुक्तविधिना षोड
शोपचारैः संपूज्य तेषु कलशेषु तथैवांगावरणदेवता
संपूज्य दीक्षोक्तविधिना शिष्यस्य जन्मनक्षत्रे प्राग्वत्पंच
वाद्यघोषपुरस्सरं श्रीभैरवभक्तैर्ब्राह्मणैः सहतं सम्य
क् गुरुं प्रणम्य प्रदक्षिणादिकं कृत्वा ब्राह्मणान्भूरिद
क्षिणादिभिस्तोषयेदिति पूर्णाभिषेकविधिः ॥ इतिश्री
भैरवाचार्यपारिजाते त्रयोदशोस्तबकः ॥ १३ ॥ छ ॥

मं॰ पा॰
८८

अथ मुद्रा ॥ तत्रादावंकुशमुद्रा कुंभमुद्रा अग्निप्राकारमु
द्रा षडंगमुद्रा मालिनीमुद्रा धेनुमुद्रा शंखमुद्रा योनिमु
द्रा मत्स्यमुद्रा आवाहनादिनवमुद्रा पद्ममुद्रा गंधादिपं
चमुद्रा चक्रमुद्रा ग्रासमुद्रा प्राणादिपंचमुद्रा सप्तजिह्वा
मुद्रा भूतबलिमुद्रा नाराचमुद्रा संहारमुद्रा चेति त्रिचत्वा
रिंशन्मुद्रा तथैतासां लक्षणानि तत्र तंत्रराजे कनिष्ठानाम
योः पृष्ठे साऽदंगुष्ठतर्जनी कुटिला ऋतमध्यस्था मुद्रासा
वंकुशाभिधेति नारदपंचरात्रे दक्षांगुष्ठे परांगुष्ठं क्षिप्त्वा हस्त
द्वयेन तु सावकाशं त्वेकमुष्टिं कुर्यात् कुंभमुद्रिकेति ।
त्रिशूलाग्रौ करौ कृत्वा व्यत्यस्तावभितो नयेत् अस्त्रमुद्रेय
माख्याता वह्निप्राकारलक्षणेति नारदपंचरात्रे मंत्राभि
मुष्टयो पीणोर्वैगानिविन्यसेत् अंगुष्ठेनाचरेन्न्यासमन्यां
गुलिसमाश्रयं अंगुष्ठविषयेन्न्यासं तर्जनी शिरसे वहीति
अत्र केचित्करन्यासे अंगुष्ठाभ्यां नमः इति न्यासं वदंति त
त्र प्रमाणं चिंत्य वस्तुतस्तु ज्ञानार्णवे मूलविद्यां द्विरावृत्य
पंचांगुलितलेषु च षडंगक्रमयोगेन विन्यसेत्परमेश्वरेति
षडंगक्रमयोगेन हृदयाय नमः इत्यादियोगेनैवांगुलिन्या
स उक्तः नारदपंचरात्रे अथांगानि च योजयेत् कनिष्ठाया
स्स च ततो हृदयादिक्रमेण त्विति हृदयादिक्रमेण हृदयाय न
मः शिरसे स्वाहा इत्यादिक्रमेण त्वर्थः शारदातिलकेपि
अंगुष्ठानियंगुलीषु न्यसेदंगैः सजातिभिः अस्त्रं त तलयो

न्यस्तेकुर्यात्तालत्रयंततः इति अंगैः तत्तन्मंत्रोक्तैस्सज्जाति
भिः हृदयायनमः शिरसेस्वाहा इत्यादिसहितैः तथाकरण
गमेनमः स्वावषट्हुंचवौषट्कारएवच जातिषट्कमिदं
प्रोक्तं हृदयाद्यस्त्रांनसंयुतमिति जातयः उक्ताः अतएवनमः
स्वाहादीनांयातिदपदयोगं नैवविधानांगुष्ठादिपदयोगे
न अन्यथातत्पदयोगेनाप्यभिधीयते तुल्यंन्यायादिति ना
रदपंचरात्रे अंगुष्ठावर्ज्यमंगुल्यस्तु ततो हृदिमूर्द्धनी शिखा
यां मुष्टिरेवस्यादंगुष्ठकृतनालिका सर्वांगुलयश्चानाभेया
एयोः कवचबंधने तर्जनीमध्यमानामाप्रोक्तानेत्रत्रयेक्रमा
त् अंगुष्ठतर्जन्यग्राभ्यांहस्तयोरभिशब्दयेदितिचतत्स्वप्रसा
रिता प्रसारिततलेनैवपाणिनाहृदयंशिर इति शैवमंत्रा
णां तुशैवागमेषडंगमुद्राविशेषउक्तः यथा कृतमुष्टिद्वय
दोहस्तौकृत्वांगुष्ठौहृदिन्यसेत् हृन्मुद्रयसमाख्याताशिरो
मुद्राप्रकीर्तयेदिति ललाटाग्रेसमाध्याय कृतमुष्टिपुटौक
रौ कुर्यान्मूर्द्धप्रसक्ताग्रेतर्जन्यौज्येष्ठवाप्यतः करौशिखायां
संयोज्यकृतमुष्टिपुटाकृतिः ज्येष्ठावधःप्रसक्ताग्रौकनि
ष्ठामूर्द्धजस्तथा कुर्यात्सेयंशिखामुद्रासर्वोपद्रवनाशिनी
कृत्वांगुष्ठौप्रसक्ताग्रौतर्जन्यौचत्रिकोणवत् मूर्द्धिपश्चान्मु
खं कृत्वानयेउभयपार्श्वतः करौहृदंतमुद्रेयंकवचस्य
भयप्रदा कृत्वानेत्रोन्मुखंहस्तंसक्तांगुष्ठकनिष्ठये प्र
सार्य्यमध्यमांकिंचिन्नमयेदितरांगुली नेत्रमुद्रेयमुद्दि
ष्टास्त्रोद्भूतनिभंजनी परस्परतलद्वंद्वंपुनरास्फोटयेत्।

भै॰पा॰ ५७ 97 मध्यं तर्जन्याशङ्खयेत्ताभ्यां ज्येष्ठाग्रस्खलिताग्रयेति मंत्रतंत्र
प्रकाशे कनिष्ठांगुष्ठकौ शक्तौ करयोरितरेतरं तर्जनीमध्य
मानामा संहता भुग्नसंज्ञिता मुद्रेशा मालिनी प्रोक्ता शंखस्योप
रिचालिता इति संहताः परस्परं संयुक्ताः भुग्नसज्जिताः अ
कुटिलाः लक्षणसंग्रहे वामांगुष्ठं तु संगृह्य दक्षिणेन तु मु
ष्टिना कृत्वोत्तानं तथा मुष्टिमंगुष्ठं तु प्रसारयेत् वामांगु
ल्यस्तथाश्लिष्टाः संयुक्ताः संप्रसारिताः दक्षिणांगुष्ठसंस्पृ
ष्टा मुद्रैषा शंखसंज्ञका तथा मिथः कनिष्ठे बद्धा तर्जनीभ्या
मनामिके अनामिकोर्ध्वसंश्लिष्टदीर्घमध्यमयोरधः अं
गुष्ठाग्रद्वयं विन्यस्य योनिमुद्रेयमीरिता अधोमुखे वाम
हस्तेनोर्ध्वास्यं हस्तकं विन्यस्यांगुष्ठयुगमं तु पार्श्वयोः संप्रसा
र्य च दर्शयेदर्घ्यपात्रे तु मत्स्यमुद्रेयमीरिता अथावाह
नादिमुद्रा। तत्रावाहनस्वरूपमुक्तं सिद्धान्तसारे स्वत
एवाभिपूर्णस्य तत्र स्नेहार्चनादिषु साधकं संमुखीभाव त
थावाहनमिष्यते तथा कुलार्णवे चिन्मयस्याप्रमेयस्य
निर्गुणस्यैकस्याशरीरिणः साधकानां हितार्थाय ब्रह्मणो
रूपकल्पनेति आवाहनावतारस्तु कलावतारे मूल
मंत्रं समुच्चार्य सुषुम्नावर्त्मना सुधीः आनीय तेजस्वस्था
नान्नासिकारंध्रे निर्गतं करस्थमातृकाम्भोजे चैतन्यं पुष्प
संचये संयोज्य ब्रह्मरंध्रेण मूर्त्तावावाहयेत्सुधीरिति।
स्वस्थानात् हृदयकमलात् सुषुम्णावर्त्मना ब्रह्मरंध्रेण
नासिकानिर्गतं तेजः पुष्पसंचये संयोज्य मूर्त्तावानीया

वाहयेदित्यन्वयः आवाहनादिमुद्रालक्षणसंग्रहे हस्ता
भ्यामंजलिं बध्वानामिकामूलपर्वणोः अंगुष्ठौ निक्षिपेत्से
यं मुद्रात्वावाहने स्मृता अधोमुखीत्वीयं चेत्स्थापनीतिनि
गद्यते उच्छितांगुष्ठमुष्ट्योस्तु संयोगात्संन्निधापना अंतः
प्रवेशितांगुष्ठा सैव संन्निरोधिनी मता उत्तानमुष्टियुग
ला संमुखीकरणं भवेत् देवतांगे षडंगानां न्यासः स्यात्स
कलीकृतिः सकलीकरणस्वरूपं सिद्धांतशेखरे अपिभि
न्नस्वभावानां यदभिन्नप्रयोजनं अंगानामंगिना सार्द्धं स
कलीकरणं विदमिति तथा सव्यहस्तकृता मुष्टिर्दीर्घा
धोमुखतर्जनी अवगुंठनमुद्रीयमभितो भ्रामिता मता
अन्योन्याभिमुखाश्लिष्टा कनिष्ठानामिका पुनः तथैव
तर्जनीमध्याधेनुमुद्रेयमीरिता अमृतीकरणं कुर्यात्तथा
साधकसत्तमः अन्योन्यग्रथितांगुष्ठा प्रसारितकरांगु
ली महामुद्रेयमुदिता परमीकरणे प्रिये प्रयोजयेदि
मामुद्रां देवताकारकर्मणि अतः परमर्घोदकेनाभ्युक्ष्य
कल्पितमूर्त्तेः प्राणप्रतिष्ठां कुर्यात् तदुक्तं कुलार्णवे
सकलीकृत्य तत्प्राणांस्तदीयानींद्रियाणि च प्रतिष्ठाया
र्चयेद्देवमन्यथा निष्फलं भवेदिति केचित् अस्मिन्प्राण
प्रतिष्ठां तु प्रतिमापूजनाहृते न क्वचित् बुधः कुर्यात् कृ
त्वा मृत्युमवाप्नुयादित्युत्तरतंत्रवचनात् प्राणप्रतिष्ठा
न कार्येत्याहुः तस्य वचनस्यावाहनादिरहितस्य केव
लस्थंडिलादेः पूजनविषयत्वात् अत एव तत्रैवोक्तं प्रतिमा

पूजनाहतश्शति प्रतिमामूर्त्ति तस्यां मंत्रमप्यामपितयान्ना
त् कथमन्यथा सकलीकरणमिति अथशैवमुद्राः तत्र
शिवरहस्ये महादेवप्रियायांच कथ्यते लक्षणानिच उ
च्छ्रितं दक्षिणांगुष्ठं वामांगुष्ठेन बंधयेत् वामांगुलीश्च द
क्षिणाभिरंगुलीभिश्च बंधयेत् लिंगमुद्रासमाख्याता शि
वसान्निध्यकारिणी मिथः कनिष्ठिके बद्धा तर्जनीभ्यामना
मिके अनामिकाद्वे संश्लिष्टे दीर्घे मध्यमयोरधः अंगुष्ठाग्र
द्वयं न्यस्य योनिमुद्रेयमीरिता अंगुष्ठेन कनिष्ठां तु बध्वा
शिष्टांगुलित्रयं प्रसारयेत्रिशूलाख्या मुद्रेषा परमेश्वरी॰
अंगुष्ठातर्जन्यंतु ग्रंथयित्वांगुलित्रयं प्रसारयेदक्षमाला
मुद्रेयं गिरिनंदिनी अधःकृतो दक्षहस्तः प्रसृतो वरमुद्रि
का ऊर्ध्वीकृतो वामहस्तः प्रसृतोभयमुद्रिका मिलित्वाना
मिकांगुष्ठे मध्यमाग्राणि योजयेत् शिष्टांगुलीउच्छ्रिता ये
मृगमुद्रेयमीश्वरी पंचांगुल्यो दक्षिणास्तु मिलिता स्त्वध्वस
त्थिता खट्वांगमुद्रा देवेशि वस्यातिप्रियामता पात्रवद्वा
महस्तं तु कृत्वांकेवामके तथा विध्या यांछित वत्कुर्यात्मु
द्रा कापालिका प्रिये मुष्टिं चाशिथिलां बध्वा ईषदुच्छ्रित
मध्यमा दक्षिणा हृद्वि संक्रम्य कर्णादेशे प्रचालयेत् एषा
मुद्रा डमरुका सर्वविघ्नविनाशिनी लिंगयोनत्रिशूला
क्षमालीष्वाभीमृगात्मिका खट्वांगाच कपालाख्या डम
रुः शिवतो यदा लक्षणसंग्रहे हस्तौतु संमुखौ कृत्वा सं
हताबुन्नतांगुली तलांतर्मिलितांगुष्ठौ मुद्रेशापप्रसंमि

ता इयं पद्मसमुद्रदेवस्यआसनंप्रदानसमयेदर्शनीयाश्र
यासनानि उत्तरतंत्रे आसनंप्रथमंदद्यात्पौष्पंदारवमेव
वा वास्त्रंवाचार्मणंकौमंमंडलस्योत्तरेसृजेत् पौष्पंपुष्पादि
रचितंकुशसूत्रादिसंयुतं अतिप्रीतिकरंदेव्याममाप्यन्यस्य
भैरव यत्तदाहसमुद्भूतमासनंचव्रणेशुभे अन्यदारुभवं
वापिदद्यादासनमुत्तमं सकंटकंक्षीणयुतंदारुसारविवर्जि
तं चैत्यश्मशानसंभूतंवर्जयित्वातिभित्तकं अथदारुमया
सनेविशेषमाह रुद्रयामले सांडिल्यभद्रसारस्यआसनंह
स्तमात्रकं सप्तांगुलोच्छ्रितंदद्याद्विष्टरंवाविचक्षणः शांडि
ल्यूविल्वःविल्वेशांडिल्यशैलूशौमालूरश्रीफलवयोत्यम
रः भद्रसारःचंदनः भद्रश्रीमलयजोभद्रश्रीचंदनोस्त्रि
यामित्यमरः विष्टरेदर्भपिंजली तथाचभार सप्तविं
शतिदर्भाणांवेन्यग्रेग्रंथिभूषिता विष्टरेसर्वयज्ञस्यल
क्षणंपरिकीर्तितमिति यद्वाविष्टरंआसनांतरं दर्भमु
ष्टिकाविष्टरशब्दस्यनामोत्रवाचित्वात् तथाच विष्टरो
विटपिदर्भमुष्टिपीडाद्यमासनमिति हेमकोश तथाको
शलंवाल्कलंशाणंवास्त्रमेतद्वयंमतं रोमेजंकेबलंचैव
वादरंचचतुष्टजं वास्त्रेषुकंबलंशस्तमासनंदेवचतुष्ट
ये वास्त्रमासनंचतुष्टयंमतामित्यर्थः वादरंकार्पासं
कार्पासंवादरंचेत्यभिधानात्तथा सिंहव्याघ्रतरक्षूणांछा
गस्यमहिषस्यवा गजानांतुरगानांचकृष्णसारस्यचर्मणः
शोकवंचाहणंश्रेष्ठंदारवंचंदनोद्भवमिति शाकवममचर्म

जं यद्वासनं कुशमयं न दासनमनुत्तमं योगपीठस्य सदृ
शं मासनं कौशमुच्यते तथा सर्वेषां तेजसानां च आसनं श्रेष्ठ
मुच्यते वर्जयित्वा लोहमयं कांस्यं सीसकमेव चेति अथा
र्घ्यादयः प्रागेव निरूपिताः अर्घ्यादीनां समयविशेषः ज्ञा
नमालायां आगताय तथा चार्घ्यं स्नातमासनगाय च पूजां
ते गंतुकामाय दद्यादर्घ्यं विचक्षणः आगते स्नानकाले च
नैवेद्योपक्रमे तथा पाद्यस्यापि समुद्दिष्टाः समयास्त्रिविधो
बुधैः पाद्ये च मधुपर्के च स्नाने वस्त्रोपवीतयोः भोजने
वाचने देयं षट्स्वस्थानेष्व पार्वती विष्णुधर्मोत्तरे मधुप
र्कं च संप्रोक्तं मनीषिभिः दध्यभावे पयः कार्यं मध्वाभावे
तथा गुडः घृतप्रतिनिधिर्नोक्तस्तत्र यत्नं समाचरेत् तथा
प्रपंचसारे शुद्धाभिरद्भिर्विहितं पुनराचमनीयकं शुद्धा
भिरित्युक्ते थ पुनराचमनीयेत्यादिदेयमिति उर्णीयागे
गंधोदकैस्तु मूलेन तथा शंखाभिषेचयेत् महाभिषेकं
सर्वत्र शंखेनैव प्रकल्पयेत् सर्वत्रैव प्रशस्तोब्जः शिवसू
र्यार्चनं विना अब्जः शंखः यामले पीतकौशेयवसनं वि
ष्णुप्रीत्यै प्रकीर्तितं रक्तं शक्त्यर्कविघ्नानां शिवस्य च सितं
प्रियं यमहीनं तथा छिद्रं क्षौमं कार्यासमेव च मंत्रतंत्र
प्रकाशे मंत्रतंत्र शैलादिदूषितांशोगः साच्छिद्रव्ययता
भवेत् जीर्णाद्दरिद्रता कर्तुं मलिनात्कांतिहीनतम् का
लिकापुराणे निर्दशं मलिनं जीर्णं छिन्नं मात्रावलंवितं।
परकीयाङ्कदंष्ट्रसूचाविद्धं तथा सितं वुप्तकेशमयोतं

च मलमूत्रादिदूषितं प्रधानदेवताभ्यश्च दैवे पित्रे च कर्म
णि वर्जयेत्सोपयोगे च यत्नात्सर्वपूजोयते आमाणानित
स्तकुठादियोगेन बहूनि संतति तथा योगिनीतंत्रे गंधः पुष्पं
तथा धूपो दीपो नैवेद्यमेव च यस्य यद्दीयते वस्त्रमलंकारा
दिकांचनं तेषां दैवतमुच्चार्य कृत्वा प्रोक्षणपूजने उत्सृज्य
मूलमंत्रेण प्रतिनाम्ना निवेदयेत् वरुणस्य बीजेन तेषां प्रो
क्षणमाचरेत् उत्सर्गप्रकारश्च प्रागेव दर्शितः सुवर्णं चान्या
नि तु योगिनीतंत्रे अन्नदेवता देवता लक्ष्मीरथवापि प्रजाप
तिः स्ववर्णं चाग्निदैवत्यं रजतं चंद्रदैवतं बार्हस्पत्यं तथा
वस्त्रं वासस्पत्यं फलादिकं स्फाटिकं शिवदैवत्यं प्रवालं सू
र्य्यदैवतं हीरकं वरुणं ज्ञेयं स्थानीयं पृथिवी तथा जलस्य व
रुणो देवः पेयानां वरुणस्तथा कर्पूरस्य रमादेवी परमा
णस्य चैव ही घृतप्रदीपके विष्णुस्तैलयोगे वनस्पतिः गंध
वेश्च तथा धूपश्चाज्यं चैवाग्निदैवतं मधु वैवारुणं ज्ञेयं दधि
क्षीरं च वैष्णवं वानस्पत्यं तथा पुष्पं वैष्णवो गंध ईरितः मा
लायाश्च तथा दुर्गा सर्वं वा विष्णुदैवतं अत्र पूर्यं नपवदैव
तोच्चारणं तेषां दैवतमुच्चार्य पूजयेत्तु विचक्षण इति स्वय
मभिधानात् उत्सर्गस्तु मूलमंत्रेण इष्टेन मूलमंत्रेण त
थोत्सर्गनिवेदने इति वचनात् लक्षणसंग्रहे ज्येष्ठाग्रेण
कनिष्ठाग्रं स्पृशेद्गंधस्य मुद्रिका गंधस्तु कालिकापुराणे
चूर्णीकृतो वा घृष्टो वा दाहकर्षितमेव वा रससंमर्दजो वा
पि प्राण्यंगोद्भव एव वा गंधः पंचविधः प्रोक्तो देवानां प्री

तिदायकः गंधचूर्णं गंधपत्रं चूर्णं सुमनसस्तथा प्रशस्तगंध
युक्तानां यत्रणीतियानि तु तानि गंधाश्चयानि स्युः चूर्णज
प्रथमस्मृतः घृष्टो मलयजो गंधः शालश्च नमेरुणा अग
रुप्रभृतिश्चैव यस्सपंकः प्रदीयते घृष्टेन घृष्टो गंधोयं द्विती
यः परिकीर्तितः एवमेव शारदातिलके गंधश्चंदनकर्पूरका
लागुरुभिरीरितः इतिप्रपंचसारेपि चंदनागुरुकर्पूरपंच
गंधमिहोच्यते इतितथा देवदार्वीगुरुवल्लसानरात्तु चंदना
त् प्रियादीनांच योदग्धा गृह्यते दाहजो रसः सुदाहकार्षि
तो गंधस्तृतीयः परिकीर्तितः सुगंधकरवीराद्यं गंसुगंध
लतिकातथा सुगंधान्यत्र सोयो सौनिःपीड्य परिगृह्यते स
र्शमदोद्भवो गंध स मर्दजइतीर्यते मृगनाभि समुद्भूत तत्कोष्ठो
द्भव एव च गंधः प्राणिगजः प्रोक्तो मोददः स्वर्गवासिनामि
ति लक्षणसंग्रहे अधोमुखं करं कृत्वा तर्जन्यग्रे तु योजयेत्
अंगुष्ठाग्रंतु भद्रेयं पुष्पाख्या परमेश्वरी पुष्पानि तु मंत्रतंत्र
प्रकाशे पुष्पं पंचविधं प्रोक्तं मुनिभिर्नारदादिभिः परापरो
त्तमं चैव मध्यमं च तथाधमं सौवर्णं तु परं प्रोक्तं अपरं चित्र
वस्त्रजं वृक्षगुल्मलतापुष्पमुत्तमं परिकीर्तितं अधमं पत्र
तोयादि मध्यमं तु फलात्मकं उत्कृष्टं न क्रियायोग्यं सदा
भोज्यो परात्परे एषु उत्कृष्टं देवेभ्यो यद्दत्तं पुनः सा क्रियायो
ग्यं न भवेतीत्यर्थः परापरेतिपरं सौवर्णं अपरं वस्त्रं तेवा
नुत्कृष्टेवसदा योग्ये भवतः देवतोपरि सद्भाचार्यैरित्यर्थः
तोयेष्वेकतरमुत्कृष्टं चेत्यर्थः क्रियायोग्यमिति भावः।

यदुक्तं ज्ञानार्णवे पुष्पैः पर्युषितै देवीं नार्चयेत्स्वर्णजैरपि
निर्माल्यभूतैः कुसुमै रुत्सृष्टै परमेश्वरि रिति निर्माल्यभूतैः
उत्सृष्टैः दत्तैरितियावत् उच्छिष्टैः पूजावशिष्टैः उत्तमपुष्पा
निशारदा तिलके कमले करवीरे द्वे कुमुदं तुलसीद्वयं जा
ती द्वे केतकी द्वे च कल्हारं पंचकोत्पले कुंदमंदारपुन्नाग
पाटलीनाग चंपकं आरग्वधं कर्णिकारं पारतीनवमल्लि
का सौगंधिकं सकोरंटं पालाशशोकमल्लिका पद्मरंस
र्जिकं विल्वं मुरुणं मुनिपत्रकं अन्यान्यपि सुगंधीनि पत्र
पुष्पाणि देशिकैः उपदिष्टानि पूजायामाददीत विचक्षण
इति अथाधमपुष्पाणि मंत्रतंत्रप्रकाशे ॥ पत्रेषु तुल
सी श्रेष्ठा विल्वं दामनकं शुभं मरुको देवकह्लारो विस्तुका
तास्तथैव च अपामार्गार्थगंधारा पात्री सुरभिसंज्ञिका ना
गवल्लीदलं दूर्वा कुशपत्रं तथा मतं पत्रं वा गल्प वृक्षस्य
पुष्पं धात्रीफलं तथेति अथ शिवस्य निषिद्ध पुष्पाणि स्वा
नमालायां शिवे कुंदं मदंभी च यूथीबंधूक केतकी जयां
रक्तांत्रि संध्ये च सिंधूरं कुटजानि च मालतीं * बहूर्णारक्त
हयारिर्वर्वरीत्यजेत् उग्रगंधमगंधं च कृमिकेशादिदूषि
तं अशुद्ध पात्र पाण्यंगवासोभिकृत्सितात्माभिः आनी
तं नार्चयेच्छंभो प्रसादादपि दोषकृत् कालिकाभिस्तथा
न्येर्ज्यं विना चंपक पंकजैः पुष्पैर्न पूजयेच्छुंभो प्रसाद
दपि दोषकृत् पत्रैः पुष्पैः फलैरपि स्वात्मानीतैः पर्यु
षितैः याचितै कुसुमवर्णिकैः स्वयं विकासितैः पुष्पैः स

भै॰पा॰
१०१

यं च पतितं भुवि वर्जयेद्दूहतीपुष्पं कोचनारं कुरंटकं स
र्वपुष्पैः सदा पूजा विहिताविहितैरपि कर्त्तव्या सर्वदेवानां
भक्तिरेवात्र कारणं नारदं पंचरात्रवचनात् पुष्पं वाय
दि वा पत्रं फलं नेष्टमधोमुखं दुःखदं तत्समाख्यातं यथो
त्पन्नं तथार्पणं चित्रपूजासु सर्वासु न विरुद्धस्य दूषणं ।
अधोमुखोर्पणं श्रेष्ठं पुष्पांजलिविधौ न तत् लक्षपूजासु
सर्वासु पुष्पमेकैकं समर्पयेत् समुदायेन चेत्पूजा लक्ष
पूजार्पणं न तत् न पर्युषितदोषोस्ति जलजोत्पलकंजे ।
तुलसी गस्त्य वकुलो विल्वे गंगाजले तथेति लक्षणसंग्र
हे अंगुष्ठाग्रेण तर्जन्या स्पृशेदग्रं महेश्वरी धूपमुद्रेय
माख्याता सर्वदेवप्रियंकरी धूपद्रव्याणि तु प्रपंचसाग
रे सगुर्वंगुल्वगुरुसीरसिताज्यमधुचंदनैः सारांगार
विनिक्षिप्तैर्मंत्रानीतैः प्रधूपयेत् तन्निवेदनप्रकारस्तु
शैवागमे धूपभाजनमंत्रेण प्रोक्ष्याभ्यर्च्य हृदा मुखे
ण पूजितां घंटां वादयन् गुलं दहेत् आवाहने च धूपे च
पुष्पे नैवेद्यदीपके नित्यमेवं प्रयुंजीत तन्मंत्रामंत्रिता
मपि पूजाकालं विनान्यत्र हितं नास्याः प्रचालनं नात
याच विना पूजां कुर्यात्सांसिद्धिलालसः दद्यात्तावदा
नेच गंधनियदं ततः मंत्रमात्रपदं चैव स्वाहान्तं स
मन्वितं एकादशाक्षरो मंत्र घंटायां सर्वसिद्धिदः ॥
कालिकापुराणे वामतस्तु तथा धूपमग्रे वा मतदद
क्षिणे न धूपं वितरेद्धीमान्नासमेन घटे तथा यथा

तथाधारगतं कृत्वा तं विनिवेदयेत् लक्षणसंग्रहे ज्येष्ठाग्रेण
स्पृशेद्द्रव्यं मध्यमायास्सुराचिते दीपमुद्रेयमुदिता सर्वदेवप्रि
याशिवे प्रपंचसागरे गोसर्पिषा वा तैलेन वभ्या वलक्षुभगाभ
या दीपितं सुरभिं शुभ्रं दीपमुद्रे प्रदीपयेत् वाशब्देनोभयो
रपि मिश्रणमुक्तं तथा कालिपुराणे नमिश्रीकृत्य दद्यात्तद्दी
पस्नेहान् घृतादिकान् कृत्वा मिश्रीकृतं स्नेहं नामिश्रं नरकं व्र
जेत् तूर्णीयागे पारावतसमाकारं दीपं नेत्रे दिदर्शयेत् द
क्षिणे सर्पिषा दीपं तिलतैलेन वामतः सितावर्ति दक्षिणतो
रक्तावर्तिस्तु वामतः कालिकापुराणे वृक्षेषु दीपो दातव्यो
न तु भौमो कदाचन कुर्वंतु पृथितापं यो दीपमुत्सृजेन्नरः
सतामता मं नरकं माप्नोत्येव शतं समं लक्षणसंग्रहे अनामा
ग्रस्पृशेद्देवी ज्येष्ठाग्रेण तु देशिकः नैवेद्य मुद्रा कथिता देवा
नां तृप्तिदायिनी नैवेद्ये तत्त्वार्णवे शुद्धस्फटिकसंकाशं
चंद्ररश्मिसमप्रभं शालिःसतंडुलं देवि चारुशुद्धोदनं प्रिये
हिंगुजीरमरीचाद्यैराईकैरचितंःप्रियं।। वटकःकुंकुमाका
रः पायसान्नसमन्वितं दुग्धसंभारसुभगं शर्करापूरपूरितं
कपिलाघृतसंयुक्तं भूपंचमंडकाःप्रिये शर्कराकर्णिका
देविभूयेमुद्गोद्भवं तथा नानाविधानि येयानि व्यंजनानि व
हून्यपि इत्यादिविविधोपेतं नैवेद्यं कल्पयेद्बुधः इति तान्नि
वेदनप्रकारस्तु प्रागेव प्रयोगे दर्शितः नारदपंचरात्रे ग्रास
मुद्रां सव्यहस्ते प्रफुल्लकमलाकृति दर्शयत्पंचवायूनाम
न्यहस्ते प्रदर्शयेत् कनिष्ठानामिकासम्यगंगुष्ठाग्रेणयो

मे॰पा॰
१०२
102

जयेत् प्राणमुद्रा समाख्याता प्रथमं दशयानिदिमात् जोज
येत्तर्जनीमध्यामपानस्याथमुद्रिका मध्यमानामिकेतद्वद्या
नमुद्राप्रकीर्तिताः तर्जनीमध्यमानामातद्वन्मुद्राउदानका।
सर्वाभिरंगुलीभिश्च पंचमीमुद्रिकामता सकीयैर्मुनिभिर्युक्ताः
पंचमुद्राः प्रकीर्त्तिताः प्राणसंज्ञस्तथापानो व्यानोदानमनन्त
तः समानोङ्युतास्सर्वेप्राणवाय्वादिगंतका पंचमंत्राः भवं
तीहक्रमेणैव समीरिताः कुंभसंभवः कर्पूरसकलैर्युक्तं
नागवल्लीदलान्विते सुधाबिंदुसमायुक्तं पूगीफलमनोह
रं तांबूलं रघुनाथाय दत्वा काममवाप्नुयात् नारदीयेँ पुन
राचमनं दद्यात्करोत्वर्तनमेवच सकर्पूरं च तांबूलं दद्यान्नी
राजनं तथा समर्प्य सकुटादीनि भूषणानि विचक्षणः आ
दर्शयेत्तथादर्शं कल्पयेत् छत्रचामरं नीराजनं ततः कृत्वा
सोमशंभुना शिरस्यारोप्य देवस्य दूर्वाक्षतं त्रिकामिति ॥
उत्तरतंत्रे पौराणिकैर्वैदिकैश्च मूलमंत्रेण चैव ही प्रदक्षिण
प्रमाणं च कुर्याद्भ्रमीर्थे साधकः लक्षणसंग्रहे मणिबंधं
स्थितौकृत्वाप्रसृतांगुलिकौ करौ कनिष्ठांगुष्ठयुगलं मि
लित्वांतः प्रसारयेत् सप्तजिह्वाख्यमुद्रेयं प्रियावैश्वानरस्य
ही कुलार्णवे सर्वाभिरंगुलीभिश्च दद्याद्भूतवलिं प्रिये प
श्यपादिनी वृक्षाभ्योमंगुलीवध्वा तर्जन्यौ दंडवत्सृजेत् अग्रे
वामं ततः पृष्ठे दक्षमाकर्षयन्शनैः नारदमुद्रासंप्रोक्तायोज्या
वलिविसर्जने लक्षणसंग्रहे अधोमुखेवामहस्तेऊर्द्धास्यंद
क्षहस्तकं क्षिप्तांगुलीरंगुलीभिः संयोज्य परिवर्तयेत् एषा

संहारमुद्रयास्याद्विसर्जनविधौमता अथजपकालविहिता
सनापि तत्रगोरक्षसंहितायां जानूर्वोरंतरे सम्यक्कृत्वापा
दतलेउभे ऋजुकायःसमासीनः स्वस्तिकंतदुदीरितं ग
ल्फौचवृषणस्याधःशिष्याःन्याःपार्श्वयोःक्षिपेत् पार्श्वपादौच
पाणिभ्यांदृढंबध्वासुनिश्चलः सिद्धासनंभवेदेतत्सर्वव्या
धिविनाशनं एकपादमथैकस्मिन्विन्यस्योरुणिसंस्थितं इ
तरस्मिंस्तथाचोरौवीरासनमुदाहृतं वामपादमुपादायदक्षि
णोरौप्रविन्यसेत् तथैवदक्षिणंपादंसव्यस्योपरिविन्यसेत् प
द्मासनंभवेदेतत्सर्वेषामपिपूजितं स्वस्तिकंपद्मकंवीरंसिद्धं
चेतिचतुष्टयम् जपेप्रशस्तमन्येषांप्रसंगादेवकीर्तनं गौत
मीतंत्रे प्राङ्मुखोदङ्मुखोवापिस्वस्तिकासनमास्थितः रा
त्रावुदङ्मुखःकार्यादेवकार्येसदैवहि शिवार्चनंसदाप्येवं
शुचिःकुर्यादुदङ्मुखः प्राङ्मुखोवाभूत्वाप्रयतमासनेःस्व
स्तिकासनमासीनःपद्मासनमथापिवा स्वयमेवोभवविधा
नात् इतिगदितमशेषंभैरवोपासनायां यजनजमहतादौ
शास्त्रदृष्टंविधानं गुरुचरणसरोजाराधनाल्लब्धमेतत् कृत
सुकृतसहस्रैर्गोपनीयंहितस्मात् १ इत्थंमहाराजकुमार
वर्यः श्रीजैत्रसिंह इतिविश्रुतनामधेयः श्रीभैरवस्यार्च
नपारिजातंग्रंथंवघेलकुलपद्मरविश्चकार ।२॥ तंपारिजात
मधिरुह्यनराग्ररूढौ मूलंसमस्तनिगमार्थविशालशाखं ना
नाप्रयोगकलिकारकपुष्पपूर्णंधर्मार्थकाममयुतमोक्षफलंल
भेतः ३॥ इतिश्रीवघेलकुलकमलप्रयोगातप्रचंडमार्तंडम

भै·पा· हाराजकुमार श्रीजैत्रसिंहदेवविरचिते श्रीभैरवार्चापारिजा

१०३ ते चतुर्दशस्तवकः समाप्तोयं भैरवार्चापारिजाते शुभम्

॥ सं· १९५८ आश्विनव· २५

पुस्तमिदं श्रीराजारामसिंहजीका लिपिकृतं पंडितकुंजला

लेन जम्बूमध्ये शुभम्॥

सर्वजंतूनाम्

१

मै·पा
१०३